॥ श्रीः ॥

पूर्वमध्यमा द्वितीय-खण्ड

अनिवार्य संस्कृत-गाइड

(प्रथम प्रश्न-पत्र)

शिवराजविजयः • द्वासुपर्णा

अनुवादाः • निबन्धाः

AS

नवीन पाठ्यक्रमानुसार लघु एवं अतिलघु प्रश्नोत्तर सहित

लेखक

पं. वेदव्यास शुक्ल

तथा

डॉ. शिवप्रसाद द्विवेदी

चौखम्बा सुरभारती प्रकाशन

वाराणसी

परीक्षापयोगी प्रश्नोत्तरात्मक पुस्तकें
(संस्कृत भाषा में)

अभिधावृत्तिमातृका-सोपानम् । डॉ. शिवप्रसाद द्विवेदी
अलङ्कारशास्त्रस्येतिहासः । परमेश्वरदीन पाण्डेय
उत्तररामचरितादर्श । डॉ. रमाशंकर मिश्र
कर्पूरमंजरी-दीपिका । गौरीनाथ मिश्र 'भास्कर'
कादम्बरी-कला-प्रकाशः । डॉ. नरेश झा
कादम्बरी-सोपानम् । शिवप्रसाद द्विवेदी
काव्यप्रकाश-रहस्यम् । श्रीरामजीलाल शर्मा
काव्यमीमांसा-दीपिका । वेदव्यास शुक्ल (१-५ अध्याय)
काव्यशास्त्रस्येतिहास-सोपानम् । डॉ. शिवप्रसाद द्विवेदी
काव्यालङ्कारसूत्रवृत्तेः-आलोकः । (तृतीयाधिकरण प्रश्नोत्तरी) । डॉ. नरेश झा
किरातार्जुनीय-रहस्यम् । डॉ. कृष्णदेव प्रसाद । १-२ सर्ग, ३-६ सर्ग
कुमारसम्भवम्-रहस्यम् । श्री रामप्रसाद त्रिपाठी । १-२ सर्ग
कुवलयानन्दालोकः । डॉ. नरेश झा
चन्द्रकलानाटिका-रहस्यम् । परमेश्वरदीन पाण्डेय
चन्द्रालोक-रहस्यम् । मानवल्ली तथा बेताल
चम्पूरामायण सोपानम् । डॉ शिवप्रसाद द्विवेदी
तर्कभाषा-सोपानम् । डॉ. शिवप्रसाद द्विवेदी
तर्कसंग्रह-रहस्यम् । श्रीकीर्त्यानन्द झा
दशकुमारचरित-सोपानम् । डॉ. शिवप्रसाद द्विवेदी
ध्वन्यालोक-प्रकाशिका । श्री राजेन्द्रप्रसाद कोठ्यारी
नलचम्पू-रहस्यम् । पं. परमेश्वरदीन पाण्डेय
नाटयशास्त्र-प्रश्नोत्तरी । १-७ अध्याय; १७-२० अध्याय
नैषधीयचरित-प्रश्नोत्तरी । मिश्र एवं द्विवेदी । १-५ सर्ग; १०-१३ सर्ग
परमलघुमञ्जूषा-सोपानम् । डॉ. शिवप्रसाद द्विवेदी
परिभाषेन्दुशेखर-सोपानम् । डॉ. शिवप्रसाद द्विवेदी
पाणिनीयशिक्षा-सोपानम् । डॉ. बालगोविन्द झा
प्रतिमानाटक-रहस्यम् । डॉ. रमाशंकर त्रिपाठी
प्रबन्धसङ्ग्रहः (व्याकरणाचार्य निबन्ध) । डॉ. ब्रह्मानन्द त्रिपाठी
भट्टिकाव्य-दर्पणः । स्वामी प्रज्ञान भिक्षु । १-४ सर्ग, ५-८ सर्ग
भट्टिकाव्यालोकः । डॉ. रमाशङ्कर मिश्र । १४-१७ सर्ग, १८-२२ सर्ग
भारतीयसंस्कृति-सोपानम् । आचार्य शिवप्रसाद द्विवेदी
मध्यसिद्धान्तकौमुदी-चन्द्रिका । आचार्य विजयमित्रशास्त्री (१-४ खण्ड) सम्पूर्ण

P-9

AS

॥ श्रीः ॥

पूर्वमध्यमा द्वितीय-खण्ड

अनिवार्य संस्कृत-गाइड

(प्रथम प्रश्न-पत्र)

शिवराजविजयः • द्वासुपर्णा

अनुवादाः • निबन्धाः

नवीन पाठ्यक्रमानुसार लघु एवं अतिलघु प्रश्नोत्तर सहित

लेखक

पं. वेदव्यास शुक्ल

तथा

डॉ. शिवप्रसाद द्विवेदी

चौखम्बा सुरभारती प्रकाशन

वाराणसी

प्रकाशक.

चौखम्बा सुरभारती प्रकाशन

(भारतीय संस्कृति एवं साहित्य के प्रकाशक तथा वितरक)
के. 37/117 गोपालमन्दिर लेन
पो. बा. नं. 1129, वाराणसी 221001
दूरभाष.: 2335263

© सर्वाधिकार प्रकाशकाधीन

नवीन संस्करण
मूल्य : 60.00

अन्य प्राप्तिस्थान

चौखम्बा पब्लिशिंग हाउस

4697/2, भू-तल (ग्राउण्ड फ्लोर)
गली नं. 21-ए, अंसारी रोड
दरियागंज, नई दिल्ली 110002
दूरभाष : 32996391
ई-मेल : chaukhamba_neeraj@yahoo.com

❖

चौखम्बा संस्कृत प्रतिष्ठान

38 यू. ए. बंगलो रोड, जवाहर नगर
पो. बा. नं. 2113
दिल्ली 110007
दूरभाष : 23856391

❖

चौखम्बा विद्याभवन

चौक (बैंक ऑफ बड़ोदा भवन के पीछे)
पो. बा. नं. 1069, वाराणसी 221001
दूरभाष : 2420404

विषय-सूची

शिवराजविजयः

समालोचनात्मको भागः

१. अम्बिकादत्तव्यासस्य जीवनवृत्तं रचनासमुदयं च सङ्क्षेपेण लिखत। १

व्याख्यात्मको भागः

प्रथमो निश्वासः

१. अरुण एष प्रकाशः····इनश्च दिनस्य। २
२. अयमेव अहोरात्रं जनयति····विप्रबटुः। ३
३. अहो चिररात्राय····पुष्पावचयं कर्तुमारेभे। ४
४. कदलीदलकुञ्जायितस्य····पर्वतखण्ड आसीत्। ५
५. यावदेष ब्रह्मचारी····मेवमवादीत्। ६
६. तस्मिन् पूज्यमाने···मादिश्य कथितम्। ७
७. भगवन्! श्रूयतां यदि····नयनवाष्पाणि। ८
८. अथ कन्यके! मा भैषीः···अबोधयदस्मान्। १०
९. तदाकर्ण्य कोपज्वाला···च परितः। १२
१०. ततः सर्वेषु स्तब्धेषु···सम्पन्नमस्ति। १३
११. इदमाकर्ण्य किञ्चित्····भारतवर्षस्येति। १५
१२. उपक्रममममुमाकर्ण्य····न वा चिखेदयिष्यामि। १६
१३. अथ स मुनिः—भगवन्!····स्वदेशमनैषीत्। १७
१४. एवं स ज्ञातास्वादः····गदामुदतूतुलत्। १८
१५. अथ वीर! गृहीतमखिलं····राजधानीं प्राविशत्। १९
१६. महाराष्ट्रदेशरत्नम्····इति कथयित्वा विरराम। २१
१७. अथ किमपि पिपृच्छिषामी····तपस्तप्तुं जगाम। २२
१८. ततः शनैः शनैः····पुनरुपन्यस्तुमारेभे। २४
१९. कलकलमेतमाकर्ण्य····सज्जः समतिष्ठत। २५
२०. ततो गौरसिंहः दक्षिणान्····शिरश्चिच्छेद। २६
२१. अथ मुनिरपि दाडिम····प्रविवेश। २७

द्वितीयो निश्वासः

२२. इतस्तु स्वतन्त्र····ससेनस्तिष्ठति स्म । २८

२३. अथ जगतः प्रभाजाल····एव सञ्जातः । ३०

२४. ततो दौवारिक !···संन्यासी दृष्टः ।

२५. अथ यावद् द्वारस्थ····गौरसिंहः समवोचत् ।

२६. दौवारिक ! मया बहुशः···प्रति प्रतिष्ठत ।

२७. शिववीरस्तु कस्याश्चिद्····प्रावीविशत् ।

२८. तमवलोक्यैव···इति कथयामास ।

२९. गौरसिंहः—भगवन् ! सर्वं····यवनहतकानाम् ।

३०. शिववीरः—साधु साधु····भारतवर्षीयाः ।

३१. भगवन् सर्पाकारैरक्षरैः···साक्षात्करिष्यति इति ।

३२. तदवगत्य सोऽयं····कर्णान्तिकं व्याहार्षीत् ।

३३. ततो वीर ! कुशलोऽसि····प्रतस्थे ।

३४. अथ तौ त्वरितं····मण्डलं प्रविवेश ।

३५. मैवं भोः ! श्व एव····सह निनाय ।

३६. तानरङ्गस्तु तेनैव····च ददर्श ।

३७. तानरङ्ग—सेनापते !···भटाट्यामकार्षम् ।

३८. तानरङ्ग—आम् श्रीमन् !····निर्भयाः क्रीडन्ति ।

३९. ततस्तानपूरिकायाः····गीतिमगायत् ।

४०. ततस्तानरङ्गोऽचकथत्····ग्रहणाऽऽग्रही वर्तते ।

४१. भगवन् ! सामान्य····जीवनं याचन्ते ।

४२. अथ सहासं सोऽब्रवीत्···प्रतीक्षते विवेकम् ।

४३. शिववीरः—शिव ! शिव !····कमलचञ्चरीकः ।

४४. गोपीनाथः—कथयति···विदुषामत्र का सम्मतिः ।

४५. बह्वो—वयमद्य····अपजलखानमानेतुं प्रबन्ध ।

४६. अपजलखानोऽपि च····आकृष्याश्वमवारुधत् ।

४७. ततस्तु इतोऽश्वात्····भूपृष्ठेऽपोथयत् ।

४८. तत्क्षणादेव च····रोदसी समपूरयत् ।

४९. ततो यवनसेनासु····रणाङ्गणम् ।

५०. तदवलोक्य गौरसिंहो····दिशो भेजुः ।

तृतीयो निश्वासः

५१. तत्र पर्णकुटीरे तु''''मुक्तकण्ठं रुरोद । ७२
५२. वृद्धोऽपि च एकं''''सकरुणं विललाप । ७४
५३. तावत् कुटीराद्''''स्वरेणाचकथयत् । ७५
५४. अथ कथमपि''''भवतोरुद्देश्यम् इत्यादि । ७७
५५. अस्ति कश्चन''''व्याप्तो राजपुत्रदेशः । ७९
५६. यत्र कोषपूरिताः''''इति मन्दं व्याजहार । ८०
५७. अस्मज्जननी तु''''समयमयापयाव । ८२
५८. अथैकदा कश्चित्'''वहिर्गमनाद् वारयतीति । ८३
५९. अथाऽऽत्रां द्वावपि'''निवासमकुर्वहि । ८४
६०. ततश्च दुग्धधाराभिरिव''''तस्योपत्यकाः । ८६
६१. ततश्च झिल्लीझङ्कारेणैव''''व्यचारयं यत् । ८८
६२. अहह ! दुरदृष्टोऽस्मि'''सौवर्णी साक्षात्कुर्वः । ९०
६३. ततोऽत्रलोक्य तां''''भ्रान्तवन्तौ इति । ९१
६४. ततो हनुमत्पूजकेन''''इतस्ततो गताः । ९२
६५. अथ भगवन् ! श्रूयते ''''हस्तं विन्यस्य । ९३
६६. हनूमान् सर्वं''''कार्यं सेत्स्यति । ९५

चतुर्थो निश्वासः

६७. माषोऽयमाषाढ.''''गगनतलं पर्यच्छदीत् । ९६
६८. अस्मिन् समये एकः''''तोरणदुर्गं प्रयाति । ९७
६९. अथ किञ्चित् स्रोतः''''समीहां समसूसुचत् । ९९
७०. तावदकस्मात् पूर्वस्याम्''''कलानाथः । १००
७१. अथ क्षणेनैव पार्वतः''''भुवि समाजगाम । १०१
७२. अथ को भवान्''''दुर्गाध्यक्षसमीपमगमत् । १०२

द्वासुपर्णा

१. ग्रामात् ग्रामं पर्यटन् '''' निर्मलतां जगाम । १०४
२. आश्रमस्य समीपं मृगैरनुयाताः ''''परिददाति स्म । १०५
३. आचार्यः पुनरभाषत '''' समुपकल्पितम् । १०७
४. तस्मिन्नेव दिने मथुरातः '''' ब्रह्मकामत्वात् इति । १०८

५.	आचार्यः प्रवचनं प्रारब्धवान् .... वरान्निबोधत ।	१०७
६.	कथं व्यवहर्तव्यम् ... सत्यमेव जयते ।	१०९
७.	ब्राह्ममुहूर्ते उत्थाय .... युष्माकं श्रेयसे ।	११०
८.	सान्दीपनेः आश्रमे ... विद्यायिनौ बभूवतुः ।	११२
९.	यथापर्यायमिमे त्रयो विद्यार्थिनः .... जलं पातव्यमिति ।	११३
१०.	प्रचुरमात्रायामिन्धनस्य .... आश्रमपदमाजगाम ।	११५
११.	निशागमे कृष्णसुदाम्नोः .... व्यतियापिता ।	११
१२.	मार्गमीहमानौ कृष्णसुदामानौ .... निस्संदेहम् ।	११७
१३.	भगवते कृष्णाय यः कश्चित् .... ब्राह्मण्यमभिजायते ।	११८
१४.	इदमार्जवं तु दरिद्राणामेव .... दरिद्राणां च सर्वशः ।	११९
१५.	तस्मिन्नरण्येऽपि सान्दीपनेः सुखशायिनौ बभूवतुः ।	१२१
१६.	अपरेद्युर्दिनमणेः अभ्युदयेन....सर्वे प्रतिनिवृत्ताः ।	१२२
१७.	शनैः शनैः कृष्णबलरामौ .... सविशेषमधीता ।	१२३
१८.	विद्यासु पारङ्गताः ते गुरुणा .... भिक्षाचर्यं चरन्तीति ।	१२४
१९.	सुदाम्नोऽभिप्रायं विदित्वा सान्दीपनिः .... समर्थोऽसि ।	१२५
२०.	गुरोः सन्देशं श्रुत्वा सुदामा .... राचार्यमलङ्कृतवन्तः ।	१२६
२१.	सान्दीपनिः समावर्तन-प्रवचनं .... एवमुपासितव्यम् ।	१२७
२२.	सुदामानं सम्बोध्य सान्दीपनिः .... न पुनरावर्तनाय ।	१२८
२३.	अद्य समावर्तनदिवसः सान्दीपनेः ... पराकाङ्क्षा संववृधे ।	१२९
२४.	आचार्यः सह स्नातकानां .... विधिवत् सम्पादितवान् ।	१३०
२५.	सान्दीपनेः प्रभावात् समुन्नताः .... वैभवेन भृशं व्यस्मयन्त ।	१३१
	अनुवाद	१३३–१३५

निबन्धाः

१. व्यायामः	१३६
२. विद्यार्थिजीवनम्	१३७
३. समाचारपत्रम्	१३८
४. दीपमालिका	१३९
५. होलिकोत्सवः	१४०
६. वाराणसी	१४१
७. मण्डलायोगः	१४२
८. श्रीरामजन्मभूमिविवादः	१४३
९. संस्कृतभाषा	१४५
१०. मम प्रियतमो ग्रन्थः	१४७
११. गङ्गानदी	१४८
१२. संस्कृतविश्वविद्यालयः	१४९
१३. मम विद्यालयः	१५०

॥ श्रीः ॥

अनिवार्य संस्कृत गाइड

(पूर्वमध्यमा द्वितीय खण्ड)

शिवराजविजयः

समालोचनात्मको भागः

(१) प्रश्नः—अम्बिकादत्तव्यासस्य जीवनवृत्तं रचनासमुदयं च सङ्क्षेपेण लिखत ।

उत्तरम्—जीवनवृत्तम्—राजस्थानप्रदेशस्य जयपुरमण्डले धूलानामके ग्रामे व्यासमहोदयानां पूर्वजा अवसन् । पराशरगोत्रीयः यजुर्वेदीयः त्रिप्रवरः पण्डितप्रवरो राजारामो धूलाग्रामं त्यक्त्वा काशीमाजगाम । तस्य द्वौ पुत्रौ आस्ताम्—दुर्गादत्तः देवीदत्तश्च । दुर्गादत्तस्यैव धीमतः द्वितीयः पुत्रोऽम्बिकादत्तव्यासः । १९१५ विक्रमाब्दे (१८५८ ई०) चैत्रशुक्लाष्टम्यां जयपुरेऽम्बिकादत्तस्य जन्म बभूव । शिक्षां जग्राह काश्याम् । १८८० खिष्टाब्दे साहित्याचार्यपदवीं लब्धवान् । बिहारप्रान्तस्य मधुबनी-भागलपुर-छपरा-पटना-स्थानेषु छात्रानध्यापयामास । १९०० खिष्टाब्दे चावाप शिवसायुज्यं काश्याम् ।

रचनासमुदयम्—महापुरुषेणानेन संस्कृतभाषायां रचितानां ग्रन्थानां सङ्ख्या चतुर्दश विद्यते—१. अवतार-मीमांसा-कारिका, २. कथाकुसुमम्, ३. गुप्ताशुद्धि-प्रदर्शनम्, ४. दुःखद्रुमकुठारः, ५. धर्माधर्मकलकलम्, ६. पातञ्जलप्रतिबिम्बम्, ७. प्राकृतविचित्रशब्दार्णकोषः, ८. बालव्याकरणम्, ९. मित्राऽऽलापः, १०. शिवराजविजयः, ११. संस्कृताभ्यासपुस्तकम्, १२. सहस्रनामरामायणम्, १३. साङ्ख्यसागर-सुधा, १४. सामवतम् ।

हिन्दीसेवकः—अयं महानुभावो हिन्दीभाषायामपि साहित्यं रचयति स्म । नाटकं काव्यं गद्यं समस्यापूर्तिम् आत्मकथां चालिखत् । भारतेन्दुसभायाश्चान्यतमः सदस्यः । संस्कृतप्रचाराय यथा बिहार-संस्कृत-सञ्जीवन-समाजस्य स्थापना कृताऽनेन, तथैव हिन्दीप्रचाराय ६४ सङ्ख्यकानां ग्रन्थानां रचनापि कृता ।

व्याख्यात्मको भागः

प्रथमो निश्वासः

प्रश्नः—अधस्तनानां गद्यखण्डानां स्वसरलसंस्कृते व्याख्या कार्या ।

(१) 'अरुण एष प्रकाशः पूर्वस्यां भगवतो मरीचिमालिनः । एष भगवान् मणिराकाशमण्डलस्य, चक्रवर्ती खेचर-चक्रस्य, कुण्डलमाखण्डलदिशः, दीपको ब्रह्माण्डभाण्डस्य, प्रेयान् पुण्डरीकपटलस्य, शोक-विमोकः कोक-लोकस्य, अवलम्बो रोलम्बकदम्बस्य, सूत्रधारः सर्वव्यवहारस्य, इनश्च दिनस्य' ।

उत्तरम्—प्रसङ्गः—द्वादशनिश्वासात्मकशिवराजविजयस्य प्रचण्डपण्डितेन श्रीमदम्बिकादत्तव्यासेन विरचितस्य प्रथमनिश्वासाद् गृहीतोऽयमंशः । 'अकारो विष्णुरि'ति कोशवचनात् अकारेण काव्यं प्रारभमाणः प्रकृतिवर्णनमाध्यमेन देश-प्रकृतिरूपवस्तुनिर्देशात्मकं मङ्गलमुपक्षिपन् कथयति—

व्याख्या—अरुणः = लोहितः, एषः = पुरो वर्तमानः, प्रकाशः = आतपः, पूर्वस्याम् = पूर्वदिशायाम्, भगवतः = श्रीमतः, मरीचिमालिनः = सूर्यस्य । एषः = पुरो दृश्यमानः, भगवान् = ऐश्वर्यसम्पन्नः, मणिः = रत्नम्, आकाशमण्डलस्य = नभोवितानस्य, चक्रवर्ती = राजा, खेचरचक्रस्य = ग्रहगणस्य, कुण्डलम् = भूषण-विशेषः, आखण्डलदिशः = पूर्वदिशायाः, दीपकः = प्रकाशकः, ब्रह्माण्डभाण्डस्य = ब्रह्माण्डसदनस्य, प्रेयान् = अतिप्रियः, पुण्डरीकपटलस्य = कमलसमूहस्य, शोकविमोकः = वियोगकष्टापनारकः, कोकलोकस्य = कोकसमूहस्य, अवलम्बः = सहायकः, रोलम्बकदम्बस्य = भ्रमरगणस्य, सूत्रधारः = प्रवर्तयिता, सर्व-व्यवहारस्य = सकलव्यापारस्य, इनश्च = स्वामी च, दिनस्य = दिवसस्य ।

समासः—मरीचीनां माला अस्ति अस्य इति मरीचिमाली, तस्य मरीचि-मालिनः । आकाशस्य मण्डलम् आकाशमण्डलम्, तस्य आकाशमण्डलस्य । खे चरन्ति इति खेचराः, तेषां चक्रम्, तस्य खेचरचक्रस्य । आखण्डलस्य दिक्, तस्य आखण्डलदिशः । ब्रह्माण्डमेव भाण्डम्, तस्य ब्रह्माण्डभाण्डस्य । पुण्डरीकानां पटलः, तस्य पुण्डरीकपटलस्य । कोकानां लोकः, तस्य कोकलोकस्य । रोलम्बानां कदम्बः, तस्य रोलम्बकदम्बस्य । सर्वश्चासौ व्यवहारश्च, तस्य सर्वव्यवहारस्य ।

अलङ्कारः—रूपकालङ्कारः ।

विशेषः—१. प्रसादो गुणः, २. वैदर्भी रीतिः ।

३. 'ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा' ॥

कोषः—'पुण्डरीकं सिताम्भोजम्', 'प्रकाशो द्योत आतप' इत्यमरः । 'इनः र्ये प्रभौ' इत्यपि ।

(२) 'अयमेव अहोरात्रं जनयति, अयमेव वत्सरं द्वादशसु भागेषु विभनक्ति, यमेव कारणं षण्णामृतूनाम्, एष एवाङ्गीकरोति उत्तरं दक्षिणं चायनम्, नैव सम्पादिता युगभेदाः, एतेनैव कृताः कल्पभेदाः, एतमेवाऽऽश्रित्य भवति मेष्ठिनः परार्द्धसङ्ख्या, असावेव चर्कर्ति बर्भर्ति जर्हर्ति च जगत्, वेदा एतस्यैव न्दनः, गायत्री अमुमेव गायति, ब्रह्मनिष्ठा ब्राह्मणा अमुमेवाहरहरुपतिष्ठन्ते । य एष कुलमूलं श्रीरामचन्द्रस्य, प्रणम्य एष विश्वेषामि'ति उदेष्यन्तं भास्वन्तं मन् निजपर्णकुटीरात् निश्चक्राम कश्चिद् गुरुसेवनपटुर्विप्रबटुः ।

सन्दर्भः—श्रीमदम्बिकादत्तव्यासविरचितशिवराजविजयाख्यगद्यकाव्यस्य मनिश्वासाद् गृहीतोऽयं व्याख्येयांशः । विप्रबटुरत्र वर्णयति प्राचीक्रोडे विलसन्तं ाकरं शास्त्रगर्भम् ।

व्याख्या—अयमेव = पुरो दृश्यमानो रविरेव, अहोरात्रम्=दिवानिशम्, जन- = विदधाति, अयमेव=सूर्य एव, वत्सरम् = वर्षम्, द्वादशसु=चैत्रादि द्वादश- ख्यकेषु, भागेषु = मासेषु, विभनक्ति = विभजते, अयमेव = दिनकर एव, रणम् = हेतुः, षण्णाम् = षट्संज्ञकानां वसन्तादीनाम् ऋतूनाम्, एषः = पूर्व- णतः दिवाकर एव, अङ्गीकरोति = स्वीकरोति, उत्तरम् = उदीचीम्, दक्षिणम् अवाचीम्, अयनम् = सूर्यगमनमार्गम्, एतेनैव = सूर्येणैव, सम्पादिताः = ाः, युगभेदाः = कृतत्रेताद्वापरकलिसंज्ञकाः युगभेदाः, एतेनैव = पतङ्गेनैव, ाः = विहिताः, कल्पभेदाः = एकसहस्रमहायुगात्मककालभेदाः, एतमेव = दित्यमेव, आश्रित्य=समाश्रित्य, भवति, परमेष्ठिनः=ब्रह्मणः, परार्द्धसङ्ख्या= न्तमा परार्द्धनामा विख्याता सङ्ख्या, असावेव = सहस्रांशुरेव, चर्कर्ति = वारं रं करोति, बर्भर्ति = वारं वारं बिभर्ति, जर्हर्ति च = वारं वारं संहरते च, जगत् परिदृश्यमानं लोकम्, वेदाः = श्रुतयः, एतस्यैव = भास्करस्यैव, वन्दिनः = तिपाठकाः, गायत्री = मन्त्रविशेषः छन्दोविशेषा च, अमुमेव = दिनमणिमेव, यति=वर्णयति, ब्रह्मनिष्ठाः=वेदपारगाः, ब्राह्मणाः=द्विजाः, अमुमेव = विभाकर- , अहरहः = प्रतिदिनम्, उपतिष्ठन्ते = उपासते । धन्यः = सुकृती, एषः = वर्णितः, कुलमूलम्=वंशकारणम्, श्रीरामचन्द्रस्य=रावणारेर्दाशरथेः, प्रणम्यः=

सकलजगद्वन्द्यः, एषः = महामहिमशाली, विश्वेषां = लोकानामभ्युदयोत्सुकान इति = इत्थं वाक्यं समापयन्, उदेष्यन्तम् = प्राच्यामरुणिमामण्डितमवलोक्य मानम्, भास्वन्तम् = सूर्यम्, प्रणमन् = सप्रश्रयं नमन्, निजपर्णकुटीरात्-स्वाश्रण भूतकुटीगृहात्, निश्चक्राम = निर्जगाम, कश्चित् = अज्ञातनामा, गुरुसेवनपटुः शिक्षकसेवानिपुणः, विप्रवटुः = द्विजब्रह्मचारी ।

समासः—अहश्च रात्रिश्च अहोरात्रस्तम् । युगानां भेदाः युगभेदाः । कल्प भेदाः कल्पभेदाः । ब्रह्मणि निष्ठा येषां ते ब्रह्मनिष्ठाः । कुलस्य मूलं कुलमूल निजात् पर्णकुटीरात् निजपर्णकुटीरात् । गुरोः सेवने पटुः गुरुसेवनपटु विप्रश्चासौ बटुश्च विप्रबटुः ।

विशेषः—ज्योतिषविषयकं ज्ञानं व्याकरणप्रयोगपाटवं च दर्शनीयमेव क उपतिष्ठन्ते इत्यत्र 'उपाद् देवपूजा' इत्यादिना आत्मनेपदम् । कुटीर इ 'कुटीशमीशुण्डाभ्यो रः' इति रप्रत्ययः । स्वभावोक्तिरलङ्कारः । 'भास्वद्विवस सप्ताश्वहरिदश्वोष्णरश्मयः' इत्यमरः ।

(३) 'अहो ! चिररात्राय सुप्तोऽहम्, स्वप्नजालपरतन्त्रेणैव महान् पुण्य मयः समयोऽतिवाहितः, सन्ध्योपासन-समयोऽयमस्मद्गुरुचरणानाम्, तत् स अवचिनोमि कुसुमानि' इति चिन्तयन् कदलीदलमेकमाकुञ्च्य, तृणशकं सन्धाय, पुटकं विधाय, पुष्पावचयं कर्त्तुमारेभे ।

अवतरणादिकं विप्रबटुः सुप्तोत्थितः कथयत्यत्र शिवराजविजयस्य प्रटी निश्वासे श्रीमदम्बिकादत्तव्यासविरचिते गद्यबन्धे ।

व्याख्या—अहो !=नित्यकर्मकाललोपोत्थो खेदः साश्चर्यं व्यनक्ति अहो चिररात्राय = चिरम्, सुप्तः=शयितः, अहम् = ब्राह्मणवटुः, स्वप्नजालपरतन्त्रे = निद्राजालायत्तेन एव, पुण्यमयः = पवित्रमयः, समयः = कालोऽनेहा अतिवाहितः = व्यतिपातितः, सन्ध्योपासनसमयः = प्रातःसन्ध्योपासनक अयम् = समुपस्थितः, अस्मद्गुरुचरणानाम् = प्रातःस्मरणीयगुरुमहोदयान तत् सपदि = शीघ्रम्, अवचिनोमि = सङ्कलयामि, कुसुमानि = पुष्पाणि, इ इत्थम्, चिन्तयन् = विचारयन्, कदलीदलम् = रम्भापलाशम्, एकम् आकु = भुग्नं विधाय, तृणशकलैः = काष्ठखण्डैः, सन्धाय = मेलयित्वा, पुटक समुद्गकम्, विधाय = निर्माय, पुष्पावचयम्=कुसुमसञ्चयनम्, कर्तुम्=विधा आरेभे = समारेभे ।

समासः—स्वप्न एव जालं स्वप्नजालम्, तत्परतन्त्रेण स्वप्नजालपरतन्त्रेण। सन्ध्याया उपासनं सन्ध्योपासनम्, तस्य समयः सन्ध्योपासनसमयः। अस्माकं चरणानाम् अस्मद्गुरुचरणानाम्। कदल्याः दलं कदलीदलम्। तृणस्य शकलैः तृणशकलैः। पुष्पाणाम् अवचयं पुष्पावचयम्।

विशेषः—१. उक्तं च—

'नोपतिष्ठति यः पूर्वां नोपास्ते यश्च पश्चिमाम्।
स शूद्रवद् बहिष्कार्यः सर्वस्माद् द्विजकर्मणः॥'

अथ च—'ब्राह्मे मुहूर्ते बुध्येत धर्मार्थौ चानुचिन्तयेत्'। —मनुः।

२. 'चिराय चिररात्राय' इत्यमरः।

(४) 'कदलीदलकुञ्जायितस्य एतत्कुटीरस्य समन्तात् पुष्पवाटिका, पूर्वतः परम-पवित्र-पानीयं परस्सहस्र-पुण्डरीक-पटल-परिलसितं पतत्रिकुल-कूजित-पूजितं पयःपूरितं सर आसीत्। दक्षिणतश्चैको निर्झर-झर्झर-ध्वनि-ध्वनित-दिगन्तरः फल-पटलाऽऽस्वाद-चपलित-चञ्चुपतङ्गकुलाऽऽक्रमणाधिक-विनत-शाख-शाखिसमूहव्याप्तः सुन्दरकन्दरः पर्वतखण्ड आसीत्'।

प्रसङ्गः—प्रस्तुतगद्यखण्डेऽम्बिकादत्तव्यासः शिवराजविजयस्य प्रथमनिश्वासे पर्णकुटीरं वर्णयन्नाह—

व्याख्या—कदलीदलकुञ्जायितस्य = रम्भापलाशकुञ्जायितस्य, एतत्कुटीरस्य = एतत्कुटीगृहस्य, समन्तात् = परितः, पुष्पवाटिका = कुसुमोद्यानम्, पूर्वतः = पूर्वस्याम्, परमपवित्रपानीयम् = अत्यन्तपूतजलम्, परस्सहस्रपुण्डरीकपटलपरिलसितम् = सहस्राधिकसितकमलसमूहशोभितम्, पतत्रिकुलकूजितपूजितम् = पक्षिगणशब्दशोभितम्, पयःपूरितम् = जलभरितम्, सरः = कासारः, आसीत् = वर्तते स्म। दक्षिणतश्चैकः = दक्षिणस्यां चैकः, निर्झर-झर्झर-ध्वनि-ध्वनित-दिगन्तरः = प्रवाह-झर्झरनादनिनादितदिगन्तरः, फलपटलास्वादचपलितपतङ्गकुलाऽऽक्रमणाधिकविनतशाखशाखिसमूहव्याप्तः = फलसमूहभक्षणचञ्चलचञ्चुपक्षिसमूहाक्रमणात्यन्तनम्रीभूतशिखावृक्षव्याप्तः, सुन्दरकन्दरः = शोभनदरः, पर्वतखण्डः = शिलाभागः, आसीत्।

समासः—कदलीनां दलैः कुञ्जायितस्य कदलीदलकुञ्जायितस्य। परमं पवित्रं पानीयं यत्र तत् परमपवित्रपानीयम्। परस्सहस्राणां पुण्डरीकाणां पटलेन परितः लसितं परस्सहस्रपुण्डरीकपटलपरिलसितम्। पतत्रिणां कुलस्य कूजितेन

पूजितं पतत्रिकुलकूजितपूजितम् । पयसा पूरितं पयःपूरितम् । निर्झरस्य झर्झ ध्वनिना ध्वनितं दिगन्तरं यस्य सः निर्झरझर्झरध्वनिध्वनितदिगन्तरः । फला पटलस्य आस्वादेन चपलिताः चञ्चवः येषां ते, च ते पतङ्गाः तेषां कुलं तस्य क्रमणेन अधिकं विनताः शाखाः येषां ते, च ते शाखिनः, तेषां समूहेन व्या फलपटलास्वादचपलितचञ्चुपतङ्गकुलाक्रमणाधिकविनतशाखशाखिसमूहव्याप्तः सुन्दराः कन्दराः यस्य इति सुन्दरकन्दरः ।

कोषः—'वारिप्रवाहो निर्झरो झरः', 'चञ्चुस्त्रोटिरुभे स्त्रियौ', 'पतङ्ग पक्षिसूर्यौ च', 'शिखा शाखा शिफा लता', 'वृक्षो महीरुहः शाखी', 'दरी कन्दरो वा स्त्री' इति सर्वत्रामरः ।

(५) यावदेष ब्रह्मचारी बटुरलिपुञ्जमुद्धूय कुसुमकोरकानवचिनोति तावत् तस्यैव सतीर्थ्योऽपरस्तत्समानवयाः कस्तूरिका-रेणु-रूषित इव श्याम चन्दन-चर्चित-भालः, कर्पूरागुरु-क्षोद-च्छुरित-वक्षो-बाहुदण्डः, सुगन्धपटलैरुन्नि द्रयन्निव निद्रा-मन्थराणि कोरकनिकुरम्बकान्तरालसुप्तानि मिलिन्दवृन्दा झटिति समुपसृत्य निवारयन् गौरबटुमेवमवादीत् ।

उत्तरम्—सन्दर्भः—श्रीमदम्बिकादत्तविरचितस्य द्वादशनिश्वासात्मक शिवराजविजयस्य प्रथमनिश्वासाद् गृहीतोऽयं गद्यखण्डः । अत्र गौरबटुना श्याम वटुदर्शनं वर्णयति कविः ।

व्याख्या—यावत् = यावत्कालपर्यन्तम्, एषः = पूर्ववर्णितः, ब्रह्मचारी = ब्रह्मव्रती, बटुः = ब्रह्मचारी, अलिपुञ्जम्=भ्रमरकुलम्, उद्धूय=निवार्य, कुसु कोरकान् = पुष्पकुड्मलान्, अवचिनोति = सङ्कलयति, तावत् = तस्मिन्नेव क्ष तस्यैव=बटोरेव, सतीर्थ्योऽपरः = अन्यः सहपाठी, तत्समानवयाः=तत्समवयस्क कस्तूरिकारेणुरूषितः = मृगनाभिरजश्छुरितः, इव = यथा, श्यामः = श्यामल चन्दनचर्चितभालः = गन्धसारलिप्तललाटः, कर्पूरागुरुक्षोदच्छुरितवक्षोबाहुदण्ड घनसारागुरुचूर्णलिप्तवक्षःस्थलभुजदण्डः, सुगन्धपटलैरुन्निद्रयन्निव = सुगन्धसमू रुन्निद्रयन्निव, निद्रामन्थराणि = तन्द्रालसानि, कोरकनिकुरम्बकान्तरालसुप्ता = कलिकासमूहाभ्यन्तरशयानानि, मिलिन्दवृन्दानि = भ्रमरसमूहान्, झटिति = शीघ्रम्, समुपसृत्य = समागत्य, निवारयन् = वारयन्, गौरबटुम् = श्वेतवर्णब्र चारिणम्, अवादीत् = अवदत् ।

समासः—ब्रह्म चरति इति ब्रह्मचारी। अलीनां पुञ्जम् अलिपुञ्जम्। कुसुमानां कोरकान् कुसुमकोरकान्। तेन समानं वयः यस्य सः तत्समानवयाः। कस्तूरिकायाः रेणुभिः रूपितः कस्तूरिकारेणुरूपितः। चन्दनेन चर्चितं भालं यस्य सः चन्दनचर्चितभालः। कर्पूरस्य अगुरोः च क्षोदेन च्छुरितं वक्षो बाहु-दण्डो यस्य सः कर्पूरागुरुक्षोदच्छुरितवक्षोबाहुदण्डः। सुगन्धस्य पटलैः सुगन्ध-पटलैः। निद्रया मन्थराणि निद्रामन्थराणि। कोरकाणां निकुरम्बस्य अन्तराले सुप्तानि कोरकनिकुरम्बान्तरालसुप्तानि। मिलिन्दानां वृन्दानि मिलिन्दवृन्दानि।

कोषः—'स्यान्निकायः पुञ्जराशिः' 'कलिका कोरकः पुमान्' 'सतीर्थ्या-स्त्वेकगुरवः' 'निकुरम्बं कदम्बकम्' इति सर्वत्रापि अमरः।

अलङ्कारः—उत्प्रेक्षा, अनुप्रासः संसृष्टिश्च।

(६) 'तस्मिन् पूज्यमाने योगिराडुत्थितं' इति, 'आयात' इति च आकर्ण्य कर्णपरम्परया बहवो जनाः परितः स्थिताः। सुघटितं शरीरम्, सान्द्रां जटाम्, विशालान्यङ्गानि, अङ्गारप्रतिमे नयने, मधुरां गम्भीरां च वाचं वर्णयन्तश्चकिता इव सञ्जाताः।

'अथ योगिराजं सम्पूज्य यावदीहितं किमपि आलपितुम्, तावत् कुटीराद् अश्रूयत तस्या एव बालिकायाः सकरुणरोदनम्'।

"ततः 'किमिति ? कुत इति ? केयमिति ? कथमिति ?' पृच्छापरवशे योगि-राजे ब्रह्मचारिगुरुणा बालिकां सान्त्वयितुं श्यामबटुमादिश्य कथितम्"।

सन्दर्भः—श्रीमदम्बिकादत्तव्यासविरचितशिवराजविजयस्य प्रथमनिश्वासाद् गृहीतोऽयं गद्यांशः। अत्र योगिराजनुवर्ण्य तत्कृतां बालिकाविषयिणीं पृच्छा-मपि वर्णयति कविः।

व्याख्या—तस्मिन्=योगिराजे, पूज्यमाने=समर्च्यमाने, योगिराडुत्थित इति=योगिवरः समुत्थित इति, आयात इति=सम्प्राप्त इति च आकर्ण्य=श्रुत्वा, कर्णपरम्परया=श्रुतिसरण्या, बहवः=बहुसङ्ख्यकाः, जनाः=मानवाः, परितः=सर्वतः, स्थिताः=सम्प्राप्ताः, सुघटितम्=शोभनाङ्गसंस्थानम्, सान्द्राम्=घनाम्, जटाम्=सटाम्, विशालान्यङ्गानि=दीर्घायतावयवान्, अङ्गारप्रतिमे=अङ्गारसमाने, नयने=नेत्रे, मधुराम्=मनोहराम्, गम्भीराम्=गभीराम्, च वाचम्=वाणीम्, वर्णयन्तः=व्याख्यायमानाः, चकिताः=मन्त्रमुग्धाः, इव=यथा, सञ्जाताः=विहिताः।

अथ=मन्त्रमुग्धदर्शनानन्तरम्, योगिराजम् =योगिवरम्, सम्पूज्य =समर्च्य, यावदीहितम् =समीहितं यावत्, किमपि =किञ्चिदपि, आलपितुम् =भणितुम्, तावत् =तस्मिन्नेव काले, कुटीरात् =कुटीप्रदेशात्, अश्रूयत =श्रवणविषयतामापतत्, तस्याः =पूर्ववर्णितायाः यवनभयभीतायाः कुटीमानीय सुरक्षितायाः गोपितायाः, एव बालिकायाः =कन्यायाः, सकरुणरोदनम् =सशोकविलापम् ।

ततः =कन्यकारोदनश्रवणानन्तरम्, किमिति ? =किमर्थं रोदनमिति ? कुत इति ? =कस्मात् प्रदेशात् रोदनध्वनिरिति ? केयमिति ? =रोदनकारिणी का नारी बाला वा ? कथमिति =रोदनस्य किं कारणमिति ? पृच्छापरवशे =प्रश्नपरतन्त्रे, योगिराजे =योगिवरे, ब्रह्मचारिगुरुणा =गौरश्यामवटुशिक्षकेन, बालिकाम् =रोदनकारिणीं कन्यकाम्, सान्त्वयितुम् =समाश्वासयितुम्. श्याम वटुम् =श्यामलवर्णब्रह्मचारिणम्, आदिश्य =आज्ञाप्य, कथितम्=अग्रे वक्ष्यमाणं वाक्यमुक्तमिति ।

समासः—कर्णयोः परम्परया कर्णपरम्परया । अङ्गारः प्रतिमा ययोस्ते अङ्गारप्रतिमे । पृच्छायां परवशे पृच्छापरवशे । ब्रह्मचारिणो गुरुणा ब्रह्मचारिगुरुणा ।

विशेषः—यवनानां कदाचारप्रदर्शनाय भूमिकाभूता पङ्क्तयश्चेमाः ।

(७) भगवन् ! श्रूयतां यदि कुतूहलम् । ह्यः सम्पादित-सायन्तनकृत्ये, अत्रैव कुशाऽऽस्तरणमधिष्ठिते मयि, परितः समासीनेषु छात्रवर्गेषु, धीर-समीर-स्पर्शेन मन्दमन्दमान्दोल्यमानासु व्रततिषु, समुदिते यामिनी-कामिनी-चन्दनबिन्दौ इव इन्दौ, कौमुदीकपटेन सुधाधारामिव वर्षति गगने, अस्मन्नीतिवार्तां शुश्रूषुषु इव मौनमाकलयत्सु पतङ्ग-कुलेषु, कैरव-विकाश-हर्ष-प्रकाश-मुखरेषु चञ्चरीकेषु, अस्पष्टाक्षरम्, कम्पमान-निःश्वासम्, श्लथत्कण्ठम्, घर्घरितस्वनम्, चीत्कारमात्रम्, दीनतामयम्, अत्यवधानश्रव्यत्वादनुमितदविष्ठतं क्रन्दनमश्रौषम् । तत्क्षणमेव च 'कुत इदम् ? किमिदमिति दृश्यतां ज्ञायताम्' इत्यादिश्य छात्रेषु विसृष्टेषु, क्षणानन्तरं छात्रेणैकेन भयभीता सवेगमत्युष्णं दीर्घं निःश्वसती, मृगीव व्याघ्राऽऽघ्राता, अश्रुप्रवाहैः स्नाता, सवेपथुः कन्यकैका अङ्के निधाय समानीता । चिरान्वेषणेनापि च तस्याः सहचरी सहचरो वा न प्राप्तः । तां च चन्द्रकलयेव निर्मिताम्, नवनीतेनेव रचिताम्, मृणाल-गौरीम्, कुन्दकोरकाग्रदतीं सक्षोभं रुदतीमवलोक्याऽस्माभिरपि न पारितं निरोद्धुं नयनबाष्पाणि ।

सन्दर्भः—कविना श्रीमदम्बिकादत्तव्यासेन निबद्धेन वक्त्रा ब्रह्मचारिगुरुणात्र

शिवराजविजयप्रथमनिश्वासे समुपस्थाप्यते प्रकृते योगिराजबोधनाय भङ्ग्यन्तरेण पाठकसूचनाय तस्मिन् काले भारते वर्षे प्रचलमाना यवनदुराचारकथाऽवतरणिका।

व्याख्या—भगवन्! = ऐश्वर्यसम्पन्न! श्रूयताम् = समाकर्ण्यताम्, यदि = चेत्, कुतूहलम् = वृत्तान्तज्ञानकौतुकम्। ह्यः = गतदिवसे, सम्पादितसायन्तनकृत्ये = विहितसान्ध्यकर्तव्ये, अत्रैव = अस्मिन्नेव स्थाने, कुशास्तरणमधिष्ठिते = दर्भासनसंस्थिते, मयि = वक्तरि गौरश्यामबटुशिक्षके, परितः = सर्वतः, समासीनेषु = समुपविष्टेषु, छात्रवर्गेषु = शिष्यमण्डलीषु, धीरसमीरस्पर्शेन = मन्दपवनसम्पर्केण, मन्दमन्दम् = शनैश्शनैः, आन्दोल्यमानासु = सञ्चाल्यमानासु, व्रततिषु = लतासु, समुदिते = गगनाङ्गणे परिदृश्यमाने, यामिनीकामिनीचन्दनबिन्दौ = निशाललनाललाटतिलके, इव = यथा, इन्दौ = चन्द्रमसि, कौमुदीकपटेन = ज्योत्स्नाव्याजेन, सुधाधारामिव = पीयूषप्रवाहमिव, वर्षति = पतति, गगने = नभसि, अस्मन्नीतिवार्ताशुश्रूषुषु = ब्रह्मचारिगुरुनयकथनश्रवणेच्छुषु, इव, मौनमाकलयत्सु = मूकतां धारयत्सु, पतङ्गकुलेषु = पक्षिगणेषु, कैरवविकाशहर्षप्रकाशमुखरेषु = सिताम्भोजफुल्लनमोदाविर्भावशब्दायमानेषु, चञ्चरीकेषु = द्विरेफेषु, अस्पष्टाक्षरम् = अस्फुटवर्णम्, कम्पमाननिःश्वासम् = वपमाननिःश्वासम्, श्लथकण्ठम् = शिथिलकण्ठम्, घर्घरितस्वनम् = घर्घरध्वनिमिश्रितनादम्, चीत्कारमात्रम् = चीत्कारात्मकम्, दीनतामयम् = करुणाबहुलम्, अत्यवधानश्रव्यत्वादनुमितदविष्ठत्तम् = विशेषावधानश्रवणार्हत्वादनुमितदूरत्वम्, क्रन्दनम् = रोदनम्, अश्रौषम् = अशृण्वम्, तत्क्षणमेव = सद्यः, च, कुतः = कस्मात्, इदम् = रोदनम्, किमिदमिति = किं कारणं चास्य ध्वनेरिति, दृश्यताम् = अवलोक्यताम्, ज्ञायताम् = अवगम्यताम्, इति = इत्थम्, आदिश्य = आज्ञाप्य, छात्रेषु = शिष्येषु, विसृष्टेषु = प्रेषितेषु, क्षणानन्तरम् = पलादूर्ध्वम्, छात्रेणैकेन = शिष्येणैकेन, भयभीता = भीतिभीता, सवेगम् = सगतिकम्, अत्युष्णम् = बहुशीतलेतरम्, दीर्घम् = पृथुलम्, निःश्वसती = श्वासग्रहणं कुर्वती, मृगीव = हरिणीव, व्याघ्राऽऽघ्राता = सिंहाऽऽक्रान्ता, अश्रुप्रवाहैः = नयनजलधारैः, स्नाता = कृतस्नाना, सवेपथुः = सकम्पा, कन्यकैका = एका बाला, अङ्के = क्रोडे, निधाय = समारोप्य, समानीता = आनीता। चिरान्वेषणेनाऽपि = बहुगवेषणयाऽपि च, तस्याः = प्राप्तबालिकायाः, सहचरी = सखी, सहचरो वा = सखा वा, न = नहि, प्राप्तः = समवाप्तः। ताम् = रोदनक्लिन्नबालिकाम्, च, चन्द्रकलयेव = हिमांशुलेखयेव, निर्मिताम् = रचिताम्,

नवनीतेनेव=हैयङ्गवीनेनेव, रचिताम्=कृताम्, मृणालगौरीम्=कमलदण्डश्वेताम्, कुन्दकोरकाग्रदतीम्=माध्यकलिकाग्रदशनाम्, सक्षोभम्=ससाध्वसम्, रुदतीम्=क्रन्दतीम्, अवलोक्य=दृष्ट्वा, अस्माभिरपि=आश्रमस्थैरपि मादृशैः, न=नहि, पारितम्, निरोद्धुम्=अवरोद्धुम्, नयनवाष्पाणि=नेत्राश्रूणि।

समासः—सम्पादितानि सायन्तनानि कृत्यानि येन, तस्मिन् सम्पादितसायन्तनकृत्ये। कुशानाम् आस्तरणं कुशास्तरणम्। छात्राणां वर्गेषु छात्रवर्गेषु। धीरः समीरः धीरसमीरः, तस्य स्पर्शेन धीरसमीरस्पर्शेन। यामिनी एव कामिनी, तस्याः चन्दनबिन्दौ यामिनीकामिनीचन्दनबिन्दौ। कौमुद्याः कपटेन कौमुदीकपटेन। अस्माकं नीतेः वार्ता अस्मन्नीतिवार्ता, तां श्रोतुमिच्छुः अस्मन्नीतिवार्ताशुश्रूषुः, तेषु अस्मन्नीतिवार्ताशुश्रूषुषु। पतङ्गानां कुलेषु पतङ्गकुलेषु। कैरवाणां विकाशः, तेन हर्षप्रकाशः, तेन मुखरेषु कैरवविकाशहर्षप्रकाशमुखरेषु। अस्पष्टानि अक्षराणि यत्र तत् अस्पष्टाक्षरम्। कम्पमाना निःश्वासा यस्मिन् तत् कम्पमाननिःश्वासम्। अत्यवधानेन श्रव्यम्, तस्य भावस्तत्त्वम्, तस्मात् अत्यवधानश्रव्यत्वात्। अतिशयेन दूरं दविष्ठता, अनुमिता दविष्ठता यस्य तत् अनुमितदविष्ठतम्।

कोषः—'वल्ली तु व्रततीति', 'चन्द्रिका कौमुदी ज्योत्स्ना' इत्यमरः। 'इन्दिन्दिरो मधुकरश्चञ्चरीको मधुव्रतः' इति वैजयन्ती।

अलङ्कारः—लुप्तोपमा, उत्प्रेक्षा, रूपकमनुप्रासः।

(८) 'अयि कन्यके! मा भैषीः, पुत्रि! त्वां मातुः समीपे प्रापयिष्यामः, दुहितः! खेदं मा वह, भगवति! भुङ्क्ष्व किञ्चित्, पिब पयः, एते तव भ्रातरः यत् कथयिष्यसि तदेव करिष्यामः, मा स्म रोदनैः प्राणान् संशयपदवीमारोपयः, मा स्म कोमलमिदं शरीरं शोकज्वालावलीढं कार्षीः' इति सहस्रधा बोधनेन कथमपि सम्बुद्धा किञ्चिद् दुग्धं पीतवती। ततश्च मया क्रोडे उपवेश्य, 'बालिके! कथय क्व ते पितरौ? कथमेतस्मिन्नाश्रमप्रान्ते समायाता? किं ते कष्टम्? कथमरोदीः? किं वाञ्छसि? किं कुर्मः?' इति पृष्टा मुग्धतया अपरिकलितवाक्पाटवा, भयेन विशिथिलवचनविन्यासा, लज्जया अतिमन्दस्वरा, शोकेन रुद्धकण्ठा, चकितचकितेव कथं कथमपि अबोधयदस्मान्।

उत्तरम्—सन्दर्भः—श्रीमदम्बिकादत्तव्यासविरचितशिवराजविजयस्य प्रथमनिश्वासात् गृहीतोऽयमंशः। अत्र कविनिबद्धवक्ता ब्रह्मचारिगुरुः योगिराजसमक्षं वदति यवनत्रस्तबालिकावृत्तम्।

व्याख्या—अथ = बालिकाविलोकनोत्तरम्, कन्यके ! = बाले ! मा भैषीः = मा शोचीः, पुत्रि ! = तनये ! त्वाम् = भवतीम्, मातुः = जनन्याः, समीपे = निकटे, प्रापयिष्यामः = प्रेषयिष्यामः, दुहितः ! = बाले ! खेदम् = कष्टम्, मा = नहि, वह = धारय, भगवति ! = ऐश्वर्यशालिनि ! भुङ्क्ष्व = भक्षय, किञ्चित् = अशनजातम्, पिब = पानं कुरु, पयः = दुग्धम्, एते = पुरो वर्तमानाः, तव = भवत्याः, भ्रातरः = बान्धवाः, यत्, कथयिष्यसि = वक्ष्यसि, तदेव करिष्यामः = वयं सम्पादयिष्यामः, मा स्म, रोदनैः = क्रन्दनैः, प्राणान् = असून्, संशयपदवीम् = सन्देहस्थानम्, आरोपयः = समारोपयः, मा स्म, कार्षीः = अकरोः, कोमलम् = मृदु, इदम् = मत्सम्मुखस्थम्, शरीरम् = देहम्, शोकज्वालावलीढम् = दुःखाग्निपरिव्याप्तम्, इति = इत्थं प्रकारेण, सहस्रधा = बहुधा, बोधनेन = सान्त्वनाप्रदानेन, कथमपि = यथाकथञ्चित्, सम्बुद्धा = बोधनेनाधरीकृतवेदना, किञ्चित् = स्वल्पम्, दुग्धम् = पयः, पीतवती = स्वीचकार । ततश्च = दुग्धग्रहणानन्तरम्, मया = ब्रह्मचारिगुरुणा, क्रोडे = अङ्के, उपवेश्य = संस्थाप्य, बालिके ! = कन्यके ! कथय = वद, क्व = कुत्र, ते = भवत्याः, पितरौ = माता च पिता च, कथम् = केन प्रकारेण, एतस्मिन् = अस्मिन्, आश्रमप्रान्ते = कुटीरसमीपे, समायाता = सम्प्राप्ता, किं ते = तव, कष्टम् = दुःखम् ? कथम् (त्वम्) अरोदीः = रोदनमकरोः ? किं वाञ्छसि ? = इच्छसि ? किं कुर्मः ? = विधास्यामः ? इति, पृष्टा = जिज्ञासिता, मुग्धतया = अज्ञतया, अपरिकलितवाक्पाटवा = अज्ञातभाषणचातुर्या, भयेन = भिया, विशिथिलवचनविन्यासा = अस्तव्यस्तभाषणा, लज्जया = त्रपया, अतिमन्दस्वरा = बहुकोमलस्वरा, शोकेन = करुणया, रुद्धकण्ठा = स्तम्भितगलबिला, चकितचकितेव = बहुभीतेव, कथं कथमपि = येन केनापि प्रकारेण, अबोधयत् = असूसुचत्, अस्मान् = आश्रमस्थान् ।

समासः—संशयस्य पदवीं संशयपदवीम् । शोकस्य ज्वालया अवलीढं शोकज्वालावलीढम् । आश्रमस्य प्रान्ते आश्रमप्रान्ते । अपरिकलितं वाक्पाटवं यया सा अपरिकलितवाक्पाटवा । विशिथिलः वचनानां विन्यासः यस्याः सा विशिथिलवचनविन्यासाः । अतिमन्दः स्वरो यस्याः सा अतिमन्दस्वरा । रुद्धः कण्ठो यस्याः सा रुद्धकण्ठा ।

विशेषः—1. मा भैषीः इत्यत्र 'न माङ्योगे' इति अडागमनिषेधः । आरोपयः इत्यत्र 'स्मोत्तरे लङ् च' इति लङ् ।

२. 'पुंसि भूम्न्यसवः प्राणाः' इति अमरसिंहः ।

(९) तदाकर्ण्य कोपज्वालाज्वलित इव योगी प्रोवाच— विक्रमराज्येऽपि कथमेष पातकमयो दुराचाराणामुपद्रवः ?'

ततः स उवाच—

'महात्मन् ! क्वाधुना विक्रमराज्यम् ? वीरविक्रमस्य तु भारतभुवं विरहय्य गतस्य वर्षाणां सप्तदश-शतकानि व्यतीतानि । क्वाधुना मन्दिरे मन्दिरे जयजय-ध्वनिः ? क्व सम्प्रति तीर्थे तीर्थे घण्टानादः ? क्वाद्यापि मठे मठे वेदघोषः ? अद्य हि वेदा विच्छिद्य वीथीषु विक्षिप्यन्ते, धर्मशास्त्राण्युद्धूय धूमध्वजेषु ध्मायन्ते, पुराणानि पिष्ट्वा पानीयेषु पात्यन्ते, भाष्याणि भ्रंशयित्वा भ्राष्ट्रेषु भर्ज्यन्ते; 'क्वचिन्मन्दिराणि भिद्यन्ते, क्वचित् तुलसीवनानि छिद्यन्ते, क्वचिद् दारा अप-ह्रियन्ते, क्वचिद् धनानि लुण्ठ्यन्ते, क्वचिदार्त्तनादाः, क्वचिद् रुधिरधाराः, क्वचिदग्निदाहः, क्वचिद् गृहनिपातः' इत्येव श्रूयतेऽवलोक्यते च परितः ।

सन्दर्भः—श्रीमदम्बिकादत्तव्यासविरचितशिवराजविजयस्य प्रथमनिश्वासात् गृहीतोऽयमंशः । अत्र ब्रह्मचारिगुरुयोगिराजयोर्वार्तालापं प्रस्तौति कविः सामयिकोपद्रवमाश्रित्य ।

व्याख्या—तत् = ब्रह्मचारिगुरुकथनम्, आकर्ण्य = श्रुत्वा, कोपज्वाला-ज्वलितः = क्रोधाग्निज्वलितः, इव = यथा, योगी = महात्मा, योगसाधकः, प्रोवाच = उक्तवान्—विक्रमराज्येऽपि = विक्रमादित्यशासनेऽपि, कथमेषः = किमीदृग्विधः, पातकमयः = पापबहुलः, दुराचाराणामुपद्रवः = कुत्सिताचाराणां विघ्नः ?

ततः = श्रुत्वैतत्, सः = ब्रह्मचारिगुरुः, उवाच = अकथयत्, महात्मन् ! = योगिन् ! क्वाधुना = कुत्र सम्प्रति, विक्रमराज्यम् = विक्रमादित्यनृपतेः शासन-कालः ? वीरविक्रमस्य = बलीविक्रमादित्यस्य तु, भारतभुवम् = हिन्दुस्थान-भूमिम्, विरहय्य = त्यक्त्वा, गतस्य = स्वर्गं प्रयातस्य, वर्षाणाम् = शरदाम्, सप्तदशशतकानि = सप्तदशशतवर्षाणि, व्यतीतानि = अतिक्रान्तानि, क्वाधुना = कुत्र च सम्प्रति, मन्दिरे मन्दिरे = प्रतिमन्दिरम्, जयजयध्वनिः = जयघोषः, क्व = कुत्र, सम्प्रति = अधुना, तीर्थे तीर्थे = प्रतितीर्थम्, घण्टानादः = वाद्यमान-घण्टाध्वनिः; क्व = कुत्र, अद्यापि = अधुनापि, मठे मठे = प्रतिछात्रालयम्, वेदघोषः = श्रुतिपाठशब्दः, अद्य हि = सम्प्रति तु, वेदाः = श्रुतयः, विच्छिद्य = विपाट्य, वीथीषु = प्रतोलीषु, विक्षिप्यन्ते = प्रक्षिप्यन्ते, धर्मशास्त्राणि = मन्वादि-प्रणीतस्मृतिसाहित्यानि, उद्धूय = उत्तोल्य, धूमध्वजेषु = वह्निषु, ध्मायन्ते =

अग्निसात्क्रियन्ते, पुराणानि = भगवान् वेदव्यासविरचितानि अग्निवायुशिवादीनि; पिष्ट्वा = चूर्णीकृत्य, पानीयेषु = जलप्रवाहेषु, पात्यन्ते = प्रक्षिप्यन्ते, भाष्याणि = सूत्रव्याख्यानानि, भ्रंशयित्वा = दूषयित्वा, भ्राष्ट्रेषु = भर्जनपात्रेषु, भर्ज्यन्ते = अग्निना दह्यन्ते, क्वचित् = कुत्रचित्, मन्दिराणि = देवगृहाः, भिद्यन्ते = धूलिसात्क्रियन्ते, क्वचित् = कुत्रचित्, तुलसीवनानि = वृन्दाविपिनानि, छिद्यन्ते = उत्पाद्यन्ते, क्वचित्=कुत्रचित्, दाराः = नार्यः, अपह्रियन्ते = चोर्यन्ते, क्वचित् = कुत्रचित्, धनानि = धान्यानि द्रव्याणि, लुण्ठ्यन्ते = लुण्ठकैर्गृह्यन्ते, क्वचित् = कुत्रचित्, आर्तनादाः = कातरशब्दाः, क्वचित् = कुत्रचित्, रुधिरधाराः = रक्तप्रवाहाः, क्वचित् = कुत्रचित्, अग्निदाहः = भस्मीकरणम्, क्वचित् = कुत्रचित्, गृहनिपातः = गेहविनाशः, इत्येव, श्रूयते = आकर्ण्यते, अवलोक्यते = दृश्यते च, परितः = सर्वतः ।

समासः—विक्रमस्य राज्यं विक्रमराज्यम् । भारतस्य भुवं भारतभुवम् । घण्टाया नादः घण्टानादः । कोपस्य ज्वालया ज्वलितः कोपज्वालाज्वलितः । धूम एव ध्वजो येषां, तेषु धूमध्वजेषु । तुलस्याः वनानि तुलसीवनानि । आर्तानां नादाः आर्तनादाः । रुधिरस्य धाराः रुधिरधाराः । अग्निना दाहः अग्निदाहः । गृहाणां गृहस्य वा निपातः गृहनिपातः ।

विशेषः—१. 'मठश्छात्रादिनिलयः', 'क्लीबेऽम्बरीषं भ्राष्ट्रो ना' इत्यमरः । २. 'दारजारौ कर्तरि णिलुक् च' इति घञ् । ३. दण्डिमते समतानाम गुणः प्रसादस्तु सर्वसम्मतः । ४. वैदर्भी रीतिः । ५. यवनदुराचारवर्णनं नायकोत्कर्षसाधनाय ।

(१०) ततः सर्वेषु स्तब्धेषु चकितेषु च ब्रह्मचारिगुरुणा प्रणम्य कथितम्—'भगवन् ! बद्ध-सिद्धासनैर्निरुद्ध-निःश्वासैः प्रबोधितकुण्डलिनीकैर्विजित-दशेन्द्रियैरनाहत-नाद-तन्तुमवलम्ब्याऽऽज्ञाचक्रं संस्पृश्य, चन्द्रमण्डलं भित्त्वा, तेजःपुञ्जमविगणय्य, सहस्रदलकमलस्यान्तःप्रविश्य, परमात्मानं साक्षात्कृत्य, तत्रैव रममाणैर्मृत्युञ्जयैरानन्दमात्रस्वरूपैर्ध्यानावस्थितैर्भवादृशैर्न ज्ञायते कालवेगः । तस्मिन् समये भवता ये पुरुषा अवलोकिताः तेषां पञ्चाशत्तमोऽपि पुरुषो नावलोक्यते । अद्य न तानि स्रोतांसि नदीनाम्, न सा संस्था नगराणाम्, न सा आकृतिर्गिरीणाम्, न सा सान्द्रता विपिनानाम् । किमधिकं कथयामो भारतवर्षमधुना अन्यादृशमेव सम्पन्नमस्ति' ।

सन्दर्भः—ब्रह्मचारिगुरुः बोधयत्यत्र योगिराजं देशकालादिपरिवर्तनं श्रीमदम्बिकादत्तविरचितस्य शिवराजविजयस्य प्रथमनिश्वासे ।

व्याख्या—ततः = योगिराजवचनानन्तरम्, सर्वेषु = समुपस्थितेषु, स्तब्धेषु = शान्तिमाकलयत्सु, चकितेषु च = आश्चर्यकलितेषु च, ब्रह्मचारिगुरुणा = गौरश्यामवटुशिक्षकेन, प्रणम्य = सप्रश्रयं नत्वा, कथितम् = भणितम्—

भगवन् ! = ऐश्वर्यसम्पन्न ! बद्धसिद्धासनैः = कमलासनस्थैः, निरुद्धनिःश्वासैः = प्राणायामेनावरुद्धश्वसनक्रियाकलापैः, प्रबोधितकुण्डलिनीकैः = उद्द्योतित-पराशक्त्यभिधेयनाडीरूपप्रधानव्यक्तिस्थानकैः, विजितदशेन्द्रियैः = वशीकृतदशे-न्द्रियैः, अनाहतनादतन्तुम् = सुषुम्णामध्यस्थतुरीयपद्मोत्थशब्दम्, अवलम्ब्य = समाश्रित्य, आज्ञाचक्रम् = भ्रूमध्यस्थद्विदलात्मकचक्रम्, संस्पृश्य = सम्यक् स्पृष्ट्वा, चन्द्रमण्डलम् = शशिबिम्बम्, भित्त्वा = द्विदलात्मकचक्रपरवर्तिषोडश-दलात्मकचक्रं विभिद्य, तेजःपुञ्जम् = सोमचक्रवर्तिमहाप्रकाशम्, अविगणय्य = तिरस्कृत्य, सहस्रदलकमलस्यान्त प्रविश्य = ब्रह्मरन्ध्रवर्तिसहस्रारचक्रस्याभ्यन्तरं प्रविश्य, परमात्मानम् = परं ब्रह्म, साक्षात्कृत्य = दृष्ट्वा, तत्रैव = परब्रह्मणि, रममाणैः = विहरणशीलैः, मृत्युञ्जयैः = कालजयैः, आनन्दमात्रस्वरूपैः = चिन्मयस्वरूपैः, ध्यानावस्थितैः = नीरन्ध्रितबुद्धिधारध्याननिरतैः, भवादृशैः = योगिवर्यसदृशैः, न = नहि, ज्ञायते = अवगम्यते, कालवेगः = समयगतिशीलता । तस्मिन् = योगासनग्रहणे, समये = काले, भवता = श्रीमता, ये पुरुषाः = जनाः, अवलोकिताः; तेषाम् = अवलोकितानां जनानाम्, पञ्चाशत्तमोऽपि = पञ्चाशत्-सङ्ख्यापूरकोऽपि, पुरुषः = नरः, नावलोक्यते=नाक्षिपथमायाति, अद्य=सम्प्रति, न = नहि, तानि = श्रीमता दृष्टानि, स्रोतांसि=नदीप्रवाहाः, न = नहि, सा = भवदक्षिगोचरा, संस्था = स्थितिः, नगराणां = पुराणाम्, न सा = पूर्वपरिचिता, आकृतिः = आकारप्राकारसीमा, गिरीणाम् = पर्वतानाम्, न = नहि, सा = पुरावलोकिता, सान्द्रता = गहनता, विपिनानाम् = जङ्गलानाम्, किमधिकम् = कथमधिकम्, कथयामः = वर्णयामः, भारतवर्षम् = हिन्दुस्थानम्, अधुना = सम्प्रति, अन्यादृशमेव = पूर्वभिन्नमेव, सम्पन्नमस्ति = जातमस्ति ।

समासः—बद्धं सिद्धासनं यैस्तैः बद्धसिद्धासनैः । निरुद्धा निःश्वासा यैस्तैः निरुद्धनिःश्वासैः । प्रबोधिता कुण्डलिनी यैस्तैः प्रबोधितकुण्डलिनीकैः । विजि-तानि दशेन्द्रियाणि यैस्तैः विजितदशेन्द्रियैः । अनाहतश्चासौ नादश्च अनाहतनादः,

तस्य तन्तुम् अनाहतनादतन्तुम् । सहस्रदलं यत् कमलं, तस्य सहस्रदलकमलस्य । आनन्दमात्रमेव स्वरूपं येषां, तैः आनन्दमात्रस्वरूपैः ।

विशेषः—दशेन्द्रियाणि —वाक्-पाणि-पाद-पायूपस्थानि पञ्चकर्मेन्द्रियाणि, चक्षुः-श्रोत्र-घ्राण-रसना-त्वगाख्यानि पञ्चज्ञानेन्द्रियाणि । न चात्राप्रतीतत्वदोप-दुष्टत्वं वक्तुः श्रोतुश्च योगज्ञानसम्पन्नत्वात् ।

(११) इदमाकर्ण्य किञ्चित् स्मित्वेव परितोऽवलोक्य च योगी जगाद— 'सत्यं न लक्षितो मया समय-वेगः । यौधिष्ठिरे समये कलितसमाधिरहं वैक्रम-समये उदस्थ म् । पुनश्च वैक्रम-समये समाधिमाकलय्य अस्मिन् दुराचारमये समयेऽहमुत्थितोऽस्मि । अहं पुनर्गत्वा समाधिमेव कलयिष्यामि, किन्तु तावत् सङ्क्षिप्य कथ्यतां का दशा भारतवर्षस्ये'ति ।

उत्तरम्—सन्दर्भः—श्रीमदम्बिकादत्तव्यासः स्वीयशिवराजविजयस्य प्रथम-निश्वासे योगिराजो ब्रह्मचारिगुरुणा भारतवर्षदशां ज्ञातुमिच्छति इति वर्णयन्नाह—

व्याख्या —इदम् = ब्रह्मचारिगुरुकथनम्, आकर्ण्य = श्रुत्वा, किञ्चित् = स्तोकम्, स्मित्वेव = विहस्य इव, परितो विलोक्य = सर्वतः दृष्ट्वा च, योगी = योगसाधको महात्मा, जगाद = उवाच, सत्यम् = अवितथम्, न = नहि, लक्षितः = ज्ञातः, मया = समाधिस्थेन योगिना, समयवेगः = कालप्रवाहः, यौधिष्ठिरे = युधिष्ठिरसम्बद्धे, समये = काले, कलितसमाधिरहम् = गृहीतसमाधि-रहम्, वैक्रमसमये = विक्रमादित्यसमये, उदस्थाम्=समाधिविरतोऽभूवम्, पुनश्च, वैक्रमसमये = विक्रमादित्यशासनकाले, समाधिम् = योगक्रियाविशेषम्, आकलय्य = स्वीकृत्य, अस्मिन् = शिवश्रीरोदयकाले, दुराचारमये = कदाचारबहुले, समये = काले, अहम् = योगिराड्, उत्थितोऽस्मि = समाधिविरतोऽस्मि, पुनर्गत्वा = पुनर्व्रजित्वा, समाधिमेव = योगक्रियाविशेषमेव, कलयिष्यामि = धारयिष्यामि, किन्तु = परन्तु, तावत् = यावदत्र स्थितोऽस्मि, सङ्क्षिप्य = सङ्क्षेपेण, कथ्यताम् = उच्यताम्, का = कीदृशी, दशा = अवस्था, भारतवर्षस्येति = हिन्दुस्थान-स्येति ।

समासः—विक्रमस्यायं वैक्रमः, तस्मिन् समये विक्रमसमये । युधिष्ठिरस्यायं समयः यौधिष्ठिरः, तस्मिन् यौधिष्ठिरे । दुराचारात् आगतं दुराचारमयम्, तस्मिन् दुराचारमये ।

व्याकरणम्—गम् + क्त्वा=गत्वा । सम् + क्षिप् + क्त्वा + ल्यप्=संक्षिप्य ।

(१२) उपक्रममुमाकर्ण्य अवलोक्य च मुनेर्विमनायमानं हरिद्राद्रवक्षालितमिव वदनम्, निपतद्वारिबिन्दुनी नयने, अञ्चितरोमकञ्चुकं शरीरम्, कम्पमानमधरम्, भज्यमानं च स्वरम्, अवागच्छत् 'सकलानर्थमयः, सकल-वञ्चनामयः, सकलपापमयः, सकलोपद्रवमयश्चायं वृत्तान्तः' इति, 'अत एव तत्स्मरणमात्रेणापि खिद्यत एष हृदये, तन्नाहमेनं निरर्थं जिग्लापयिषामि, न वा चिखेदयिषामि'।

सन्दर्भः—श्रीमदम्बिकादत्तव्यासः शिवराजविजयस्य प्रथमनिश्वासेऽत्र योगिराजस्य मानसिकस्थितिं चित्रयति।

व्याख्या—उपक्रमम् = उपोद्घातम्, अमुम् = पूर्ववर्णितम्, आकर्ण्य = श्रुत्वा, अवलोक्य = दृष्ट्वा च, मुनेः = ब्रह्मचारिगुरोः, विमनायमानम् = उन्मनायमानम्, हरिद्राद्रवक्षालितमिव = महारजनरसधौतमिव, वदनम् = मुखम्, निपतद्वारिबिन्दुनी = स्खलदश्रुकलिके, नयने = नेत्रे, अञ्चितरोमकञ्चुकम् = कण्टकितम्, शरीरम् = देहम्, कम्पमानम् = वेपमानम्, अधरम् = अधरोष्ठम्, भज्यमानम् = त्रुटयमानञ्च, स्वरम् = शब्दम्, अवागच्छत् = अजानात्, सकलानर्थमयः = सम्पूर्णदुराचारपूर्णः, सकलवञ्चनामयः = सर्वप्रवञ्चनपूर्णः, सकलपापमयः = सर्ववृजिनमयः, सकलोपद्रवमयः = सम्पूर्णोपसर्गबहुलः च, अयम् = प्रस्तुतः, वृत्तान्तः = कथानकः, इति। अत एव = यतो हि, तत्स्मरणमात्रेणापि = तत्पातकस्मृतिविषयत्वेनापि, खिद्यते = दूयते, एषः = ब्रह्मचारिगुरुः, हृदये = मानसे, तन्नाहमेनम् = तन्महाभागमेनमहम्, निरर्थम् = निष्प्रयोजनम्, जिग्लापयिष्यामि = ग्लापयितुमिच्छामि, न वा, चिखेदयिष्यामि = खेदयितुमिच्छामि, इति।

समासः—हरिद्रायाः द्रवेन क्षालितं हरिद्राद्रवक्षालितम्। निपतन्तः वारिणां बिन्दवः याभ्यां ते निपतद्वारिबिन्दुनी। अञ्चितं रोम एव कञ्चुकं यत्र तत् अञ्चितरोमकञ्चुकम्।

विशेषः—उत्प्रेक्षालङ्कारः। मुनिमानसिकताव्यञ्जकवर्णनम्।

(१३) अथ स मुनिः—'भगवन्! धैर्येण, प्रसादेन, प्रतापेन, तेजसा, वीर्येण, विक्रमेण, शान्त्या, श्रिया, सौख्येन, धर्मेण, विद्यया च सममेव परलोकं सनाथितवति तत्रभवति वीरविक्रमादित्ये, शनैः शनैः पारस्परिक-विरोध-विशिथिलीकृत-स्नेहबन्धनेषु राजसु, भामिनी-भ्रूभङ्ग-भूरिभाव-प्रभाव-पराभूत-वैभवेषु भटेषु, स्वार्थ-चिन्ता-सन्तान-वितानैकतानेष्वमात्यवर्गेषु, प्रशंसामात्रप्रियेषु प्रभुषु, 'इन्द्र-

स्त्वं वरुणस्त्वं कुबेरस्त्वम्' इति वर्णनामात्रसक्तेषु बुधजनेषु कश्चन गजिनी-स्थान-निवासी महामदो यवनः ससेनः प्राविशद् भारते वर्षे। स च प्रजाः विलुण्ठ्य, मन्दिराणि निपात्य, प्रतिमा विभिद्य, परश्शतान् जनांश्च दासीकृत्य, शतश उष्ट्रेषु रत्नान्यारोप्य स्वदेशमनैषीत्।

सन्दर्भः--ब्रह्मचारिगुरुरत्र कथयति योगिराजं यवनराज्यवृत्तान्तं शिवराज-विजयस्य श्रीमदम्बिकादत्तव्यासकीर्तिध्वजस्य प्रथमनिश्वासे।

व्याख्या--अथ=योगिराजवचनश्रवणानन्तरम्, सः=ब्रह्मचारिगुरुः, मुनिः =महर्षिः, भगवन्!=योगिराड्! धैर्येण=धीरतया, प्रसादेन=प्रसन्नतया, प्रतापेन=तेजसा, तेजसा=कान्त्या, वीर्येण=बलेन, विक्रमेण=ओजसा, शान्त्या=शमेन, श्रिया=लक्ष्म्या, सौख्येन=मैत्र्या, धर्मेण=श्रुतिप्रतिपाद्येन कर्मणा, विद्यया=ज्ञानेन च, सममेव=साकमेव, परलोकम्=स्वर्लोकम्, सनाथितवति=याते, तत्रभवति=पूज्ये, वीरविक्रमादित्ये=एतन्नामकोज्जयिनी-शासके, शनैः शनैः=मन्दं मन्दम्, पारस्परिकविरोधविशिथिलीकृतस्नेहबन्धनेषु =अन्योऽन्यविरोधशिथिलीकृतप्रेमसम्बन्धेषु, राजसु=नृपेषु, भामिनीभ्रूभङ्ग-भूरिभावप्रभावपराभूतवैभवेषु = कामिनीभ्रूविलासबहुभावप्रभावजितविभवेषु, भटेषु=वीरेषु, स्वार्थचिन्तासन्तानवितानैकतानेषु=क्षुद्रस्वार्थचिन्तामात्रपरा-यणेषु, अमात्यवर्गेषु=मन्त्रिसमुदयेषु, प्रशंसामात्रप्रियेषु=स्वकीर्तिश्रवणरसिकेषु, प्रभुषु=शासकेषु, इन्द्रस्त्वम्=पाकशासनस्त्वम्, वरुणस्त्वम्=अम्भसां पति-स्त्वम्, कुबेरस्त्वम्=धनदस्त्वम्, इति, वर्णनमात्रसक्तेषु=प्रशंसनमात्रलीनेषु, बुधजनेषु=विद्वत्सु, कश्चन=कोऽपि, गजिनीस्थाननिवासी=गजनी इति लोक-प्रसिद्धस्थाननिवासी, महामदः=महमूद इति लोकप्रसिद्धनामा, यवनः= तुरुष्कः, ससेनः=सबलः, प्राविशत्=अविशत्, भारते वर्षे=हिन्दुस्थाने। सः =महमूदगजनी इति विश्रुतः च, प्रजाः=जनताः, विलुण्ठ्य=लुण्ठयित्वा; मन्दिराणि=देवायतनानि, निपात्य=समुच्छिद्य, प्रतिमाः=मूर्तीः, विभिद्य= भेदयित्वा, परश्शतान्=शताधिकान्, जनांश्च=नरांश्च, दासीकृत्य=दासं विधाय, शतशः=शतसङ्ख्यकेषु, उष्ट्रेषु=क्रमेलकेषु, रत्नानि=धनानि, आरोप्य=समारोप्य, स्वदेशम्=निजशासनभुवम्, अनैषीत्=नीतवान्।

समासः—पारस्परिकेण विरोधेन विशिथिलीकृतानि स्नेहबन्धनानि यैस्तेषु पारस्परिकविरोधविशिथिलीकृतस्नेहबन्धनेषु। भामिनीनां भ्रूभङ्गेषु भूरिभावानां प्रभावेण पराभूतानि वैभवानि येषां, तेषु भामिनीभ्रूभङ्गभूरिभावप्रभावपराभूत-

वैभवेषु। स्वार्थस्य चिन्ता स्वार्थचिन्ता, तस्याः सन्तानः, तस्य वितानं ये एकतानास्ते स्वार्थचिन्तावितानैकतानास्तेषु स्वार्थचिन्तासन्तानवितानैकतानेषु। सेनया सहितः ससेनः।

विशेषः—सहोक्तिरलङ्कारः। सौकुमार्यं नाम गुणः। 'तत्र च भावेन' इति सप्तमी।

(१४) 'एवं स ज्ञातास्वादः पौनःपुन्येन द्वादशवारमागत्य भारतमलुलुण्ठत्। तस्मिन्नेव च स्वसंरम्भे एकदा गुर्जरदेश-चूडायितं सोमनाथतीर्थमपि धूलीचकार। अद्य तु तत्तीर्थस्य नामापि केनापि न स्मर्यते, परं तत्समये तु लोकोत्तरं तस्य वैभवमासीत्। तत्र हि महार्ह-वैदूर्य-पद्मराग-माणिक्य-मुक्ताफलादि-जटितानि कपाटानि स्तम्भान्, गृहावग्रहणीः, भित्तीः, वलभीः विटङ्कानि च निर्मथ्य, रत्ननिचयमादाय, शतद्वय-मणसुवर्ण-शृङ्खलावलम्बिनीं चञ्चच्चाकचक्य-चकितीकृतावलोचक-लोचन-निचयां महाघण्टां प्रसह्य सङ्गृह्य, महादेवमूर्तावपि गदामुदतूतुलत्।

उत्तरम्—सन्दर्भः—श्रीमदम्बिकादत्तव्यासविरचितशिवराजविजयस्य प्रथमनिश्वासात् गृहीतोऽयमंशः। गजनीकृतं भारतविजयं वर्णयति कविरत्र।

व्याख्या—एवम् = पूर्वोक्तप्रकारेण, सः=महमूदगजनीनामा आक्रान्ता, ज्ञातास्वादः = भारतदशापरिचितः, पौनःपुन्येन = वारं वारम्, द्वादशवारम्, आगत्य = आव्रज्य, भारतम् = हिन्दुस्थानम्, अलुलुण्ठत् = लुण्ठयतिस्म। तस्मिन्नेव = लुण्ठनविषयके एव, स्वसंरम्भे = निजोद्योगे, एकदा = एकवारम्, गुर्जरदेशचूडायितम् = गुर्जरप्रदेशभूषणभूतम्, सोमनाथतीर्थमपि = सोमनाथेश्वरविग्रहमपि, धूलीचकार = नाशितवान्। अद्य = सम्प्रति तु, तत्तीर्थस्य = तत् पुण्यस्थानस्य नामापि = अभिधानमपि, केनापि = केनापि नागरिकेन, न = नहि, स्मर्यते = स्मृतिपथेमानीयते, परम् = किन्तु, तत्समये = विग्रहविनाशपूर्वसमये, लोकोत्तरम् = सर्वलोकश्रेष्ठम्, तस्य = सोमनाथविग्रहस्य, वैभवम् = माहात्म्यम्, आसीत् = अवर्तत्। तत्र = सोमनाथदेवायतने, महार्हवैदूर्यपद्मरागमाणिक्यमुक्ताफलादिजटितानि = बहुमूल्यवैदूर्यलोहितकमणिमौक्तिकादिजटितानि, कपाटानि = अरराणि, स्तम्भान् = स्थूणाः, गृहावग्रहणीः = गेहदेहलीः, भित्तीः = कुड्यानि, वलभीः = गोपानसीः, विटङ्कानि = कपोतपालिकाः च, निर्मथ्य = मथित्वा, रत्ननिचयमादाय = माणिक्यसमुदयमादाय, शतद्वयमणसुवर्णशृङ्खलावलम्बिनीम् = द्विशतमणहेमशृङ्खलावलम्बिनीम्, चञ्चच्चाकचक्यचकितीकृतावलोचकलोचन-

निचयाम् = समुच्छलच्चाकचक्यविस्मेरीकृतद्रष्टुजननयनाम्, महाघण्टाम् = बृहदाकारघटिकाम्, प्रसह्य = बलात्, सङ्गृह्य = सङ्कल्य्य, महादेवमूर्तावपि = शिवविग्रहेऽपि, गदामुदतूतुलत् = उदतिष्ठिपत् ।

समासः---ज्ञातः आस्वादः येन सः ज्ञातास्वादः । गुर्जरदेशस्य चूडायितं गुर्जरदेशचूडायितम् । वैदूर्यं पद्मरागं माणिक्यं मुक्ताफलं च वैदूर्यपद्मरागमाणिक्यमुक्ताफलानि, महार्हाणि च वैदूर्यपद्मरागमाणिक्यमुक्ताफलानि च महार्हवैदूर्यपद्मरागमाणिक्यमुक्ताफलानि, तानि आदौ येषां तानि, तैः जटितानि महार्हवैदूर्यमाणिक्यमुक्ताफलादिजटितानि । गृहस्य अवग्रहणीः गृहावग्रहणीः । रत्नानां निचयं रत्ननिचयम् । शतद्वयमणसुवर्णस्य शृङ्खलायाम् अवलम्बिनीं शतद्वयमणसुवर्णशृङ्खलावलम्बिनीम् । चञ्चला चाकचक्येन चकितीकृतः अवलोचकलोचनानां निचयः यया, तां चञ्चच्चाकचक्यचकितीकृतावलोचकलोचननिचयाम् । महादेवस्य मूर्तावपि महादेवमूर्तावपि ।

विशेषः---'गोपानसी तु वलभी' इत्यमरः । ऐतिहासिकवर्णनम् ।

(१५) अथ 'वीर ! गृहीतमखिलं वित्तम्, पराजिता आर्य्यसेनाः, वन्दीकृता वयम्, सञ्चितममलं यशः, इतोऽपि न शाम्यति ते क्रोधश्चेदस्मांस्ताडय, मारय, छिन्धि, भिन्धि, पातय, मज्जय, खण्डय, कर्तय, ज्वलय, किन्तु त्यजेमामकिञ्चित्करीं जडां महादेव-प्रतिमाम् । यद्येवं न स्वीकरोषि तद् गृहाणास्मत्तोऽन्यदपि सुवर्णकोटिद्वयम्, त्रायस्व, मैनां भगवन्मूर्ति स्प्राक्षीः' इति साम्रेडं कथयत्सु रुदत्सु पतत्सु विलुण्ठत्सु प्रणमत्सु च पूजकवर्गेषु, 'नाहं मूर्तीर्विक्रीणामि, किन्तु भिनद्मि' इति सङ्गर्ज्य जनताया हाहाकार-कलकलमाकर्णयन् घोरगदया मूर्तिमतुत्रुटत् । गदापातसमकालमेव चानेकार्बुदपद्ममुद्रामूल्यानि रत्नानि मूर्तिमध्यादुच्छलितानि परितोऽवाकीर्यन्त । स च दग्धमुखः तानि रत्नानि मूर्तिखण्डानि च क्रमेलकपृष्ठेष्वारोप्य सिन्धुनदमुत्तीर्य स्वकीयां विजयध्वजिनीं गजिनीं नाम राजधानीं प्राविशत्

सन्दर्भः---श्रीमदम्बिकादत्तव्यासविरचितशिवराजविजयस्य प्रथमनिश्वासात् गृहीतोऽयमंशः । ब्रह्मचारिगुरुरत्र महादेवमूर्तिखण्डनं वर्णयति योगिराजम् ।

व्याख्या---अथ = सोमनाथविग्रहोपरि गदातोलनानन्तरम्, वीर ! = भारतविजयदुर्मदः ! गृहीतम् = स्वायत्तीकृतम्, अखिलम् = सम्पूर्णम्, वित्तम्, पराजिताः = पराजयं प्राप्ताः, आर्यसेनाः = आर्यावर्तबलम्, वन्दीकृताः = निगडिताः, वयम्

=सोमनाथपूजकाः, सञ्चितम् = सङ्कलितम्, अमलम्=निर्मलम्, यशः = कीर्तिः, इतोऽपि = एतावत्सौभाग्यलाभादपि, न = नहि, शाम्यति = शान्तिमायाति, ते = भवतः, क्रोधः = कोपः, चेत्, अस्मान् = मन्दिरपूजकान्, ताडय = पेठ, मारय = प्राणनाशं कुरु, छिन्धि = वृश्च, भिन्धि = छिन्धि, पातय = भ्रंशस्व (पर्वतशिखरादिति शेषः), मज्जय = अवगाहय (समुद्रतले इति शेषः), खण्डय = खण्डितं कुरु (शरीरमिति भावः), कर्तय = द्विधां कुरु (देहमिति भावः), ज्वलय = दाहय (शरीरमिति भावः), किन्तु = परन्तु, त्यज = मुञ्च, इमाम् = सम्मुखस्थाम्, अकिञ्चित्करीम् = न किञ्चिदपि क्रियाशीलाम् (गजनीबोधमादाय तत्प्रीतये वा न च वस्तुगत्येति वक्तुराशयः), जडाम् = चेतनारहिताम्, महादेवप्रतिमाम् = शिवविग्रहस्वरूपाम् । यद्येवं = यदीत्थम्, न = नहि, स्वीकरोषि = मानयसि, अनुकम्पसे वा, तत् = तु, गृहाण = स्वीकुरु, अस्मत्तः = पूजकनिचयात्, अन्यदपि = प्रासधनाद् भिन्नमपि, सुवर्णकोटिद्वयम् = हेमकोटिद्वितयम् । त्रायस्व = रक्षस्व, मा एनाम् = समीपस्थाम्, भगवन्मूर्तिम् = शिवलिङ्गम्, स्प्राक्षीः = स्पृक्ष, इति = इत्यादिकम्, साम्रेडम् = सप्रश्रयं वारं वारम्, कथयत्सु = वदत्सु, रुदत्सु = रोदननिरतेषु, पतत्सु = भूपृष्ठे निपतत्सु, विलुण्ठत्सु = अवलुण्ठत्सु, प्रणमत्सु = प्रणामनिरतेषु च, पूजकवर्गेषु = शिवसेवकसमुदयेषु, न अहं = गजनीनामा, मूर्तीः = प्रतिमाः, विक्रीणामि = विक्रयं करोमि, किन्तु = परन्तु, भिनद्मि = त्रोटयामि, इति = इत्थम्, सङ्गर्ज्य = गर्जयित्वा, जनतायाः = प्रजायाः, हाहाकारकलकलम् = हा-हा-इत्याकारकशब्दध्वनिम्, आकर्णयन् = शृण्वन्, घोरगदया = भयङ्करगदया, मूर्तिम् = विग्रहम्, अतुत्रुटत् = त्रोटयामास । गदापातसमकालमेव = गदाप्रहारसमकालमेव च, अनेकार्बुदपद्ममुद्रामूल्यानि = बहुसङ्ख्यमूल्यानि, रत्नानि = मौक्तिकानि, मूर्तिमध्यात् = लिङ्गाभ्यन्तरात्, उच्छलितानि = उत्पतितानि, परितः = सर्वतः, अवाकीर्यन्त = प्रकीर्णानि जातानि । सः = नीचकर्मा गजनी च, दग्धमुखः = महादुष्टः, तानि = प्रकीर्णानि, रत्नानि = मौक्तिकानि, मूर्तिखण्डानि = विग्रहशकलानि च, क्रमेलकपृष्ठेषु = उष्ट्रपृष्ठभागेषु, आरोप्य = संस्थाप्य, सिन्धुनदम् = एतन्नामकपयस्विनीम्, उत्तीर्य = उल्लङ्घ्य, स्वकीयाम् = आत्मीयाम्, विजयध्वजिनीम् = जयपताकिनीम्, गजिनीम् = एतन्नामिकाम्, नाम, राजधानीम् = शासनकेन्द्रम्, प्राविशत् = जगाम ।

समासः—आर्याणां सेनाः आर्यसेनाः । सुवर्णस्य कोटिद्वयं सुवर्णकोटिद्वयम् ।

महादेवस्य प्रतिमां महादेवप्रतिमाम् । पूजकानां वर्गेषु पूजकवर्गेषु । हाहाकारं च कलकलं च हाहाकारकलकलम् । घोरया गदया घोरगदया । गदापातस्य समकालं गदापातसमकालम् । अनेकानि अर्बुदपद्मानि मुद्राः मूल्यानि येषां तानि अनेकार्बुदपद्ममुद्रामूल्यानि । मूर्तेः मध्यात् मूर्तिमध्यात् । दग्धं मुखं यस्य सः दग्धमुखः । मूर्तेः खण्डानि मूर्तिखण्डानि । क्रमेलकानां पृष्ठेषु क्रमेलकपृष्ठेषु ।

कोषः—'उष्ट्रे क्रमेलकमयमहाङ्गा', 'मूल्यं वस्नोऽप्यवक्रयः' इत्युभयत्राप्यमरः ।

(१६) "महाराष्ट्रदेशरत्नम्, यवन-शोणित-पिपासाऽऽकुलकृपाणः, वीरता-सीमन्तिनी-सीमन्त-सुन्दर-सान्द्र-सिन्दूर-दान-देदीप्यमान-दोर्दण्डः, मुकुटमणिर्महाराष्ट्राणाम्, भूषणं भटानाम्, निधिर्नीतीनाम्, कुलभवनं कौशलानाम्, पारावारः परमोत्साहानाम्, कश्चन प्रातःस्मरणीयः, स्वधर्माऽऽग्रह-ग्रह-ग्रहिलः, शिव इव धृतावतारः शिववीरश्चास्मिन् पुण्यनगरान्नेदीयस्येव सिंहदुर्गे ससैनो निवसति । विजयपुराधीश्वरेण साम्प्रतमस्य प्रवृद्धं वैरम् । 'कार्यं वा साधयेयं देहं वा पातयेयम् !' इत्यस्य सारगर्भा महती प्रतिज्ञा । सतीनाम्, सताम्, त्रैवर्णिकस्य आर्यकुलस्य धर्मस्य भारतवर्षस्य च आशा-सन्तान-वितानस्यायमेवाऽऽश्रयः । इयमेव वर्तमाना दशा भारतवर्षस्य । किमधिकं विनिवेदयामो योग-बलावगत-सकल-गोप्यतम-वृत्तान्तेषु योगिराजेषु" इति कथयित्वा विरराम ।

उत्तरम्—प्रसङ्गः—श्रीमदम्बिकादत्तव्यासविरचितशिवराजविजयस्य प्रथमनिश्वासे ब्रह्मचारिगुरुर्योगिराजं कथयति दक्षिणभारतावस्थां शिवराजोद्योगे च ।

व्याख्या—महाराष्ट्रदेशरत्नम्=महाराष्ट्रादिदक्षिणप्रदेशवीरः, यवनशोणितपिपासाऽऽकुलकृपाणः=मोहमदरक्तपानेच्छाऽऽकुलासिकः, वीरतासीमन्तिनीसीमन्तसुन्दरसान्द्रसिन्दूरदानदेदीप्यमानदोर्दण्डः=शूरताललनाकेशवेशसुन्दरघननागकेशरचर्चनदेदीप्यमानभुजदण्डः, मुकुटमणिः=शेखररत्नम्, महाराष्ट्राणाम्=महाराष्ट्रवास्तव्यानाम्, भूषणम्=शोभाधायकम्, भटानाम्=वीराणाम्, निधिः=कोषः, नीतीनाम्=नयानाम्, कुलभवनम्=कुलगृहम्, कौशलानाम्=दक्षतानाम्, पारावारः=सागरः, परमोत्साहानाम्=श्रेष्ठोत्साहानाम्, कश्चन=कोऽपि, प्रातःस्मरणीयः=बहुसम्माननीयः, स्वधर्माऽऽग्रहग्रहग्रहिलः=सनातनधर्मपरिपालकः, शिवः=शम्भुः, इव=यथा, धृतावतारः=स्वीकृतावतारः, शिववीरः=शिवाजी इति नाम्ना प्रसिद्धश्च, अस्मिन्=समीपस्थे, पुण्यनगरात्=पूनेति पवित्रनगरात्, नेदीयस्येव=सन्निकटे एव, सिंहदुर्गे=सिंहगढनाम्ना प्रख्याते स्थाने,

ससेनः = सबलः, वसति = निवसति । विजयपुराधीश्वरेण = विजयपुरशासकेन, साम्प्रतम् = अधुना, अस्य = शिववीरस्य, प्रवृद्धम् = वद्धमूलम्, वैरम् = शत्रुता, कार्यम् = स्वतन्त्रताप्राप्तिरूपम्, वा, साधयेयम् = सिद्धं करिष्यामः, वा = अथवा, देहम् = शरीरम्, पातयेयम् = नष्टं करिष्यामः, इति = इत्याकारा, अस्य = शिववीरस्य, महती = श्रेष्ठा पूज्या वा, प्रतिज्ञा । सतीनाम्=कुलव्रतानाम्, सताम् सज्जनानाम्, त्रैवर्णिकस्य = ब्राह्मणक्षत्रियवैश्यस्य, आर्यकुलस्य = आर्यसमुदयस्य, धर्मस्य = सनातनाख्यस्य, भारतवर्षस्य = हिन्दुस्थानस्य च, आशासन्तान-वितानस्य = आशापरम्पराविस्तारस्य, अयमेव = शिववीर एव, आश्रयः = रक्षकः, इयमेव = अनुपदमुपवर्णिता एव, वर्तमाना = साम्प्रतिकी, दशा = अवस्था, भारतवर्षस्य = हिन्दुस्थानस्य । किमधिकम् = कियद् विपुलम्, विनि-वेदयामः = सूचयामः, योगवलावगतसकलगोप्यतमवृत्तान्तेषु = ध्यानबलज्ञात-सम्पूर्णरहस्यमयोदन्तेषु, योगिराजेषु = भवादृशेषु योगिवर्येषु, इति = उपरि कथितम्, कथयित्वा = उक्त्वा, विरराम = तूष्णीं बभूव (ब्रह्मचारिगुरुरिति भावः) ।

समासः—दक्षिणदेशानां शासकत्वेन दक्षिणदेशशासकत्वेन । महाराष्ट्रश्चासौ देशश्च, तस्य रत्नं महाराष्ट्रदेशरत्नम् । यवनानां शोणिताय पिपासया आकुलः कृपाणः यस्य सः यवनशोणितपिपासाकुलकृपाणः । वीरता एव सीमन्तिनी, तस्या सीमन्ते सुन्दरं सान्द्रं यत् सिन्दूरदानम्, तेन देदीप्यमानो दोर्दण्डो यस्य सः वीरतासीमन्तिनीसीमन्तसुन्दरसान्द्रसिन्दूरदेदीप्यमानदोर्दण्डः । मुकुटस्य मणिः मुकुटमणिः । स्वधर्माय आग्रहः, तस्य गृहे ग्रहिलः स्वधर्माऽऽग्रहग्रहग्रहिलः । धृतः अवतारः येन सः धृतावतारः । विजयपुरस्य अधीश्वरेण विजयपुराधीश्वरेण । सारः गर्भे यस्याः सा सारगर्भा । आशायाः सन्तानम्, तस्य वितानम्, तस्य आशासन्तानवितानस्य । योगस्य बलेन अवगतः सकलः गोप्यतमः वृत्तान्तः येषु, तेषु योगबलावगतसकलगोप्यतमवृत्तान्तेषु ।

(७१) अथ 'किमपि पिपृच्छिषामी'ति शनैरभिधाय बद्धकरसम्पुटे सोत्कण्ठे जटिलमुनौ 'अवगतम्, यवनयुद्धे विजय एव, दैवादापद्ग्रस्तोऽपि च सखि-साहाय्येनाऽऽस्मानमुद्धरिष्यति' इति समभाणीत् । मुनिश्च 'गृहीतमि'त्युदीर्य, पुनः किञ्चिद विचार्य्येव स्मृत्वेव च, दीर्घमुष्णं निःश्वस्य, रोरुध्यमानैरपि किञ्चिदुद्-गतैर्बाष्पबिन्दुभिराकुलनयनो 'भगवन् ! प्रायो दुर्लभो युष्मादृक्षाणां साक्षात्कार इत्यपराऽपि पृच्छाऽऽच्छादयति माम्' इति न्यवेदीत् । स च 'आम् ! ऊरीकृतम्,

जीवति सः, सुखेनैवाऽऽस्ते' इत्युदतीतरत् । अथ 'तं कदा द्रक्ष्यामि' इति पुनः पृष्टवति 'तद्विवाहसमये द्रक्ष्यसि' इत्यभिधाय, बहूनि सान्त्वना-वचनानि च गम्भीरस्वरेणोक्त्वा, सपदि उपत्यकाम्, गण्डशैलान्, अधित्यकां चाऽऽरुह्य पुनस्तस्मिन्नेव पर्वतकन्दरे तपस्तप्तुं जगाम ।

सन्दर्भः—श्रीमदम्बिकादत्तव्यासविरचितशिवराजविजयस्य प्रथमनिश्वासे योगिराजो वदत्यत्र ब्रह्मचारिगुरुं समण्डलीकं स्वीयं हार्दं भावं पाठकसम्प्रेषणाय ।

व्याख्या—अथ = आशीर्वादप्रदानानन्तरम्, किमपि = किञ्चिदपि, पिपृच्छिषामि = प्रष्टुमिच्छामि, इति शनैः = मन्दम्, अभिधाय = उक्त्वा, बद्धकरसम्पुटे = आबद्धहस्तयुगले, सोत्कण्ठे = साभिलाषे, जटिलमुनौ = ब्रह्मचारिगुरौ, अवगतम् = ज्ञातम्, यवनयुद्धे=तुरुष्कसमरे, विजय एव = जय एव, दैवाद्=भाग्याद्, आपद्ग्रस्तोऽपि = विपद्ग्रस्तोऽपि च, सखिसाहाय्येन = मित्रसहकारेण, आत्मानम् = स्वम्, उद्धरिष्यति = विपत्तिवारं नेष्यति, इति = इत्थम्, समभाणीत् = अकथयत् । मुनिश्च = ब्रह्मचारिगुरुश्च, गृहीतम् = अवगतम् इति, उदीर्य = कथयित्वा, पुनः, किञ्चिद् = किमपि, विचार्य्यैव = विचारं कृत्वेव, स्मृत्वेव = स्मरणं कृत्वेव च, दीर्घम् = आयतम्, उष्णम् = उष्णतामयम्, च निःश्वस्य = उच्छ्वासमादाय, रोरुध्यमानैः = पौनःपुन्येनावरुध्यमानैः, अपि किञ्चिद्, उद्गतैः = उपर्यायातैः, बाष्पविन्दुभिः = अश्रुकणैः, आकुलनयनः = व्याकुलनेत्रः, भगवन् ! = श्रीमन् ! प्रायः, दुर्लभः = प्राप्तुमशक्यः, युष्मादृक्षाणाम् = भवादृशाम्, साक्षात्कारः = दर्शनम्, इत्यपरापि = अन्यापि, पृच्छा = प्रश्नः, आच्छादयति = आवृणोति, माम् = वक्तारं ब्रह्मचारिगुरुम्, इति न्यवेदीत् = प्रार्थयामास । स च = योगिवरश्च, आम्=ज्ञातम्, ऊरीकृतम् = स्वीकृतम्, जीवति = प्राणति, सः= श्रीमता आकाङ्क्षितः पुरुषविशेषः, सुखेनैव = शर्मणैव, आस्ते = वर्तते, इत्युदतीतरत् = अवदत् । अथ = सुखसमाचारश्रवणोत्तरम्, तम् = स्वमनोभिलषितं पुरुषम्, कदा = कस्मिन् काले, द्रक्ष्यामि = अवलोकयिष्यामि, इति पुनः पृष्टवति = प्रश्नं कृतवति, तद्विवाहसमये = तदुद्वाहकाले, द्रक्ष्यसि = अवलोकयिष्यसि, इत्यभिधाय = इत्युक्त्वा, बहूनि = प्रचुराणि, सान्त्वनावचनानि = परिसान्त्वनानि च, गम्भीरस्वरेण = तारस्वरेण, उक्त्वा = कथयित्वा, सपदि = शीघ्रम्, उपत्यकायाम् = गिरिसमीपभुवम्, गण्डशैलान् = च्युतस्थूलोपलान्, अधित्यकाम् = पर्वतोपरिस्थभुवम्, चारुह्य = चारोहणं कृत्वा, पुनः = भूयः, तस्मिन्नेव = पूर्ववर्णितैव, पर्वतकन्दरे = गिरिदरिभागे, तपस्तप्तुम् = तपस्यां कर्तुम्, जगाम = अगमत् ।

समासः—बद्धं करयोः सम्पुटं येन, तस्मिन् बद्धकरसम्पुटे। जटिलश्चासौ मुनिश्च, तस्मिन् जटिलमुनौ। यवनानां युद्धे यवनयुद्धे। आपद्भिः ग्रस्तोऽपि आपद्ग्रस्तोऽपि। सखीनां साहाय्येन सखिसाहाय्येन। वाष्पाणां बिन्दुभिः बाष्पबिन्दुभिः। आकुले नयने यस्यासौ आकुलनयनः। तस्य विवाहस्य समये तद्विवाहसमये। सान्त्वनायाः वचनानि सान्त्वनावचनानि। गम्भीरेण स्वरेण गम्भीरस्वरेण। पर्वतस्य कन्दरे पर्वतकन्दरे।

(१८) ततः शनैः शनैर्निर्यातेष्वपरिचितजनेषु, संवृत्ते च निर्मक्षिके, मुनि- गौरवटुमाहूय, विजयपुराधीशाऽऽज्ञया शिववीरेण सह योद्धुं ससेनं प्रस्थितस्य अपजलखानस्य विषये यावत् किमपि प्रष्टुमियेष, तावत् पादचारध्वनिमिव कस्याप्यश्रौषीत्। तमवधार्याऽन्यमनस्के इव मुनौ गौरवटुरपि तेनैव ध्वनिना कर्णयोः कृष्ट इव समुत्थाय, निपुणं परितो निरीक्ष्य, पर्य्यटच्च, 'कोऽयम् ?' इति च साम्रेडं व्याहृत्य, कमप्यनवलोक्य, पुनर्निवृत्य, 'मन्ये मार्जारः कोऽपि' इति मन्दं गुरवे निवेद्य, पुनस्तथैवोपविवेश। मुनिश्च 'मा स्म कश्चिदितरः श्रौषीत्' इति सशङ्कः क्षणं विरम्य पुनरुपन्यस्तुमारेभे।

सन्दर्भः—श्रीमदम्बिकादत्तव्यासविरचितस्य शिवराजविजयस्य प्रथमनिश्वा- सात् गृहीतोऽयमंशः। अत्र विजयपुराधीशवृत्तं श्रोतुमिच्छति ब्रह्मचारिगुरुः।

व्याख्या—ततः = योगिराजगमनोत्तरम्, शनैः शनैः = मन्दं मन्दम्, निर्या- तेषु = निर्गतेषु, अपरिचितजनेषु = अज्ञातकुलशीलमानवेषु, संवृत्ते = जाते च, निर्मक्षिके = जनरहिते, मुनिः = ब्रह्मचारिगुरुः, गौरवटुमाहूय = गौरवर्ण- ब्रह्मचारिणमाहूय, विजयपुराधीशाज्ञया = विजयपुराधिपादेशेन, शिववीरेण = शिवाजी इति नाम्ना प्रसिद्धेन वीरेण, सह = साकम्, योद्धुम् = युद्धकरणाय, ससेनम् = सबलम्, प्रस्थितस्य = कृतप्रस्थानस्य, अपजलखानस्य = एतन्नाम्ना प्रसिद्धस्य मुस्लिमवीरस्य, विषये = प्रसङ्गे, किमपि = किञ्चिदपि, प्रष्टुम् = जिज्ञासितुम्, इयेष = इच्छतिस्म, तावत् = तस्मिन्नेव काले, पादचारध्वनिमिव = चरणचलनशब्दमिव, कस्यापि = अज्ञातजनस्य, अश्रौषीत् = श्रुतवान्। तम् = ध्वनिम्, अवधार्य = ज्ञात्वा, अन्यमनस्के = विरस, इव = यथा, मुनौ = ब्रह्म- चारिगुरौ, गौरवटुरपि = गौरब्रह्मचारी अपि, तेनैव = श्रुतेनैव, ध्वनिना = शब्देन, कर्णयोः = श्रोत्रयोः, कृष्ट इव = समाकृष्ट इव, समुत्थाय = उत्थाय, निपुणम् = बाढम्, परितः = सर्वतः, निरीक्ष्य = दृष्ट्वा, पर्य्यट्य = पर्यटनं विधाय, 'कोऽयम्' इति च साम्रेडम् = वारं वारम्, व्याहृत्य = कथयित्वा,

कमप्यनवलोक्य = अदृष्ट्वा, पुनः = भूयः, निवृत्य = परावृत्य, मन्ये = अनुमिनोमि, मार्जारः = विडालः, कोऽपि, इति = इत्थम्, मन्दम् = शनैः, गुरवे = शिक्षकाय, निवेद्य = निवेदनं कृत्वा, पुनः = भूयः, तथैव = तेनैव प्रकारेण, उपविवेश = अतिष्ठत् । मुनिश्च = ब्रह्मचारिगुरुश्च, मा स्म कश्चिदितरः अश्रौषीत् = न कोऽप्यन्यः शृणुयादिति, सशङ्कः = शङ्कालुः, क्षणम् = मुहूर्तम्, विरम्य, पुनः = भूयः, उपन्यस्तुमारेभे = कथयितुमारब्धवान् ।

समासः—न परिचिता अपरिचिता, अपरिचिताश्च ते जनाश्च, तेषु अपरिचितजनेषु । मक्षिकाणामभावो निर्मक्षिकम् । विजयपुरस्य अधीशः, तस्य आज्ञया विजयपुराधीशाज्ञया । सेनया सह ससेनः, तम् । पादयोः चारस्य ध्वनिं पादचारध्वनिम् । शङ्कया सहितः सशङ्कः ।

(१९) कलकलमेतमाकर्ण्य श्यामबटुरपि कन्यासमीपादुत्थाय दृष्ट्वा च हन्तुमेतं यवनवराकं पर्य्याप्तोऽयं गौरसिंह इति मा स्म गमदन्योऽपि कश्चित् कन्यकामपजिहीर्षुरिति वलीकादेकं विकटखड्गमाकृष्य त्सरौ गृहीत्वा कन्यकां रक्षन्, तदध्युषितकुटीर-निकट एव तस्थौ ।

गौरसिंहस्तु 'कुटीरान्तः कन्यकाऽस्ति, सा च यवन-वधव्यसनिनि मयि जीवति न शक्या द्रष्टुमपि, किं नाम स्प्रष्टुम् ? तद् यावत् तव कवोष्ण-शोणित-तृषित एष चन्द्रहासो न चलति, तावत् कद्दनं वा, उत्फालं वा यच्चिकीर्षसि तद् विधेहि' इत्युक्त्वा व्यालीढमर्य्यादया सज्जः समतिष्ठत ।

सन्दर्भः—श्रीमदम्बिकादत्तव्यासविरचितशिवराजविजयस्य प्रथमनिश्वासात् गृहीतोऽयं गद्यखण्डः । यवनयुवानं दृष्ट्वा श्यामबटुर्गौरसिंहश्च किं कृतवन्तौ इति कथां वर्णयति अत्र लेखकः ।

व्याख्या—कलकलम् = कोलाहलम्, एतम् = समीपस्थं गौरसिंहयवनयुवकोद्भूतम्, आकर्ण्य = श्रुत्वा, श्यामबटुरपि = कृष्णब्रह्मचारिरपि, कन्यकासमीपादुत्थाय = वालिकासकासादुत्थानं कृत्वा, दृष्ट्वा च = विलोक्य च, हन्तुमेतम् = मारयितुममुम्, यवनवराकम् = तुरुष्कपामरम्, पर्य्याप्तोऽयम् = समर्थोऽयम्, गौरसिंहः इति = गौरवर्णः क्षत्रियजातीयः ब्रह्मचारी इति, मा स्म गमदन्योऽपि कश्चित् = अन्यो जनः न आयातु, कन्यकामपजिहीर्षुरिति = बालिकापहरणेच्छुरिति, वलीकात् = पटलात्, एकम् = अन्यतमम्, विकटखड्गम् = भयङ्करासिम्, आकृष्य = समादाय, त्सरौ = मुष्टिकायाम्, गृहीत्वा = धारयित्वा,

कन्यकाम् = बालिकाम्, रक्षन् = गोपयन्, तदध्युषितकुटीरनिकटे = बालिकासेवितपर्णशालासमीपे एव, तस्थौ = स्थितो बभूव।

गौरसिंहस्तु = एतत्संज्ञया कविनिबद्धो व्यक्तिस्तु, कुटीरान्तः = पर्णशालाभ्यन्तरम्, कन्यकाऽस्ति = बालिका वर्तते, सा च = बालिका च, यवनवधव्यसनिनि = तुरुष्कहननरसिके, मयि = गौरसिंहे, जीवति = प्राणिति, न शक्या = न क्षमा, द्रष्टुमपि = अवलोकयितुमपि, किं नाम = का चर्चा, स्प्रष्टुम् ? तत् = तु, यावत्, तव = यवनयुवकस्य, कवोष्णशोणिततृषितः = कटुष्णरक्तपिपासितः, एषः = करस्थः, चन्द्रहासो न चलति = खड्गो न पतति, तावत्, कूर्दनम् = उत्पतनम्, वा = अथवा, उत्फालम् = उद्योगं वा, यच्चिकीर्षसि = यदिच्छसि, तद् विधेहि = कुरु, इत्युक्त्वा = इत्यभिधाय, व्यालीढमर्यादया = युद्धावस्थानविशेषमर्यादया, सज्जः, समतिष्ठत = अभवम्।

समासः—कन्यायाः समीपात् कन्यकासमीपात्। विकटश्च खड्गश्च, तं विकटखड्गम्। तया अध्युषितस्य कुटीरस्य निकटे तदध्युषितकुटीरनिकटे। यवनानां वध एव व्यसनं यस्य, तस्मिन् यवनवधव्यसनिनि। कवोष्णस्य शोणितस्य तृषितः कवोष्णशोणिततृषितः। व्यालीढस्य मर्यादया व्यालीढमर्यादया।

कोषः—'कोष्णं कवोष्णं मन्दोष्णम्', 'चन्द्रहासासिरिष्टयः', 'त्सरुः खड्गादिमुष्टौ', 'वलीकनीध्रे पटलप्रान्ते' इति सर्वत्राप्यमरः।

(२०) ततो गौरसिंहो दक्षिणान् वामांश्च परश्शतान् कृपाणमार्गानङ्गीकृतवतः, दिनकर-कर-स्पर्श-चतुर्गुणीकृत-चाकचक्यैः चञ्चच्चन्द्रहासचमत्कारैश्चक्षूंषि मुष्णतः, यवन-युवक-हतकस्य, केनाप्यनुपलक्षितोद्योगः, अकस्मादेव स्वासिना कलित-क्लेद-सञ्जात-स्वेदजल-जालं विशिथिल-कच-कुल-मालं भग्न-भ्रू-भयानक-भालं शिरश्चिच्छेद।

उत्तरम्—प्रसङ्गः—श्रीमदम्बिकादत्तव्यासः स्वीये शिवराजविजये गौरसिंहकृतं यवनयुवकशिरोविच्छेदं वर्णयति प्रथमनिश्वासे।

व्याख्या—ततः = व्यालीढमर्यादयाऽवस्थानानन्तरम्, गौरसिंहः, दक्षिणान् = सव्यान्, वामांश्च = सव्येतरांश्च, परश्शतान् = शताधिकान्, कृपाणमार्गान् = खड्गमार्गान्, अङ्गीकृतवतः = स्वीकृतवतः, दिनकरकरस्पर्शचतुर्गुणीकृतचाकचक्यैः = रविकिरणसम्पर्कचतुर्गुणीकृतप्रतिभासविशेषैः, चञ्चच्चन्द्रहासचमत्कारैः = सञ्चरत्खड्गचमत्कारैः, चक्षूंषि = नेत्राणि, मुष्णतः = चोरयतः, यवनयुवकहतकस्य = तुरुष्कयुवकदुष्टस्य, केनाप्यनुपलक्षितोद्योगः = केनाप्यज्ञातप्रयासः,

अकस्मादेव = सहसैव, स्वासिना = निजचन्द्रहासेन, कलितक्लेदसञ्जातस्वेदजलजालम् = व्याप्तश्रमोत्पन्नघर्मजालसमूहम्, विशिथिलकचकुलमालम् = परिभ्रष्टकेशसमूहपङ्क्तिकम्, भग्नभ्रूभयानकभालम् = छिन्नभ्रूभीपणललाटम्, शिरः = मस्तकम्, चिच्छेद = कर्तयामास ।

समासः—कृपाणस्य मार्गान् कृपाणमार्गान् । दिनकरस्य कराणां स्पर्शेन चतुर्गुणीकृतं चाकचक्यं यैस्तैः दिनकरकरस्पर्शचतुर्गुणीकृतचाकचक्यैः । चञ्चतः चन्द्रहासस्य चमत्कारैः चञ्चचन्द्रहासचमत्कारैः । यवनस्य युवकः यवनयुवकः, यवनयुवकश्चासौ हतकश्च, तस्य यवनयुवकहतकस्य । अनुपलक्षितः उद्योगः यस्य सः अनुपलक्षितोद्योगः । कलितेन क्लेदेन सञ्जातस्य स्वेदजलस्य जालं यस्मिन् तत् कलितक्लेदसञ्जातस्वेदजलजालम् । विशिथिलाः कचानां कुलस्य मालाः यस्मिन् तत् विशिथिलकचकुलमालम् । भग्नया भ्रुवा भयानकं भालं यस्मिन् तद् भग्नभ्रूभयानकभालम् ।

कोषः—'घर्मो निदाघः स्वेदः', 'ऊर्ध्वे दृग्भ्यां भ्रुवौ स्त्रियौ' इत्युभयत्राप्यमरः ।

(२१) अथ मुनिरपि दाडिम-कुसुमास्तरणाच्छन्नायामिव गाढ-रुधिर-दिग्धायां ज्वलदङ्गार-चितायां चितायामिव वसुधायां शयानं वियुज्यमान-भारत-भुवमालिङ्गन्तमिव निर्जीवीभवदङ्गबन्ध-चालनपरं शोणित-सङ्घात-व्याजेनान्तः-स्थितरजोराशिमिवोद्गिरन्तं कलित-सायन्तन-घनाऽऽडम्बर-विभ्रमं सतत-ताम्र-चूड-भक्षणपातकेनेव ताम्रीकृतं छिन्न-कन्धरं यवनहतकमवलोक्य सहर्षं ससाधुवादं सरोमोद्गमं च गौरसिंहमाश्लिष्य, भ्रूभङ्गमात्राऽऽज्ञप्तेन भृत्येन मृतककञ्चुक-कटिबन्धोष्णीषादिकमन्विष्याऽऽनीतं पत्रमेकमादाय सगणः स्वकुटीरं प्रविवेश ।

सन्दर्भः—ब्रह्मचारिगुरोः कुटीप्रवेशं वर्णयत्यत्र श्रीमदम्बिकादत्तव्यासः शिवराजविजयस्य प्रथमनिश्वासे ।

व्याख्या—अथ = यवनशिरश्छेददर्शनोत्तरम्, मुनिरपि = ब्रह्मचारिगुरुरपि, दाडिमकुसुमास्तरणाच्छन्नायामिव=करककुसुमविष्टराच्छन्नायामिव, गाढरुधिर-दिग्धायाम् = घनीभूतलोहितलिप्तायाम्, ज्वलदङ्गारचितायाम् = ज्वलदङ्गार-व्याप्तायाम्, चितायाम् = शवदहनसाधनभूतायाम्, इव = यथा, वसुधायाम् = धरायाम्, शयानम् = सुप्तम्, वियुज्यमानभारतभुवम् = वियुज्यमानहिन्दुस्थान-भूमिम्, आलिङ्गन्तमिव = आश्लिष्यन्तमिव, निर्जीवीभवदङ्गबन्धचालनपरम् = निष्प्राणीभवच्छरीरसन्धिसञ्चालनरतम्, शोणितसङ्घातव्याजेन = रक्तसमूह-

छलेन, अन्तःस्थितरजोराशिमिवोद्गिरन्तम् = आभ्यन्तरस्थरजोगुणसमूहमिवोद्वमन्तम्, कलितसायन्तनघनाऽऽडम्बरविभ्रमम् = घृतसायम्भवमेघविडम्बनविलासम्, सततताम्रचूडभक्षणपातकेनेव = निरन्तरचरणायुधभक्षणपापेनेव, ताम्रीकृतम् = रक्तीकृतम्, छिन्नकन्धरम् = भग्नग्रीवम्, यवनहतकम् = तुरुष्कदुष्टम्, अवलोक्य = दृष्ट्वा, सहर्षः = समोदम्, ससाधुवादम् = सधन्यवादम्, सरोमोद्गमम् = सरोमाञ्चम्, च, गौरसिंहम् = यवननाशकम्, आश्लिष्य = आलिङ्ग्य, भ्रूभङ्गमात्राऽऽज्ञप्तेन=भ्रूसङ्केतमात्राऽऽदिष्टेन, भृत्येन=अनुचरेण, मृतककञ्चुककटिबन्धोष्णीषादिकमन्विष्याऽऽनीतम्=अपगतासुयवनाङ्गरक्षकजघटपट्टिकाशिरोवेष्टनादिकमन्विष्यासादितम्, पत्रमेकमादाय = गृहीत्वा, सगणः = ससमूहः, स्वकुटीरम् = निजपर्णशालाम्, प्रविवेश = जगाम ।

समासः—दाडिमस्य कुसुमानाम् आस्तरणेन आच्छन्नायां दाडिमकुसुमास्तरणाच्छन्नायाम् । गाढैः रुधिरैः दिग्धायां गाढरुधिरदिग्धायाम् । ज्वलद्भिः अङ्गारैः चितायां ज्वलदङ्गारचितायाम् । वियुज्यमानां भारतस्य भुवं वियुज्यमानभारतभुवम् । निर्जीवीभवताम् अङ्गबन्धानां चालनं परं निर्जीवीभवदङ्गबन्धचालनपरम् । शोणितानां सङ्घातस्य व्याजेन शोणितसङ्घातव्याजेन । अन्तः स्थितो यो रजोराशिः, तम् अन्तःस्थितरजोराशिम् । कलितः सायन्तनस्य घनाडम्बरस्य विभ्रमं येन, तं कलितसायन्तनघनाडम्बरविभ्रमम् । सततं यत् ताम्रचूडस्य भक्षणम्, तदेव पातकं सततताम्रचूडभक्षणपातकेन । छिन्नं कन्धरं यस्य, तं छिन्नकन्धरम् । यवनश्चासौ हतकश्च, तं यवनहतकम् । हर्षेण सह सहर्षम् । साधुवादेन सह ससाधुवादम् । रोमोद्गमेन सह सरोमोद्गमम् । मृतकस्य कञ्चुकं कटिबन्धम् उष्णीषं चादौ यस्य तत् मृतककञ्चुककटिबन्धोष्णीषादिकम् ।

कोषः—'दिग्धो विषाक्तबाणे स्यात् पुंसि लिप्तेऽन्यलिङ्गकः' इति मेदिनी । 'चिता चित्या चितिः स्त्रियाम्', 'कुक्कुटश्चरणायुधः' इत्युभयत्राप्यमरः ।

द्वितीयो निश्वासः

(२२) ततस्तु स्वतन्त्र-यवनकुल-भुज्यमान-विजयपुराधीश-प्रेषितः पुण्यनगरस्य समीपे एव प्रक्षालित-गण्डशैल-मण्डलायाः; निर्झरवारिधारा-पूर-पूरित-प्रब ... वाहायाः; पश्चिम-पारावार-प्रान्तप्रसूत-गिरि-ग्राम-गुहा-गर्भ-निर्गतायाः

अपि प्राच्य-पयोनिधिचुम्बन-चञ्चुरायाः, रिङ्गत्-तरङ्ग-भङ्गोद्भूतावर्त्त-शत-भीमायाः, भीमाया नद्याः, अनवरत-निपतद्-बकुल-कुल-कुसुम-कदम्ब-सुरभी-कृतमपि नीरं वगाहमान-मत्त-मतङ्गज-मद-धाराभिः कटूकुर्वन्; हय-हेषाध्वनि-प्रतिध्वनि-बधिरीकृत-गव्यूति-मध्यगाध्वनीनवर्णः, पट-कुटीर-कूट-विहित-शारदा-म्भोधर-विडम्बनः, निरपराध-भारताऽभिजन-जनपीडन-पातक-पटलैरिव समु-द्धूयमान-नीलध्वजैरुपलक्षितः, विजयपुरेश्वरस्यान्यतमः सेनानीः अफजलखानः प्रतापदुर्गादविदूर एव शिववीरेण सहाऽऽहवद्यूतेन चिक्रीडिषुः ससेनस्तिष्ठति स्म।

प्रसङ्गः—श्रीमदम्बिकादत्तव्यासविरचितस्य शिवराजविजयस्य द्वितीय-निश्वासात् गृहीतोऽयमंशः। अफजलखानोपकारिकामत्र वर्णयति कविः।

व्याख्या—इतस्तु=अस्मिन् दिशि तु, स्वतन्त्रयवनकुलभुज्यमानविजय-पुराधीशप्रेषितः = स्वच्छन्दतुरुष्कान्वयशास्यमानविजयपुरनामकनगरप्रशासक-प्रहितः, पुण्यनगरस्य='पूना' इति नाम्ना ख्यातस्य नगरस्य, समीपे=निकटे, एव, प्रक्षालितगण्डशैलमण्डलायाः=धौतगिरिच्युतोपलसमूहायाः, निर्झरवारि-धारापूरपूरितप्रवलप्रवाहायाः = स्रोतोजलधाराप्रवाहभरितवलिष्ठप्रवाहायाः, पश्चिमपारावारप्रान्तप्रसूतगिरिग्रामगुहागर्भनिर्गतायाः=प्रतीचीसमुद्रनिकटप्रदेशो-त्पन्नपर्वतसमूहगह्वरमध्यविनिःसृतायाः, अपि प्राच्यपयोनिधिचुम्बनचञ्चुरायाः= पूर्वपारावारस्पर्शचपलायाः, रिङ्गत्तरङ्गभङ्गोद्भूतावर्तशतभीमायाः=चञ्चलो-र्मिभेदोत्पन्नजलभ्रमभयङ्करायाः, भीमायाः=एतन्नामिकायाः, नद्याः=सरिद्व-रायाः, अनवरतनिपतद्वकुलकुलकुसुमकदम्बसुरभीकृतम्=निरन्तरपरिपतद्-वञ्जुलगणफुल्लनिकरशोभनगन्धायाः, अपि, नीरम्=जलम्, वगाहमानमत्त-मतङ्गजमदधाराभिः=प्रविशद्दानभरितहस्तिदानजलैः, कटूकुर्वन्=विरसता-मापादयन्, हयहेषाध्वनिप्रतिध्वनिबधिरीकृतगव्यूतिमध्यगाध्वनीनवर्गः=घोटक-निःश्वननादप्रतिनादध्वनिश्रुतिसामर्थ्यविकलीकृतक्रोशद्वयान्तरालवर्तिपथिकगणः, पटकुटीरकूटविहितशारदाम्भोधरविडम्बनः=उपकारिकासमूहनिर्मितशरन्मेघानु-कृतिकः, निरपराधभारताभिजनजनपीडनपातकपटलैः=निर्दोषभारतीयमानव-पीडनपापसमूहैः, इव=यथा, समुद्धूयमाननीलध्वजैः=कम्पमाननीलपताकाभिः, उपलक्षितः=युक्तः, विजयपुरेश्वरस्य=विजयपुरशासकस्य, अन्यतमः=एकः, सेनानी=बलनायकः, अफजलखानः=एतन्नाम्ना विख्यातः, प्रतापदुर्गात्, अविदूरे =निकटे एव, शिववीरेण=शिवराजेन, सह=साकम्, आहवद्यूतेन=युद्धदुरोद-रेण, चिक्रीडिषुः=क्रीडाकरणाभिलाषुकः, ससेनः=सबलः, तिष्ठति स्म=अवर्तत।

समासः—स्वतन्त्रं यद् यवनकुलम्, तेन भुज्यमानस्य विजयपुरस्य अधीशेन प्रेषितः। स्वतन्त्रयवनकुलभुज्यमानविजयपुराधीशप्रेषितः। प्रक्षालितानि गण्डशैलानां मण्डलानि यया, तस्याः प्रक्षालितगण्डशैलमण्डलायाः। निर्झराणां वारिधाराया पूरैः पूरितः प्रबलः प्रवाहो यस्याः, तस्या निर्झरवारिधारापूरपूरितप्रबलप्रवाहायाः। पश्चिमश्चासौ पारावारः पश्चिमपारावारः, तस्य प्रान्ते यः प्रसूतः गिरीणां ग्रामः, तस्य गुहाः, तासां गर्भात् निर्गतायाः पश्चिमपारावारप्रान्तप्रसूतगिरिग्रामगुहागर्भनिर्गतायाः। प्राच्यश्चासौ पयोनिधिश्च, तच्चुम्बने चञ्चुरायाः प्राच्यपयोनिधिचुम्बनचञ्चुरायाः। रिङ्गतां तरङ्गाणां भङ्गैः उद्धूताः ये आवर्ताः, तेषां शतैः भीमाया रिङ्गत्तरङ्गभङ्गोद्भूतावर्तशतभीमायाः। अनवरतं निपततां वकुलकुसुमानां कदम्बेन सुरभीकृतं अनवरतनिपतद्वकुलकुलकुसुमकदम्बसुरभीकृतम्। वगाहमानानां मत्तानां मतङ्गजानां मदधाराभिः वगाहमानमत्तमतङ्गजमदधाराभिः। हयानां हेषा ध्वनिः तद्ध्वनिप्रतिध्वनिभिः वधिरीकृतः गव्यूतिमध्यगः अध्वनीनवर्गः येन सः हयहेषाध्वनिप्रतिध्वनिबधिरीकृतगव्यूतिमध्यगाध्वनीनवर्गः। पटकुटीराणां कूटैः विहिता शारदाम्भोधराणां विडम्बना येन सः पटकुटीरकूटविहितशारदाम्भोधरविडम्बनः। निरपराधानां भारताभिजनानां जनानां पीडने यत् पातकम्, तेषां पटलैः निरपराधभारताभिजनपीडनपातकपटलैः। समुद्धूयमानैः नीलध्वजैः समुद्धूयमाननीलध्वजैः। सेनया सहितः ससेनः।

कोषः—'घोरं भीमं भयानकम्', 'पारावारः सरित्पतिः', 'अश्वानां हेषा हेषा च निःस्वनः', 'गव्यूतिः स्त्री क्रोशयुगम्', 'उपकार्योपकारिका' इति सर्वत्राप्यमरः। व्याकरणम्—(१) वगाहमानानामित्यत्र भागुरिमतेन अलोपः। (२) 'लट् स्मे' इति स्मयोगे लट्।

(२३) अथ जगतः प्रभाजालमाकृष्य, कमलानि सम्मुद्रच, कोकान् सशोकीकृत्य, सकल-चराचर-चक्षुःसञ्चार-शक्तिं शिथिलीकृत्य, कुण्डलेनेव निज-मण्डलेन पश्चिमामाशां भूषयन्, वारुणी-सेवनेनेव माञ्जिष्ठ-मञ्जिम-रञ्जितः, अनवरत-भ्रमण-परिश्रम-श्रान्त इव सुषुप्सुः, म्लेच्छ-गण-दुराचार-दुःखाऽऽक्रान्त-वसुमती-वेदनामिव समुद्रशायिनि निर्विवेदयिषुः, वैदिक-धर्म-ध्वंस-दर्शन-सञ्जात-निर्वेद इव गिरिगहनेषु प्रविश्य तपश्चिकीर्षुः, घर्म-ताप-तप्त इव समुद्र-जले सिस्नासुः, सायं समयमवगत्य सन्ध्योपासनमिव विधित्सुः, 'नास्ति कोऽपि मत्कुले; यः सकण्ठग्रहं धर्म-ध्वंसिनो यवनहतकान् यज्ञियादस्माद् भारत-गर्भान्निस्सारयेत्' इति

चिन्ताऽऽक्रान्त इव कन्दरि-कन्दरेषु प्रविविक्षुर्भगवान् भास्वान्, क्रमशः क्रूरकरान-पहाय, दृश्य-परिपूर्णमण्डलः संवृत्य, श्वेतीभूय, पीतीभूय, रक्तीभूय च गगन-धरातलाभ्यामुभयत आक्रम्यमाण इवाऽण्डाकृतिमङ्गीकृत्य, कलि-कौतुककवली-कृत-सदाचार-प्रचारस्य पातकपुञ्ज-पिञ्जरित-धर्मस्य च यवनगण-ग्रस्तस्य भारत-वर्षस्य च स्मारयन्, अन्धतमसे च जगत् पातयन्, चक्षुषामगोचर एव सञ्जातः ।

सन्दर्भः—सूर्यास्तं वर्णयत्यत्र श्रीमदम्बिकादत्तव्यासः स्वीयशिवराजविजयस्य द्वितीयनिश्वासे ।

व्याख्या—अथ = अपजलखानस्य ससेनावस्थानानन्तरम्, जगतः=संसारस्य, प्रभाजालम् = प्रकाशपुञ्जम्, आकृष्य = कर्षयित्वा, कमलानि=पद्मानि, सम्मुद्रय = मुद्रयित्वा, कोकान् = चक्रवाकान्, सशोकीकृत्य = दुःखिनो विधाय, सकल-चराचरचक्षुःसञ्चारशक्तिम्=सम्पूर्णस्थावरजङ्गमनेत्रावलोकनक्षमताम्, शिथिली-कृत्य = स्वल्पीकृत्य, कुण्डलेनेव = कर्णभूषणेनेव, निजमण्डलेन = स्वबिम्बेन, पश्चिमाम् = प्रतीचीम्, आशाम् = दिशम्, भूषयन् = शोभितां कुर्वन्, वारुणी-सेवनेनेव = पश्चिमाशाश्रयणेन, मदिरासेवनेनेव वा, माञ्जिष्ठमञ्जिमरञ्जितः = मण्डूकपर्णीरक्तिमारक्तः, अनवरतभ्रमणपरिश्रमश्रान्तः = निरन्तरचलनश्रम-श्रयितः, इव = यथा, सुषुप्सुः = शयनमिच्छुः, म्लेच्छगणदुराचारदुःखाऽऽक्रान्त-वसुमतीवेदनामिव = यवनसमुदायकदाचारपीडाक्रान्तमेदिनीपीडामिव, समुद्र-शायिनि = क्षीरसागरशयनरते, निविवेदयिषुः = निवेदयितुमिच्छुः, वैदिकधर्म-ध्वंसदर्शनसञ्जातनिर्वेद इव = श्रौतधर्मनाशावलोकनोत्पन्नवैराग्य इव, गिरि-गहनेषु = पर्वतदुर्गमेषु, प्रविश्य = प्रवेशं कृत्वा, तपश्चिकीर्षुः = तपःकर्तुमिच्छुः, घर्मतापतप्त इव=निदाघोष्णतापीडितो यथा, समुद्रजले=सागराम्भसि, सिस्नासुः = स्नातुमिच्छुः, सायं समयमवगत्य = निशामुखकालं ज्ञात्वा, सन्ध्योपासनमिव विधित्सुः = सान्ध्यव्रतमिव चिकीर्षुः, नास्ति=न वर्तते, कोऽपि, मत्कुले=मदीय-गोत्रे, यः सकण्ठग्रहम् = गलविलग्रहणपूर्वकम्, धर्मध्वंसिनः=सनातनधर्मनाशिनः, यवनहतकान् = तुरुष्कदुष्टान्, यज्ञियादस्माद् = यजनयोग्यादस्माद्, भारतगर्भा-न्निस्सारयेत् = हिन्दुस्थानादपसारयेत्, इति = इत्थम्, चिन्ताक्रान्त इव = दुश्चि-न्तापीडितो यथा, कन्दरिकन्दरेषु = गिरिगह्वरेषु, प्रविविक्षुः = प्रवेशमिच्छुः, भगवान् = ऐश्वर्यसम्पन्नः, भास्वान् = रविः, क्रमशः = क्रमेण, क्रूरकरानपहाय = कठिनकिरणानपसार्य, दृश्यपरिपूर्णमण्डलः = विलोक्यमानसकलबिम्बः, संवृत्य = भूत्वा, श्वेतीभूय = धवलीभूय, पीतीभूय = पीतिमानमाश्रित्य, रक्तीभूय =

रक्तिमानमाश्रित्य च, गगनधरातलाभ्यामुभयतः = आकाशभूपृष्ठाभ्यामुभयतः, आक्रम्यमाण इव = आक्रमणविषयीक्रियमाण इव, अण्डाकृतिमङ्गीकृत्य = अण्डाकारमाश्रित्य; कलिकौतुककवलीकृतसदाचारप्रचारस्य = चतुर्थयुगकौतूहलविनष्टशुभाचारप्रचारस्य, पातकपुञ्जपिञ्जरितधर्मस्य = पापसमूहपीतवर्णधर्मस्य च, यवनगणग्रस्तस्य = तुरुष्कसमुदयग्रस्तस्य, भारतवर्षस्य = हिन्दुस्थानस्य च, स्मारयन् = स्मृतिविषयतामापादयन्, अन्धतमसे = प्रगाढध्वान्ते च, जगत् = लोकम्, पातयन् = पतनविषयतामापादयन्, चक्षुषामगोचरः = नेत्राणामदृश्य एव, सञ्जातः = सम्पन्नः ।

समासः—प्रभायाः जालं प्रभाजालम् । सकलानां चराचराणां चक्षुषां सञ्चारस्य शक्तिः सकलचराचरचक्षुःसञ्चारशक्तिः । निजेन मण्डलेन निजमण्डलेन । वारुण्याः सेवनेन वारुणीसेवनेन । माञ्जिष्ठायाः मञ्जिम्ना रञ्जितः माञ्जिष्ठमञ्जिमरञ्जितः । अनवरतं यद् भ्रमणं, तेन यः परिश्रमः, तेन श्रान्तः अनवरतभ्रमणपरिश्रमश्रान्तः । म्लेच्छाणां गणस्य दुराचारैः दुःखाक्रान्तायाः वसुमत्याः वेदनामिव म्लेच्छगणदुराचारदुःखाक्रान्तवसुमतीवेदनामिव । वैदिकधर्मस्य ध्वंसः दर्शनेन सञ्जातः निर्वेदः यस्य सः वैदिकधर्मध्वंसदर्शनसञ्जातनिर्वेदः । घर्मस्य तापेन तप्तः घर्मतापतप्तः । धर्मस्य ध्वंसिनः धर्मध्वंसिनः । चिन्तयाऽऽक्रान्तः चिन्ताऽऽक्रान्तः । कन्दरीणां कन्दरेषु कन्दरिकन्दरेषु । क्रूरान् करान् क्रूरकरान् । दृश्यं परिपूर्णं मण्डलं यस्य सः दृश्यपरिपूर्णमण्डलः । कलेः कौतुकेन कवलीकृतानि सदाचारस्य प्रचाराणि यत्र तत्, तस्य कलिकौतुककवलीकृतसदाचारप्रचारस्य । पातकपुञ्जेन पिञ्जरितः धर्मः यत्र, तस्य पातकपुञ्जपिञ्जरितधर्मस्य । यवनानां गणैः ग्रस्तस्य यवनगणग्रस्तस्य ।

विशेषः—(१) उत्प्रेक्षालङ्कारः । (२) 'कोकश्चक्रश्चक्रवाकः', 'कुण्डलं कर्णभूषणम्', 'दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः', 'सुरा प्रत्यक् च वारुणी', ध्वान्ते गाढेऽन्धतमसम्' इति सर्वत्राप्यमरः । (३) यज्ञियादित्यत्र 'यज्ञर्त्विग्भ्यां घखञौ' इति घः । भारतवर्षस्य च स्मारयन्नित्यत्र 'अधीगर्थदयेषाम्' इति षष्ठी ।

(२४) ततो 'दौवारिक ! शान्तो भव, किमिति व्यर्थं मुमूर्षुरिति बधिर इति च वदसि ? इति वक्तारमपश्यतैवाऽऽकर्णि मन्द्रस्वरमेदुरा वाणी । अथ 'तत् किं नाज्ञायि अद्यापि भवता प्रभुवर्य्याणामादेशो यद् दौवारिकेण प्रहरिणा वा त्रिः पृष्टोऽपि प्रत्युत्तरमददद् हन्तव्य इति' इत्येवं भाषमाणेन द्वाःस्थेन 'क्षम्यतामेव

आगच्छामि आगत्य च निखिलं निवेदयामि' इति कथयन्, द्वादशवर्षेण केनापि भिक्षुवटुनाऽनुगम्यमानः, कोऽपि काषायवासाः, धृत-तुम्बी-पात्रः, भस्म-च्छुरित-ललाटः, रुद्राक्ष-मालिका-सनाथित-कण्ठः, भव्यमूर्त्तिः संन्यासी दृष्टः।

सन्दर्भः—श्रीमदम्बिकादत्तव्यासोऽत्र शिवराजविजयस्य द्वितीयनिश्वासे संन्यासिदौवारिकयोः प्रारम्भिकीं वार्तां प्रस्तौति।

व्याख्या—ततः=द्वारपालप्रश्नोत्तरम्, दौवारिक!=द्वाःस्थ! शान्तो भव=मौनं धारय, किमिति, व्यर्थम्=निष्प्रयोजनम्, मुमूर्षुरिति=मर्तुमिच्छुरिति, बधिरः=एडः इति च, वदसि=लपसि, इति वक्तारम्=वादिनम्, अपश्यतैव=अनवलोकमानेनैव, आकर्णि=श्रुता, मन्द्रस्वरमेदुरा=मद्धिमस्वरसान्द्र-स्निग्धा, वाणी=वाक्। अथ=उत्तरश्रवणोत्तरम्, तत् किं, नाज्ञायि=न ज्ञातः, अद्यापि=एतावत्सहस्रवासानन्तरमपि, भवता=श्रीमता, प्रभुवर्य्याणाम्=श्रेष्ठ-स्वामिनाम्, आदेशः=निर्देशः, यद् दौवारिकेण=द्वाःस्थेन, प्रहरिणा वा=यामिकेन वा, त्रिः=त्रिवारम्, पृष्टः=पृच्छाविषयीकृतः अपि, प्रत्युत्तरमददत्=अवदत्, हन्तव्यः=मारणीयः इति, इत्येवम्=इत्थम्प्रकारेण, भाषमाणेन=वदता, द्वाःस्थेन=द्वाररक्षकेन, क्षम्यताम्=क्षमाप्रदानेनानुग्राह्यताम्, एषः=सपदि, आगच्छामि=आयामि, आगत्य=आगम्य च, निखिलम्=सकलम्, निवेदयामि=कथयामि, इति=इत्थम्प्रकारेण, कथयन्=वदन्, द्वादशवर्षेण=आदित्यसङ्ख्यकवर्षेण, केनापि=अज्ञातेन, भिक्षुवटुना=भिक्षुकब्रह्मचारिणा, अनुगम्यमानः=अनुव्रज्यमानः, कोऽपि=अज्ञातनामा, काषायवासाः=गैरिक-वसनः, धृततुम्बीपात्रः=गृहीतकमण्डलुः, भस्मच्छुरितललाटः=भूतिविभूषिता-लिकः, रुद्राक्षमालिकासनाथितकण्ठः=रुद्राक्षमालाशोभिग्रीवः, भव्यमूर्तिः=दीव्यशरीरः, संन्यासी=चतुर्थाश्रमसेवी, दृष्टः=विलोकितः।

समासः—मन्द्रेण स्वरेण मेदुरा मन्द्रस्वरमेदुरा। कषायं वासः यस्यासौ कषायवासाः। धृतं तुम्बीपात्रं येन सः धृततुम्बीपात्रः। भस्मना च्छुरितं ललाटं यस्यासौ भस्मच्छुरितललाटः। रुद्राक्षस्य मालिकया सनाथितः कण्ठः यस्यासौ रुद्राक्षमालिकासनाथितकण्ठः। भव्या मूर्तिः यस्यासौ भव्यमूर्तिः।

विशेषः—(१) 'सान्द्रस्निग्धस्तु मेदुरः' (२) 'द्वित्रिश्चतुरिति कृत्वो-ऽर्थे' इति त्रिः।

(२५.) अथ यावद् द्वारस्थ-स्तम्भोपरि संस्थापितायां काच-मञ्जूषायां जाज्वल्यमानस्य प्रबल-प्रकाशस्य दीपस्य समीपे समायातः, तावत् संन्यासि-

नोक्तम्—'दौवारिक ! अपि मां पूर्वमपि कदाऽप्यद्राक्षीः ?' ततो दौवारिक पुनस्तं निपुणं निरीक्षमाणो मन्द्रेण स्वरेण, अरुणापाङ्गाभ्यां लोचनाभ्याम्, गौर तरेण वर्णेन, चुम्बितयौवनेन वयसा, निर्भीकेण हारिणा च मुखमण्डलेन पर्य चिनोत्। भुशुण्डी-समुत्तोलन-किण-कर्कश-करग्रहमपहाय, सलज्ज इव च नम्रीभूय प्रणमन्नुवाच—'आः ! कथं श्रीमान् गौरसिंह आर्यः ? क्षम्यतामनुचितव्यवहा एतस्य ग्राम्य-वराकस्य'। तदवधार्य तस्य पृष्ठे हस्तं विन्यस्यन् संन्यासिरूप गौरसिंहः समवोचत्।

उत्तरम्—प्रसङ्गः—श्रीमदम्बिकादत्तव्यासः शिवराजविजयस्य द्विती निश्वासे कपटसंन्यासिनो गौरसिंहस्य दौवारिकद्वारा परिचयं वर्णयत्यत्र।

व्याख्या—अथ = दुर्गाध्यक्षावागिगमनानन्तरम्, यावद्, द्वारस्थस्तम्भोपरि= द्वाःस्थस्तम्भोपरि, संस्थापितायाम् = स्थापितायाम्, काचमञ्जूषायाम्, जाज्वल्य मानस्य = देदीप्यमानस्य, प्रबलप्रकाशस्य=प्रकृष्टज्योतियुक्तस्य, दीपस्य, समीपे= निकटे, समायातः = समागतः, तावत् = तस्मिन् काले, संन्यासिना = गौरसिंहेन उक्तम् = लपितम्, दौवारिक != द्वारनिदेशवर्तिन् ! अपि = किम्; माम् = संन्या सिनम्, पूर्वमपि = प्रथममपि, कदाऽपि अद्राक्षीः = दृष्टवानसि। ततः = संन्यासि वाक्यश्रवणोत्तरम्, दौवारिकः = द्वारपालः, पुनः = भूयः, तं = संन्यासिरूप धारिणं गौरसिंहम्, निपुणम् = बाढम्. निरीक्षमाणः = अवलोकयमानः, मन्द्रे =गभीरेण, स्वरेण = शब्देन, अरुणापाङ्गाभ्याम् = रक्तनेत्रप्रान्ताभ्याम्, लोचना भ्याम् = नयनाभ्याम्, गौरतरेण = गोधूमाभेन, वर्णेन = रङ्गेन, चुम्बितयौवने =श्लिष्टयुवावस्थया, वयसा = अवस्थया, निर्भीकेण = भयरहितेन, हारिणा = मनोहरेण च, मुखमण्डलेन = वदनमण्डलेन, पर्यचिनोत् = परिचितवान् भुशुण्डीसमुत्तोलनकिणकर्कशकरग्रहम् = आयुधविशेषोत्थापनजन्यचिह्नविशेष कठोरहस्तग्रहणम्, अपहाय = दूरं कृत्वा, सलज्ज इव = सत्रप इव, नम्रीभूय= प्रह्वीभूय, प्रणमन्=नमस्कारं कुर्वन्, उवाच=अकथयत्, आः ! = अये ! कथम् किम्, श्रीमान् = शोभनश्रीः, आर्यः = मान्यः, गौरसिंहः = गौरबटुनाम्ना पूर्व मुद्धृतः ? क्षम्यताम् = मर्षयताम्, अनुचितव्यवहारः = असम्यक्भाषणरूपानु चितकथनव्यापारात्मकः, एतस्य = अस्य, ग्राम्यवराकस्य = अशिक्षितपामरस्य तदवधार्य = तत् कथितं हृदि विन्यस्य, तस्य = दौवारिकस्य, पृष्ठे = पृष्ठभागे हस्तम् = करम्, विन्यस्यन् = संस्थापयन्, संन्यासिरूपो गौरसिंहः = तुरीया श्रमस्थवेशो गौरसिंहः, समवोचत् = अकथयत्।

समासः—द्वारस्थस्य स्तम्भस्य उपरि द्वारस्थस्तम्भोपरि। काचस्य मञ्जूषायां काचमञ्जूषायाम्। प्रबलः प्रकाशः यस्य, तस्य प्रबलप्रकाशस्य। अरुणे अपाङ्गे ययोस्ताभ्याम् अरुणापाङ्गाभ्याम्। चुम्बितं यौवनं यत्र, तेन चुम्बितयौवनेन। भुशुण्ड्याः समुत्तोलनेन यः किणः, तेन कर्कशस्य करस्य ग्रहः, तं भुशुण्डीसमुत्तोलनकिणकर्कशकरग्रहम्। ग्राम्यस्य वराकस्य ग्राम्यवराकस्य।

(२६) 'दौवारिक! मया बहुशः परीक्षितोऽसि, ज्ञातोऽसि यथायोग्य एव पदे नियुक्तोऽसि चेति। त्वादृक्षा एव प्रभूणां पुरस्कारभाजनानि भवन्ति, लोकद्वयं च विजयन्ते। तव प्रामाणिकतां जानीत एवाऽत्रभवान् प्रभुवर्य्यः, परमहमपि विशिष्य कीर्तयिष्यामि। निर्दिश तावत्, कुत्र श्रीमान्? किं चानुतिष्ठति?

ततः पुनर्बद्धाञ्जलेर्दौवारिकस्य किमपि कर्णे कथितमाकर्ण्य प्रधानद्वारमुल्लङ्घ्य, नेदीयस्यामेकस्यां निम्बतरु-तल-वेदिकायां सहचरं समुपवेश्य, तुम्बीमेकतः संस्थाप्य, स्वाङ्गरक्षिकावरण-काषायवसनं चैकतो निम्बशाखायामवलम्बय्य, पटखण्डेन पक्ष्मणोः कपोलयोः कर्णयोर्भ्रुवोश्चिबुके नासायां केशप्रान्तेषु च छुरितामिव विभूतिं प्रोञ्छ्य, स्कन्धयोः पृष्ठे च लम्बमानान् मेचकान् कुञ्चितान् कचानाबध्य, सहचरपोटलिकात उष्णीषमादाय, शिरसि चाऽऽधाय, सुन्दरमुत्तरीयं चैकं स्कन्धयोर्निक्षिप्य, दौवारिक-निर्देशानुसारं श्रीशिववीरालङ्कृतामट्टालिकां प्रति प्रतिष्ठत।

प्रसङ्गः—गौरसिंहो दौवारिकं ब्रूतेऽत्र द्वितीये निश्वासेऽम्बिकादत्तव्यासविरचितस्य शिवराजविजयस्य।

व्याख्या—दौवारिक! = द्वारपाल! मया = गौरसिंहेन, बहुशः = भूरिशः, परीक्षितोऽसि = कृतपरीक्षणोऽसि, ज्ञातोऽसि = अवगतोऽसि, यथायोग्ये एव, पदे = स्थाने, नियुक्तोऽसि = स्थापितोऽसि चेति। त्वादृक्षा = त्वद्विधा एव, प्रभूणाम् = राज्ञाम्, पुरस्कारभाजनानि = उपायनपात्राणि, भवन्ति = सन्ति, लोकद्वयम् = जगदुभयम्, च विजयन्ते। तव = भवतः, प्रामाणिकताम् = नियमनिष्ठतां प्रमुखतां वा, जानीते = जानाति एव, अत्रभवान् = पूज्यः, प्रभुवर्य्यः = स्वामिवरः, परमहमपि = किन्त्वहमपि, विशिष्य = विशेषरूपेण, कीर्तयिष्यामि = कथयिष्यामि। निर्दिश = आवेदय, कुत्र = कस्मिन् प्रदेशे, श्रीमान् = शोभासम्पन्नः? (शिवराज इति) किं चानुतिष्ठति? = करोति च किम्?

ततः = प्रश्नानन्तरम्, पुनः = भूयः, बद्धाञ्जलेः = निर्मितकरसम्पुटस्य, दौवारिकस्य = द्वाःस्थस्य, किमपि = किञ्चिदपि, कर्णे = श्रोत्रे, कथितम् = लपितम्, आकर्ण्य

=श्रुत्वा, प्रधानद्वारम्=गोपुरम्, उल्लङ्घ्य=समुत्तीर्य, नेदियस्याम्=समीपस्थायाम्, एकस्याम्=अन्यतमायाम्, निम्बतरुतलवेदिकायाम्=निम्बवृक्षाधस्तलवर्तिस्थण्डिले, सहचरम्=सहयात्रिणम्, समुपवेश्य=स्थापयित्वा, तुम्बीम्=अलाबूपात्रम्, एकतः=एकस्मिन् भागे, संस्थाप्य, स्वाङ्गरक्षिकावरणकाषायवसनम्=निजकञ्चुकाच्छादकगैरिकवस्त्रम्, चैकतः=अपरस्मिन् भागे, निम्बशाखायाम्, अवलम्ब्य=अवलम्बितं कारयित्वा, पटखण्डेन=वसनांशेन, पक्ष्मणोः=अक्षिलोम्नोः, कपोलयोः=गण्डयोः, कर्णयोः=श्रोत्रयोः, भ्रुवोः चिबुके=वदनाधोभागे, नासायाम्=नासिकायाम्, केशप्रान्तेषु=बालभागेषु च, छुरिताम्=व्याप्ताम्, इव=यथा, विभूति=भस्म, प्रोञ्छ्य=मार्जयित्वा, स्कन्धयोः=अंशयोः, पृष्ठे च, लम्बमानान्=विलम्बिनः, मेचकान्=कृष्णकेशान्, कुञ्चितान्=वक्रान्, कचान्=बालान्, आबध्य=बन्धनयुक्तान् कृत्वा, सहचरपोटलिकातः=सहयात्रिलघुमञ्जूषातः, उष्णीषमादाय=शिरोवेष्टनं गृहीत्वा, शिरसि=मस्तके, चाधाय=धारयित्वा, सुन्दरम्=मनोहरम्, चोत्तरीयम्=दुकूलं चैकम्, स्कन्धयोः=अंशयोः, निक्षिप्य=संस्थाप्य, दौवारिकनिर्देशानुसारम्=द्वारपालसङ्केतानुसारम्, श्रीशिववीरालङ्कृताम्=श्रीशिवराजविभूषिताम्, अट्टालिकाम्=प्रासादम्प्रति, प्रतिष्ठत=जगाम ।

समासः—पुरस्काराय भाजनानि पुरस्कारभाजनानि । बद्धोऽञ्जलिर्येन यस्य, तस्य बद्धाञ्जलेः । निम्बस्य तरोः तले वेदिकायां निम्बतरुतलवेदिकायाम् । स्वाङ्गरक्षिकावरणं यत् काषायवसनं तत् स्वाङ्गरक्षिकावरणकाषायवसनम् । निम्बस्य शाखायां निम्बशाखायाम् । पटस्य खण्डेन पटखण्डेन । सहचरस्य पोटलिकातः सहचरपोलिकातः । दौवारिकस्य निर्देशानुसारं दौवारिकनिर्देशानुसारम् । श्रीशिववीरेण अलङ्कृतां श्रीशिववीरालङ्कृताम् ।

कोषः—'पक्ष्माक्षिलोम्नि' इत्यमरः ।

(२७) शिववीरस्तु कस्याञ्चिच्चन्द्रचुम्बिन्यां सान्द्र-सुधासार-संलिप्त-भित्तिकायां धूपधूपितायां गजदन्तिकावलम्बित-विविध-च्छुरिकाखड्गरिष्टिकायां सुवर्ण-पिञ्जर-परिलम्बमान-शुक-पिक-चकोर-सारिका-कल-कूजित-गूंजितायामट्टालिकायां सन्ध्यामुपास्योपविष्ट आसीत् । परितश्च तस्यैव खर्वामप्यखर्व-पराक्रमां श्यामामपि यशः-समूह-श्वेतीकृत-त्रिभुवनां कुशासनाश्रयामपि सुशासनाश्रयां पठन-पाठनादि-परिश्रमानभिज्ञामपि नीतिनिष्णातां स्थूलदर्शनामपि सूक्ष्म-दर्शनां ध्वंसकाण्डव्यसनिनीमपि धर्म-धौरेयीं कठिनामपि कोमलाम् उग्रामपि शान्तां

शोभितविग्रहामपि दृढसन्धि-बन्धां कलित-गौरवामपि कलित-लाघवां विशाल-ललाटां प्रचण्ड-बाहुदण्डां शोणापाङ्गां कम्बुग्रीवां सुनद्धस्नायुं वर्तुल-श्याम-श्मश्रुं धारिताकृतिमिव वीरतां विग्रहिणीमिव धारतां समासादित-समर-स्फूर्ति मूर्ति दर्शं दर्शं परं प्रसादमासादयन्तस्तस्य वयस्याः कटानध्यवसन् । तेषु च अपजलखान-दमनविषयकवार्तामारिप्सुष्वेव कश्चिद् वेत्रहस्तः प्रतीहारः प्रविश्य, वेत्रं कक्षे संस्थाप्य शिरो नमयित्वा, अञ्जलिं बद्ध्वा न्यवीविदत्—'प्रभो ! श्रीमान् गौरसिंहो दिदृक्षतेऽत्रभवन्तम्'—तदाकर्ण्य 'आम् ! प्रवेशय प्रवेशय' इति सानन्दं सोत्साहं च कथितवति महाराष्ट्रमण्डलाऽऽखण्डले, प्रतीहारो निवृत्य, सपद्येव तं प्रावीविशत् ।

प्रसङ्गः—गौरसिंहकृतं शिववीरदर्शनं वर्णयत्यत्र श्रीमदम्बिकादत्तव्यासः शिवराजविजयस्य द्वितीयनिश्वासे ।

व्याख्या—शिववीरस्तु=शिवाजी इति नाम्ना ख्यातो भटस्तु, (कस्याश्चित्) चन्द्रचुम्बित्याम्=गगनचुम्बिन्याम्, सान्द्रसुधासारसंलिप्तभित्तिकायाम्=गाढ-चूर्णद्रव्यरुषितभित्तिकायाम्, धूपधूपितायाम्=गुग्गुलगन्धवत्याम्, गजदन्तिकाव-लम्बितविविधच्छुरिकाखड्गरिष्टिकायाम्=भित्तिशङ्कुस्थापिताऽसिधेनुकाऽसिरि-ष्टिकायाम्, सुवर्णपिञ्जरपरिलम्बमानशुकपिकचकोरसारिकाकलकूजितपूजिता-याम्=स्वर्णपक्षिपालनयन्त्रावलम्बितकीरकोकिलजीवञ्जीवशारिकाकलरवसमन्वि-तायाम्, अट्टालिकायाम्=प्रासादे, सन्ध्यामुपास्य=कृत्वा, उपविष्टः=स्थितः, आसीत् । परितश्च=सर्वतश्च, तस्यैव=शिववीरस्यैव, खर्वाम्=लघ्वाकाराम्, अपि, अखर्वपराक्रमाम्=महापराक्रमशालिनीम्, श्यामाम्=कृष्णामपि, यशः-समूहश्वेतीकृतत्रिभुवनाम्=कीर्तिकूटधवलितत्रिलोकीम्, कुशासनाश्रयामपि=दर्भविष्टरसमाश्रितामपि, सुशासनाश्रयाम्=सुन्दरप्रशासनाश्रयाम्, पठनपाठनादि-परिश्रमानभिज्ञामपि=ज्ञानार्जनज्ञानदानादिपरिश्रमबोधरहितामपि, नीतिनिष्णा-ताम्=राजनयनिपुणाम्, स्थूलदर्शनामपि=दीर्घनयनामपि, सूक्ष्मदर्शनाम्=कर्तव्याकर्तव्यविचारशीलाम्, ध्वंसकाण्डव्यसनिनीमपि=विधर्मिहिंसनव्यसनोप-युक्तामपि, धर्मधौरेयीम्=धर्मभारधारिणीम्, कठिनामपि=कोमलेतरामपि (शत्रुवधे), कोमलाम्=(धर्मपालने) मृदुस्वभावाम्, उग्रामपि=(युद्धकाले) तीक्ष्णामपि, शान्ताम्=(धर्मकार्ये) शान्तस्वभावाम्, शोभितविग्रहामपि=सुन्दरदेहाम् (न च सुन्दरयुद्धाम्), अपि दृढसन्धिबन्धाम्=सुगठितकलेवराम् (न च दृढसन्धिप्रस्तावाम्), कलितगौरवामपि=गाम्भीर्ययुक्तामपि, लाघवाम्

=चातुर्यपेशलाम्, विशालललाटाम्=दीर्घभालाम्, प्रचण्डबाहुदण्डाम्=वलिष्ठभुजाम्, शोणापाङ्गाम्=रक्तकटाक्षाम्, कम्बुग्रीवाम्=शङ्खकण्ठाम्, सुनद्धस्नायुम्=सुश्लिष्टस्नायुम्, वर्तुलश्यामश्मश्रुम्=गोलाकारकृष्णश्मश्रुम्, धारिताकृतिमिव=धृतविग्रहामिव, वीरताम्=शूरताम्, विग्रहिणीमिव=शरीरधारिणीमिव, धीरताम्=धैर्यभावाम्, समासादितसमरस्फूर्तिम्=लब्धयुद्धस्फूर्तिम्, मूर्तिम्=देहम्, दर्शं दर्शम्=दृष्ट्वा दृष्ट्वा, परम्=श्रेष्ठम्, प्रसादम्=हर्षम्, आसादयन्तः=लभमानाः, तस्य=शिववीरस्य, वयस्याः=सहचराः, कटान्=तृणविष्टरान्, अध्यवसन्=अध्यासन्ते स्म। तेषु=सहचरेषु च, अपजलखानदमनविषयकवार्तामारिप्सुष्वेव=रिपुनिग्रहविषयकचर्चां प्रारम्भं चिकीर्षुषु एव, कश्चिद्=कोऽपि, वेत्रहस्तः=वेत्रधारी, प्रतीहारः=द्वारपालः, प्रविश्य=प्रवेशं विधाय, वेत्रम्=दण्डम्, कक्षे=पार्श्वे, संस्थाप्य=स्थापयित्वा, शिरो=मस्तकं, नमयित्वा=प्रणम्य, अञ्जलिम्=करद्वयसम्पुटम्, बद्ध्वा=कृत्वा, न्यवीवदत्=अकथयत्—प्रभो!=स्वामिन्! श्रीमान्=शोभासम्पन्नः, गौरसिंहः, दिदृक्षते=द्रष्टुं इच्छति, अत्रभवन्तम्=पूज्यम्। तदाकर्ण्य=तत् श्रुत्वा, आम् प्रवेशय=शोभनम् आनय, प्रवेशय=आनय, इति सानन्दम्=सहर्षम्, सोत्साहम्=उत्साहपूर्वकञ्च, कथितवति=वदति, महाराष्ट्रमण्डलाऽऽखण्डले=महाराष्ट्रपाकशासने, प्रतीहारः=द्वारपालः, निवृत्य=परावृत्य, सपद्येव=शीघ्रमेव, तम्=गौरसिंहम्, प्रावीविशत्=आभ्यन्तरं नीतवान्।

समासः—चन्द्रं चुम्बति इति चन्द्रचुम्बिनी, तस्यां चन्द्रचुम्बिन्याम्। सान्द्रेण सुधाधारेण संलिप्ताः भित्तिकाः यस्यां, तस्यां सान्द्रसुधाधारसंलिप्तभित्तिकायाम्। धूपेन धूपितायां धूपधूपितायाम्। गजदन्तिकायाम् अवलम्बिताः विविधाः छुरिकाखड्गरिष्टिकाः यस्यां, तस्याम्। सुवर्णस्य पिञ्जरेषु परिलम्बमानानां शुकपिकचकोरसारिकाणां कलकूजितैः पूजितायाम्। अखर्वः पराक्रमो यस्यां, ताम्। यशःसमूहेन श्वेतीकृतं त्रिभुवनं यया, ताम्। कुशानाम् आसनम् आश्रयः यस्यास्ताम्। सुशासनस्य आश्रयो यस्याम्। तां पठनं च पाठनं च आदौ यस्य, तद् पठनपाठनादि, तत्र परिश्रमम्, तत्र अनभिज्ञाम्। नीतौ निष्णाताम्। स्थूलं दर्शनं यस्यास्ताम्। सूक्ष्मं दर्शनं यस्यास्ताम्। ध्वंसकाण्डस्य व्यसनमस्ति यस्यां ताम्। धर्मस्य धौरेयीम्। शोभितः विग्रहो यस्यास्ताम्। दृढः सन्धिबन्धः यस्यास्ताम्। कलितः गौरवो यया सा, ताम्। कलितः लाघवो यया सा, ताम्। विशालं ललाटं यस्यास्ताम्। प्रचण्डौ बाहुदण्डौ यस्यास्ताम्। शोणितौ अपाङ्गौ

यस्यांस्ताम् । कम्बु इव ग्रीवा यस्याः, ताम् । सुनद्धाः स्नायवो यस्याताम् । वर्तुलं श्यामं च श्मश्रु यस्यास्ताम् । धारिता आकृति यया, ताम् । समासादिता समरे स्फूर्तिः यया ताम् । वेत्रं हस्ते यस्यासौ । आनन्देन सह । उत्साहेन सह । महाराष्ट्रमण्डलस्य आखण्डले ।

विशेष—(१) चन्द्रचुम्बिन्यामित्यत्र अतिशयोक्तिः । (२) खर्वामप्यखर्वपराक्रमामित्यतः प्रारभ्य कलितलाघवामित्यन्तं यावत् विरोधाभासः अलङ्कारः । (३) 'कटान्' इत्यत्र 'उपान्वध्याङ्वसः' इति कर्मत्वमाधारस्य । (४) दिदृक्षते इत्यत्र 'ज्ञाश्रुस्मृदृशां सनः' इत्यात्मनेपदत्वम् ।

(२८) तमवलोक्यैव 'इत इतो गौरसिंह ! उपविश । चिराय दृष्टोऽसि, अपि कुशलं कलयसि ? अपि कुशलिनस्तव सहवासिनः ? अप्यङ्गीकृतमहाव्रतं निर्वहथ यूयम् ? अपि कश्चिन्नूतनो वृत्तान्तः ?' इति कुसुमानीव वर्षता पीयूषप्रवाहेणेव सिञ्चता मृदुना वचनजातेन तत्रभवता शिववीरेणाऽऽद्रियमाणः, आपृच्छयमानश्च, त्रिः प्रणम्य, अन्तरङ्ग-मण्डली-जुष्ट-कटे समुपविश्य, करौ सम्पुटीकृत्य 'भगवन् ! अखिलं कुशलं प्रभूणामनुग्रहेणाऽस्माकमखिलानाम् अङ्गीकृत-महाव्रते च मा स्म पदं धात् कश्चनान्तराय इत्येव सदा प्रार्थ्यते भगवान् भूतनाथः । नूतनः प्रत्नश्च को नामाद्यतनसमये वक्तव्यः श्रोतव्यश्च वृत्तान्तः—ऋते दुराचारात् स्वच्छन्दानामुच्छृङ्खलानामुच्छिन्नसच्छीलानां म्लेच्छहतकानाम्' इति कथयामास ।

प्रसङ्गः—श्रीमदम्बिकादत्तव्यासविरचितशिवराजविजयस्य द्वितीयनिश्वासात् गृहीतोऽयमंशः । शिववीरगौरसिंहवार्तालापस्यायं प्रथमोंऽशः व्याख्यानाय दत्तः ।

व्याख्या—तम् = गौरसिंहम्, अवलोक्यैव = दृष्ट्वैव, इत इतः = अत्रागच्छ, अत्रागच्छ, गौरसिंह ! उपविश, उपविश = तिष्ठ तिष्ठ, चिराय = चिररात्राय, दृष्टोऽसि = नेत्रपथमागतोऽसि, अपि = किम्, कुशलम् = कल्याणम्, कलयसि = धारयसि ? अपि = किम्, कुशलिनः = कल्याणयुक्ताः, तव = भवतः, सहवासिनः = सहवास्तव्याः ? अपि = किम्, अङ्गीकृतमहाव्रतम् = स्वीकृतमहोत्सवम्, निर्वहथ = धारयथ यूयम् ? अपि = किम्, कश्चिन्नूतनः = नवीनः, वृत्तान्तः = समाचारः ? इति कुसुमानीव = पुष्पाणीव, वर्षता = प्रकिरता, पीयूषप्रवाहेणेव = सुधास्रोतसेव, सिञ्चता = वर्षता, मृदुना = कोमलेन, वचनजातेन = वाक्यविन्यासेन, तत्रभवता = पूज्येन, शिववीरेण = शिवराजेन, आद्रियमाणः = समाद्रियमाणः, आपृच्छ्यमानः = प्राप्तप्रश्नश्च, त्रिः = त्रिवारम्, प्रणम्य = नमस्कृत्य,

अन्तरङ्गमण्डलीजुष्टकटे = गुप्तसमितिसेवितविष्टरे, समुपविश्य = स्थित्वा, कां = हस्तौ, सम्पुटीकृत्य = मुकुलीकृत्य, भगवन् !=श्रीमन् ! अखिलम्=निखिलम् कुशलम् = क्षेमम्, प्रभूणाम् = राज्ञाम्, अनुग्रहेण=कृपया, अस्माकम् = मद्विधा नाम्, अखिलानाम् = सकलानाम्, अङ्गीकृतमहाव्रते = स्वीकृतमहाव्रते, मा स पदं धात् = न पदमारोपयेत्, कश्चन = कोऽपि, अन्तरायः = प्रत्यूहः, इत्येव, स = सर्वदा, प्रार्थ्यते = निवेद्यते, भगवान् भूतनाथः = विश्वनाथः । नूतनः = नव प्रत्नश्च = पुराणश्च, को नाम, अद्यतनसमये = सम्प्रति, वक्तव्यः = वाच्यः श्रोतव्यश्च = श्रवणीयश्च, वृत्तान्तः = समाचारः, ऋते = विना, दुराचारात् = कदाचारात्, स्वच्छन्दानाम् = स्वतन्त्राणाम्, उच्छृङ्खलानाम्=मर्यादारहितानाम् उच्छिन्नसच्छीलानाम् = समाप्तसकलसदाचाराणाम्, म्लेच्छहतकानाम् = दुष्ट यवनानाम्, इति कथयामास = अकथयत् ।

समासः—वचनानां जातेन वचनजातेन । अन्तरङ्गानां मण्डल्या जुष्टे क अन्तरङ्गमण्डलीजुष्टकटे ।

(२९) गौरसिंहः—भगवन् ! सर्वं सुसिद्धम्, प्रतिगव्यूत्यन्तरालमङ्गीकृत सनातनधर्म-रक्षामहाव्रतानां धारित-मुनि-वेषाणां वीरवराणामाश्रमाः सन्ति। प्रत्याश्रमं च वलीकेषु गोपयित्वा स्थापिता परश्शताः खड्गाः, पटलेषु तिरो भाविताः शक्तयः, कुशपुञ्जान्तः स्थापिता भुशुण्डयश्च समुल्लसन्ति । उञ्छस्य शिलस्य, समिदाहरणस्य, इङ्गुदी-पर्य्यन्वेषणस्य, भूर्जपत्र-परिमार्गणस्य, कुसुमा वचयनस्य, तीर्थाटनस्य सत्सङ्गस्य च व्याजेन, केचन जटिलाः, परे मुण्डिनः इतरे काषायिणः, अन्ये मौनिनः, अपरे ब्रह्मचारिणश्च बहवः पटवो बटवश्चरा सञ्चरन्ति । विजयपुराडुड्डीयाऽत्राऽऽगच्छन्त्या मक्षिकाया अप्यन्तःस्थितं व विद्मः, किं नाम एषां यवनहतकानाम् ?

सन्दर्भः—शिववीरगौरसिंहवार्तालापप्रसङ्गेऽयमपरो गद्यखण्डः गौरसिंह प्रोक्तः दत्तो व्याख्यानाय, श्रीमदम्बिकादत्तव्यासविरचितशिवराजविजयस्य द्विती निश्वासे ।

व्याख्या—गौरसिंहः कथयति—भगवन् != श्रीमन् ! सर्वम् = सकलम् सुसिद्धम् = कृतम्, प्रतिगव्यूत्यन्तरालम् = प्रत्येकक्रोशद्वयमध्ये, अङ्गीकृतसनातन धर्मरक्षामहाव्रतानाम् = स्वीकृतार्यधर्मरक्षाव्रतानाम्, धारितमुनिवेषाणाम् = कलितमुनिस्वरूपाणाम्, वीरवराणामाश्रमाः = भटानामावासाः, सन्ति = वर्तन्ते प्रत्याश्रमं च = प्रत्येकेष्वावासेषु च, वलीकेषु = पटलप्रान्तेपु, गोपयित्वा =

सङ्गोप्य, स्थापिताः = निहिताः, परश्शताः = शताधिकाः, खड्गाः = असयः, पटलेषु = शुष्कपलाशेषु, तिरोभाविताः = गोपिताः, शक्तयः = शस्त्रविशेषाः, कुशपुञ्जान्तः = दर्भसमूहाभ्यन्तरे, स्थापिताः = निहिताः, भुशुण्डयश्च = बन्दूक-नामकास्त्रविशेषाश्च, समुल्लसन्ति = विलसन्ति, उञ्छस्य = कणश आदानस्य, शिलस्य = क्षेत्रादौ स्वामित्यक्तानां कणिशानां ग्रहणस्य, समिदाहरणस्य = यज्ञेन्धनानयनस्य, इङ्गुदीपर्यन्वेषणस्य = पिण्याकमार्गणस्य, भूर्जपत्रपरिमार्गणस्य = भूर्जपत्रान्वेषणस्य, कुसुमावचयनस्य = पुष्पसङ्कलनस्य, तीर्थाटनस्य = तीर्थभ्रमणस्य, सत्सङ्गस्य = सज्जनसम्पर्कस्य, च व्याजेन, केचन जटिलाः = जटाधारिणः, परे = इतरे, मुण्डिनः = मुण्डितमस्तकाः, इतरे = अन्ये, काषायिणः = गैरिकवसनाः, अन्ये = अपरे, मौनिनः = मूकताश्रयिणः, अपरे = इतरे, ब्रह्मचारिणश्च = वटवश्च, बहवः = भूरिशः, पटवः = निपुणाः, वटवः = ब्रह्मचारिणः, चराः = स्पशाः, सञ्चरन्ति = विचरन्ति, विजयपुरात् = रिपुनगरादेतन्नामकात्, उड्डीय = उत्पत्य, अत्र = भवत्समीपम् । आगच्छन्त्या = आयान्त्या, मक्षिकाया अपि, अन्तःस्थितम् = हृदये वर्तमानं भावम्, वयम् = चराः, विद्मः = जानीमः, किं नाम = का कथा, एषाम् = वार्ताविषयत्वेन समुपस्थितानाम्, यवनहतकानाम् = दुष्टयवनानाम् ?

समासः—गव्यूतिं गव्यूतिं प्रति प्रतिगव्यूति, तदेवान्तरालं यत्र तत् प्रतिगव्यूत्यन्तरालम् । अङ्गीकृतं सनातनधर्मरक्षायाः महाव्रतं यैस्तेषां अङ्गीकृतसनातनधर्मरक्षामहाव्रतानाम् । धारितः मुनीनां वेषः यैस्तेषां धारितमुनिवेषाणाम् । आश्रमम् आश्रमं प्रति प्रत्याश्रमम् । कुशानां पुञ्जः तमन्तःस्थापिताः कुशपुञ्जान्तःस्थापिताः । समिधाम् आहरणस्य समिदाहरणस्य । इङ्गुद्याः पर्यन्वेषणस्य इङ्गुदीपर्यन्वेषणस्य । भूर्जपत्राणां परिमार्गणस्य भूर्जपत्रपरिमार्गणस्य । कुसुमानामवचयनस्य । तीर्थानामटनस्य । सतां सङ्गस्य ।

कोषः—'उञ्छः कणश आदानं कणिशाद्यर्जनं शिलम्' इत्यमरः ।

(३०) **शिववीरः**—साधु साधु, कथं न स्यादेवम् ? भारतवर्षीया यूयम्, तत्रापि महोच्चकुलजाताः, अस्ति चेदं भारतं वर्षम्, भवति च स्वाभाविक एवानुरागः सर्वस्यापि स्वदेशे, पवित्रतमश्च यौष्माकीणः सनातनो धर्मः, तमेते जाल्माः समूलमुच्छिन्दन्ति, अस्ति च 'प्राणा यान्तु, न च धर्मः' इत्यार्याणां दृढः सिद्धान्तः । महान्तो हि धर्मस्य कृते लुण्ठ्यन्ते, पात्यन्ते, हन्यन्ते, न धर्मं त्यजन्ति; किन्तु धर्मस्य रक्षायै सर्वसुखान्यपि त्यक्त्वा, निशीथेष्वपि, वर्षास्वपि, ग्रीष्म-धर्मेष्वपि,

महारण्येष्वपि, कन्दरिकन्दरेष्वपि, व्यालवृन्देष्वपि, सिंह-सङ्घेष्वपि, वारण-वारेष्वपि, चन्द्रहास-चमत्कारेष्वपि च निर्भया विचरन्ति । तद् धन्याः स्थ यूयं वस्तुत आर्यवंशीयाः वस्तुतश्च भारतवर्षीयाः ।

उत्तरम्—प्रसङ्गः—श्रीमदम्बिकादत्तव्यासविरचितशिवराजविजयस्य द्वितीयनिश्वासात् गृहीतोऽयमंशः । शिववीरस्योक्तिरियं गौरसिंहं प्रति ।

व्याख्या—शिववीरः = शिवाजी, इति नाम्ना प्रसिद्धः, साधु साधु = सुष्ठु सुष्ठु, कथम् = किम्, न = नहि, स्यादेवम् = इत्थं भवेत् ? भारतवर्षीया = हिन्दुस्थानीया, यूयम् = भवन्तः, तत्रापि, महोच्चकुलजाताः = लब्धप्रतिष्ठवंशोत्पन्नाः, अस्ति = वर्तते, चेदं, भारतवर्षम् = हिन्दुस्थानम्, भवति च, स्वाभाविकः = नैष्ठिकः, एवानुरागः = प्रेम, सर्वस्यापि = सकलस्यापि, स्वदेशे = निजमातृभूमौ, पवित्रतमश्च = पूततमश्च, यौष्माकीणः = युष्माकम्, सनातनः = वैदिकः धर्मः, तम् = वैदिकं धर्मम्, एते = यवनाः, जाल्माः = अविवेकिनः, समूलमुच्छिन्दन्ति = आमूलादुत्पाटयन्ति, अस्ति च, प्राणाः = असवः, यान्तु = निर्गच्छन्तु, न च, धर्मः (गच्छतु इति शेषः) इत्यार्याणाम् = वैदिकमतावलम्बिनाम्, दृढः = कठोरः, सिद्धान्तः = नियमः, महान्तः = महामहिमशालिनः, हि, धर्मस्य, कृते, लुण्ठ्यन्ते = चोर्यन्ते, पात्यन्ते = पर्वताद्युच्चस्थानात् अधो नीयन्ते, हन्यन्ते = मार्यन्ते, न धर्मं, त्यजन्ति = मुञ्चन्ति, किन्तु धर्मस्य, रक्षायै = रक्षणाय, सर्वसुखान्यपि = सकलशर्माण्यपि, त्यक्त्वा = परित्यज्य, निशीथेष्वपि = अर्धरात्रेष्वपि, वर्षास्वपि = प्रावृषि, ग्रीष्मघर्मेष्वपि = निदाघधूपेष्वपि, महारण्येष्वपि = भयानकजङ्गलेष्वपि, कन्दरिकन्दरेष्वपि = पर्वतगह्वरेष्वपि, व्यालवृन्देष्वपि = सर्पगणेष्वपि, सिंहसङ्घेष्वपि = व्याघ्रसमूहेष्वपि, वारणवारेष्वपि = हस्तिगणेष्वपि, चन्द्रहासचमत्कारेष्वपि = खड्गप्रभामण्डलेष्वपि = च, निर्भयाः = भयरहिताः, विचरन्ति = चलन्ति, तद् धन्याः = पुण्यनामानः स्थ, यूयं वस्तुतः = यथार्थतः, आर्यवंशीयाः = आर्यजातिसमुत्पन्नाः, वस्तुतश्च = याथार्थ्येन च, भारतवर्षीयाः = हिन्दुस्थानीयाः ।

समासः—महोच्चे कुले जाताः महोच्चकुलजाताः । सर्वाणि सुखानि सर्वसुखानि । ग्रीष्मस्य घर्मेषु ग्रीष्मघर्मेषु । कन्दरीणां कन्दरेषु कन्दरिकन्दरेषु । व्यालानां वृन्देषु व्यालवृन्देषु । सिंहानां सङ्घेषु सिंहसङ्घेषु । वारणानां वारेषु वारणवारेषु । चन्द्रहासानां चमत्कारेषु चन्द्रहासचमत्कारेषु ।

कोषः—'जाल्मोऽसमीक्ष्यकारी स्यात्', 'स्तोमौघनिकरव्रातवारसङ्घात-सञ्चयाः' इत्युभयत्राप्यमरः ।

(३१) 'भगवन् ! सर्पाकारैरक्षरैः पारस्य भाषायां लिखितं पत्त्रमेतदस्ति । एतस्य सारांशोऽयमस्ति—विजयपुराधीशः स्वप्रेषितमपजलखानं सेनापतिं सम्बोध्य लिखति यत्—'वीरवर ! महाराष्ट्र-राजेन सह योद्धुं प्रस्थितोऽसीति मा स्म भूत् कश्चनान्तरायस्तव विजये । शिवं युद्धे जेष्यसि चेत्, पद्भ्यां सिंहं जितवानसीति मंस्ये, किन्तु सिंहहननापेक्षया जीवितः सिंहस्य वशीकार एवाधिकं प्रशस्यः । तद् यदि छलेन जीवन्तं शिवमानयेः, तद् वीरपुङ्गवोपाधि-दानसहकारेण तव महतीं पदवृद्धिं कुर्य्याम् । गोपीनाथपण्डितोऽपि मया तव निकटे प्रस्थापितोऽस्ति, स मम तात्पर्यं विशदीकृत्य तव निकटे कथयिष्यति । प्रयोजनवशेन शिवमपि साक्षात्करिष्यति' इति ।

प्रसङ्गः—गौरसिंहोऽत्र दर्शयति शिववीरं विजयपुराधीशपत्रं श्रीमदम्बिका-दत्तव्यासविरचितशिवराजविजयस्य द्वितीये निश्वासे ।

व्याख्या—भगवन् !=श्रीमन् ! सर्पाकारैरक्षरैः=भुजङ्गाकारैर्वर्णैः, पार-स्यभाषायाम्=पारसीकवाचि, लिखितं पत्त्रमेतत्, अस्ति=वर्तते, एतस्य=पत्रस्य, सारांशोऽयमस्ति=मुख्यविषयवस्तु त्विदमस्ति, विजयपुराधीशः=वीजापुरनरेशः, स्वप्रेपितमरजलखानम्=निजप्रहितमपजलखाननामानम्, सेना-पतिम्=गणनायकम्, सम्बोध्य लिखति यत्, वीरवर !=भटश्रेष्ठ ! महाराष्ट्र-राजेन=शिववीरेण, सह=साकम्, योद्धुं प्रस्थितोऽसि=गतोऽसि, इति मा स्म भूत्=न भवेत् कश्चित्, अन्तरायः=विघ्नम्, तव=अपजलखानस्य, विजये=जयकर्मणि । शिवम्=शिववीरम्, युद्धे=समरे, जेष्यसि=वशीकरिष्यसि, चेत्=यदि, पद्भ्याम्=चरणाभ्याम्, सिंहम्=शिववीरं केसरिणम्, जितवानसीति मंस्ये=वशीकृतवानसीति स्वीकरिष्ये, किन्तु=परन्तु, सिंहहननापेक्षया=व्याघ्रव्यापादनापेक्षया, जीवितः=सजीवस्य, प्राणतः, सिंहस्य=व्याघ्रस्य, व्यञ्जनया शिववीरस्य, वशीकारः=निग्रहः, एवाधिकम्=बहु, प्रशस्यः=प्रशंसाविषयः । तद् यदि=चेत्, छलेन=कपटेन, जीवन्तम्=प्राणन्तम्, शिवम्=शिववीरम्, आनयेः=प्रापयेः, तद्, वीरपुङ्गवोपाधिदानसहकारेण=भटोद्-भटोपाधिदानपूर्वकम्, तव=अपजलखानस्य, महतीम्=भूयसीम्, पदवृद्धिम्=स्थानवर्धनम्, कुर्य्याम्=करिष्यामि । गोपीनाथपण्डितोऽपि=एतन्नामा सन्देश-वाहकोऽपि, मया=विजयपुरेश्वरेण, तव=अपजलखानस्य, निकटे=समीपे,

प्रस्थापितोऽस्ति = प्रहितोऽस्ति, सः = गोपीनाथः, मम = विजयपुरेश्वरस्य, तात्पर्यम् = भावम्, विशदीकृत्य = स्पष्टीकृत्य, तव = अपजलखानस्य, निकटे = समीपे, कथयिष्यति = वक्ष्यति, प्रयोजनवशेन = कार्यवशेन, शिवमपि = शिव-वीरमपि, साक्षात्करिष्यति = अवलोकयिष्यतीति ।

समासः—पारस्यानां भाषायां पारस्यभाषायाम् । महाराष्ट्राणां राजा महाराष्ट्रराजः, तेन । सिंहस्य हननस्यापेक्षया सिंहहननापेक्षया । वीरपुङ्गवा उपाधेः दानस्य सहकारेण । पदस्य वृद्धिं पदवृद्धिम् । प्रयोजनस्य वशेन प्रयोजनवशेन ।

विशेषः—विजयपुरेशः शिववीरं सिंहादपि भयङ्करं मन्यते इति व्यञ्जना निदर्शनालङ्कारश्च ।

(३२) तदवगत्य 'सोऽयं गोपीनाथः, सोऽयं गोपीनाथः' इति साम्रेडं सत सोत्साहं च व्याहृतवत्सु निखिलेषु, शिववीरेण निजबाल्यप्रियो माल्यश्रीकनामा सम्बोध्य कथितो यद् 'गम्यतां दुर्गान्तर एव महावीरमन्दिरे तस्मै वासस्था दीयताम्, भोज्य-पर्यङ्कादि-सुखद-सामग्रीजातेन च सत्क्रियताम्, ततोऽहमपि साक्षात्करिष्यामि'—इति ।

ततो 'बाढमि'त्युक्त्वा प्रयाते माल्यश्रीके; 'महाराज ! आज्ञा चेदहमद्य अपजलखानं कथमपि साक्षात्कृत्य, तस्याऽखिलं व्यवसितं विज्ञाय प्रभुचरणे विनिवेदयामि; नाधुना मम क्षान्तिः शान्तिश्च, यतः संन्यासिवेषोऽहं समागच्छ द्वयोर्यवनभटयोर्वार्तयाऽवागमम्, यत् श्व एवैते युयुत्सन्ते' इति गौरसिंहो मन कर्णान्तिकं व्याहार्षीत् ।

सन्दर्भः—शिववीरस्य माल्यश्रीकविसर्जनं गौरसिंहमन्त्रणासमर्थनं च वर्णय त्यत्र श्रीमदम्बिकादत्तव्यासः शिवराजविजयस्य द्वितीयनिश्वासे ।

व्याख्या—तदवगत्य = द्वाःस्थवाक्यं श्रुत्वा परिज्ञाय च, सोऽयं = गौरसिं सूचितः, गोपीनाथः = एतन्नामा विजयपुरेश्वरचरः, इति साम्रेडम् = कटिवारम् सतर्कम् = तर्कमिश्रम्, सोत्साहम् = उत्साहसम्पन्नञ्च, व्याहृतवत्सु = वदत्सु निखिलेषु = सर्वेषु, शिववीरेण = महाराष्ट्रपाकशासनेन, निजबाल्यप्रियः = स्व-बाल्यावस्थामित्रः, माल्यश्रीकनामा = एतन्नामकं सम्बोध्य, कथितः = लपितः यद्, गम्यताम् = गच्छन्तु, श्रीमन्, दुर्गान्तरे = दुर्गमध्ये एव, महावीरमन्दिरे = मारुतिदेवायतने, तस्मै = गोपीनाथाय, वासस्थानं, दीयताम् = समर्प्यताम् भोज्यपर्यङ्कादिसुखदसामग्रीजातेन = खाद्यखट्वादिसुखदवस्तुनिवहेन च, सत्क्रिय

ताम् = सत्कारो विधीयताम्, ततोऽहमपि = तावदहमपि, साक्षात्करिष्यामि इति = विलोकयिष्यामीति ।

ततः = एतत् श्रुत्वा, बाढम् = सुष्ठु, इत्युक्त्वा, प्रयाते = गते, माल्यश्रीके= बाल्यसहचरे, महाराज ! = स्वामिन् ! आज्ञा = निदेशः, चेत् = यदि, अहम् = गौरसिंहः, अद्यैव = अस्मिन्नेव दिने, अपजलखानम्=आक्रमणकर्तारम्, कथमपि =केनापि प्रकारेण, साक्षात्कृत्य = विलोक्य, तस्याखिलम् = अपजलखानस्य निखिलम्, व्यवसितम् = कृत्यम्, विज्ञाय = ज्ञात्वा, प्रभुचरणेषु = स्वामिपादेषु, विनिवेदयामि = कथयामि, नाधुना = सम्प्रति न, मम = गौरसिंहस्य, क्षान्तिः= क्षमा, शान्तिश्च=शमश्च, यतः, संन्यासिवेषोऽहं = धृततुरीयाश्रमवासिवसनोऽहम्, समागच्छन् = आव्रजन्, द्वयोः = उभयोः, यवनभटयोः = तुरुष्कवीरयोः, वार्तया = कथनेन, परस्परम्, अवागमम् = अवागच्छम्, यत् श्वः = परदिने एव, एते = यवनाः, युयुत्सन्ते = योद्धुम् इच्छन्ति, इति गौरसिंहः, मन्दम् = मधुरम्, कर्णान्तिकम्=श्रवणसमीपम्, व्याहार्षीत् = अकथयत् ।

समासः—आम्रेडेन सह साम्रेडम् । तर्कैः सह सतर्कम् । उत्साहैः सह सोत्साहम् । निजः बाल्यप्रियः निजबाल्यप्रियः । दुर्गस्य अन्तरे दुर्गान्तरे । वासाय स्थानं वासस्थानम् । भोज्यं च पर्यङ्कं चादौ यस्य तत् भोज्यपर्यङ्कादि, तच्च सुखदसामग्रीजातं च, तेन भोज्यपर्यङ्कादिसुखदसामग्रीजातेन । कर्णयोरन्तिकं कर्णान्तिकम् ।

(३२) ततो 'वीर ! कुशलोऽसि, सर्वं करिष्यसि, जाने तव चातुरीम्, तद् यथेच्छं गच्छ, नाहं व्याहन्मि तवोत्साहम्, नीतिमार्गान् वेत्सि, किन्तु परिपन्थिन एते अत्यन्तनिर्दयाः, अतिकदर्पाः, अतिकूटनीतयश्च सन्ति । एतैः सह परमसावधानतया व्यवहरणीयम्'—इति कथयित्वा शिववीरस्तं विससर्ज ।

गौरसिंहस्तु त्रिः प्रणम्य, उत्थाय, निवृत्य, निर्गत्य, अवतीर्य, सपदि तस्या एव निम्ब-तरु-तल-वेदिकायाः समीपे आगत्य, स्वसहचरं कुमारमिङ्गितेनाऽऽहूय कस्मिंश्चित् स्वसङ्केतित-भवने प्रविश्य, आत्मनः कुमारस्यापि च केशान् प्रसाधनिकया प्रसाध्य, मुखमार्द्रपटेन प्रोञ्छ्य, ललाटे सिन्दूर-बिन्दु-तिलकं विरचय्य, उष्णीषमपहाय, शिरसि सूचिस्यूतां सौवर्ण-कुसुम-लतादि-चित्र-विचित्रितामुष्णीषिकां सन्धार्य, शरीरे हरितकौशेय-कञ्चुकिकामायोज्य, पादयोः शोण-पट्ट-निर्मितमधोवसनमाकलय्य, दिल्लीनिर्मिते महार्हे उपानहौ धारयित्वा, लघीयसीं तानपूरिकामेकां सह नेतुं सहचर-हस्ते समर्प्य, गुप्तच्छुरिकां दन्तावलदन्त-मुष्टिकां यष्टिकां

मुष्टौ गृहीत्वा, पटवासैर्दिगन्तं दन्तुरयन्, करस्थपटखण्डेन च मुहुर्मुहुरा
प्रोञ्छन् गायकवेषेण अपजलखान-शिबिराभिमुखं प्रतस्थे।

प्रसङ्गः—शिववीरविसर्जितस्य गौरसिंहस्य अपजलखानं प्रति गमनं वर्ण
त्यत्र श्रीमदम्बिकादत्तव्यासः शिवराजविजयस्य द्वितीये निश्वासे।

व्याख्या—ततः = गौरसिंहवचनानन्तरम्, वीर ! = भट ! कुशलोऽसि
निपुणोऽसि, सर्वम् = सकलम्, करिष्यसि = सम्पादयिष्यसि, जाने = जानामि,
= गौरसिंहस्य, चातुरीम् = चातुर्यम्, तद् यथेच्छम् = स्वेच्छया, गच्छ = व्र
नाहम् = नहि शिववीरः, व्याहन्मि = निवारयामि, तवोत्साहम् = श्रीमतामुद्योग
नीतिमार्गान् = नयपथान्, वेत्सि = अवगच्छसि, किन्तु परिपन्थिनः = रिपव
एते = यवनाः, अत्यन्तनिर्दयाः = अतिनिष्करुणाः, अतिकदर्याः = परमनीच
अतिकूटनीतयश्च = कपटाचारचतुराश्च, सन्ति = वर्तन्ते, एतैः = यवनैः, सह =
साकम्, परमसावधानतया = अतिसावहितेन, व्यवहरणीयम् = समाचरणीयम्
इति कथयित्वा = उक्त्वा, शिववीरस्तं = गौरसिंहं, विससर्ज = विसर्जयामास

गौरसिंहस्तु = शिववीरभक्तस्तु, त्रिः = त्रिवारम्, प्रणम्य = नमस्कृत्य
उत्थाय = आसनं परित्यज्य, निवृत्य = परिक्रम्य, निर्गत्य = बहिर्गत्वा, सपदि
शीघ्रम्, तस्याः = पूर्ववर्णितायाः, निम्बतरुतलवेदिकायाः = निम्बवृक्षाधस्तल
वेद्याः, समीपे = निकटे, आगत्य = आगम्य, स्वसहचरम् = निजसहयात्रिण
कुमारम् = बालम्, इङ्गितेन = सङ्केतेन, आहूय = आकार्य, कस्मिश्चित्, स्वसङ्के
तितभवने = निजेङ्गितालये, प्रविश्य = प्रवेशं कृत्वा, आत्मनः = स्वस्य, कुमार
स्यापि = बालस्यापि, केशान् = बालान्, प्रसाधनिकया = कङ्कतिकया, प्रसाध्य
= शोभनान् विधाय, मुखम् = लपनम्, आर्द्रपटेन = क्लिन्नवसनेन, प्रोञ्छ्य =
मार्जयित्वा, ललाटे = भाले, सिन्दूरबिन्दुतिलकम् = महारजनीपृषच्चन्दन
विरचय्य = विधाय, उष्णीषम् = शिरोवेष्टनम्, अपहाय = दूरे कृत्वा, शिरसि =
मस्तके, सूचिस्यूताम् = सूचिसीवनयुताम्, सौवर्णकुसुमलतादिचित्रविचित्रताम्
कनकपुष्पलतादिचित्रसंयुताम्, उष्णीषिकाम् = टोपिकाम्, सन्धार्य = धृत्वा
शरीरे = देहे, हरितकौशेयकञ्चुकिकाम् = हरिद्वर्णकोशभवकञ्चुकिकाम्
आयोज्य = सन्धार्य, पादयोः = चरणयोः, शोणपट्टनिर्मितम् = रक्तकौशेयघटितम्
अधोवसनम् = अधोमार्गेण चरणेन धारणीयं वसनम्, आकलय्य = धृत्वा, दिल्ली
निर्मिते = हस्तिनापुरघटिते, महार्हे = बहुमूल्ये, उपानहौ = चरणपादुकाद्वयम्
धारयित्वा = सन्धार्य, लघीयसीम् = लघ्वीम्, तानपूरिकामेकाम् = एतन्नाम

दाद्ययन्त्रविशेषमेकम्, सह = साकम्, नेतुम् = वोढुम्, सहचरहस्ते = सहयात्रीकरे, समर्प्य = अर्पयित्वा, गुप्तच्छुरिकां, दन्तावलदन्तमुष्टिकाम् = हस्तिदन्तमुष्टिकाम्, यष्टिकाम् = लघुदण्डम्, मुष्टौ = मुष्टिकायाम्, गृहीत्वा = आदाय, पटवासैः = सुरभितपदार्थैः, दिगन्तम् = दिगन्तरालम्, दन्तुरयन् = सुगन्धयन्, करस्थपटखण्डेन = नक्तकेन च, मुहुर्मुहुः = वारं वारम्, आननम् = लपनम्, प्रोञ्छन् = मार्जयन्, गायकवेषेण, अपजलखानशिविराभिमुखम् = एतन्नामकशत्रूपकारिकाभिमुखम्, प्रतस्थे = चचाल ।

समासः——इच्छामनतिक्रम्य यथेच्छम् । नीतेः मार्गान् नीतिमार्गान् । निम्बस्य तरोः तले या वेदिका तस्याः निम्बतरुतलवेदिकायाः । स्वेन सङ्केतिते भवने स्वसङ्केतितभवने । सिन्दूरस्य बिन्दुरेव तिलकं सिन्दूरविन्दुतिलकम् । सूच्या स्यूतां सूचिस्यूताम् । सौवर्णेन कुसुमलतादीनां चित्रेण विचित्रितां सौवर्णकुसुमलतादिचित्रविचित्रिताम् । हरितस्य कौशेयस्य कञ्चुकिकां हरितकौशेयकञ्चुकिकाम् । शोणपट्टेन निर्मितं शोणपट्टनिर्मितम् । दिल्ल्यां निर्मिते दिल्लीनिर्मिते । सहचरस्य हस्ते सहचरहस्ते । दन्तावलस्य दन्तः मुष्टिका यस्यां, तां दन्तावलदन्तमुष्टिकाम् । करस्थेन पटखण्डेन करस्थपटखण्डेन । गायकस्य वेषेण गायकवेषेण । अपजलखानस्य शिविराभिमुखम् अपजलखानशिविराभिमुखम् ।

कोषः——'कदर्ये कृपणक्षुद्र', 'मायानिश्चलयन्त्रेषु कैतवानृतराशिपु । आयोधने शैलशृङ्गे सीराङ्गे कूटमस्त्रियाम्', 'प्रसाधनी कङ्कतिका' इति सर्वत्राप्यमरः ।

(३४) अथ तौ त्वरितं गच्छन्तौ, सपद्येव परशत-श्वेतपट-कुटीरैः शारद-मेघ-मण्डलायितं दीपमाला-विहित-बहुल-चाकचक्यम् अपजलखान-शिबिरं दूरत एव पश्यन्तौ यावत् समीपमागच्छतस्तावत् कश्चन कोकनद-च्छवि-वस्त्र-खण्ड-वेष्टितमूर्द्धा, कटिपर्यन्त-सुनद्ध-काकश्यामाङ्गरक्षिकः, कर्बुराधोवसनः, शोण-श्मश्रुः, विजयपुराधीश-नामाङ्कित-वर्तुल-पित्तल-पट्टिका-परिकलित-वाम-वक्षःस्थलः स्कन्धे भुशुण्डीं निधाय, इतस्ततो गतागतं कुर्वन् सावष्टम्भमुर्दूभाषया उवाच —'कोऽयं, कोऽयम् ?' इति, ततो गौरसिंहेनापि 'गायकोऽहं श्रीमन्तं दिदृक्षे' इति समार्दवं व्याख्यायि । ततो 'गम्यतामन्येऽपि गायका वादकाश्च सम्प्रत्येव गताः सन्ति' इति कथयति प्रहरिणि, 'घृतेन स्नातु भवद्रसना' इति व्याहरन् शिविर-मण्डलं प्रविवेश ।

उत्तरम्—प्रसङ्गः—श्रीमदम्बिकादत्तव्यासो गौरसिंहस्य अपजलखान-शिविरप्रवेशं वर्णयति गद्यखण्डेऽस्मिन्, शिवराजविजयस्य द्वितीयनिश्वासगत् गृहीते ।

व्याख्या—अथ = प्रस्थानानन्तरम्, तौ = गौरसिंहः बालकश्च, त्वरितम् = शीघ्रम्, गच्छन्तौ = यान्तौ, सपद्येव = झटित्येव, परशतश्वेतपटकुटीरैः = अगणितधवलवसनपटभवनैः, शारदमेघमण्डलायितम् = शरत्कालिकघनमण्डला-यितम्, दीपमालाविहितबहुलचाकचक्यम् = दीपपङ्क्तिकृताधिकचाकचक्यम् अपजलखानशिविरम् = अपजलखानपटगृहम्, दूरत एव = सुदूरादेव पश्यन्तौ यावत्, समीपमागच्छतः = निकटमायातः तावत्, कश्चन = कोऽपि, कोकनदच्छ-विवस्त्रखण्डवेष्टितमूर्द्धा = रक्तकमलाभवसनांशावृतशिराः, कटिपर्यन्तसुनद्धकाक-श्यामाङ्गरक्षिकः = मध्यभागपर्यन्तवायसाभिन्नकृष्णाङ्गरक्षिकः, कर्बुराधोवसनः = अनेकवर्णाधोवस्त्रः, शोणश्मश्रुः = रक्तमुखकेशः, विजयपुराधीशनामाङ्कित-वर्तुलपित्तलपट्टिकापरिकलितवामवक्षःस्थलः = विजयपुरेश्वराभिधानोट्टङ्कितगोला-काररीतिपट्टिकलसितवामवक्षःस्थलः, स्कन्धे भुशुण्डि निधाय = अंशे बन्दूकनाम-मस्त्रविशेषं धृत्वा, इतस्ततो, गतागतम् = चङ्क्रमणं कुर्वन्, सावष्टम्भम् = सप्रति-रोधम्, उर्दूभाषया, उवाच = अवोचत्—कोऽयं कोऽयम् ? इति, ततः = रक्षकवाक्य-श्रवणोत्तरम्, गौरसिंहेनापि = शिववीरपक्षीयेणापि, गायकोऽहम् = गायनकर्म करोऽहम्, श्रीमन्तम् = तत्र भवन्तम्, दिदृक्षे = द्रष्टुमिच्छामि, इति, समार्दवम् = मृदुतायुतम्, व्याख्यायि = अभाणि, ततः = तत्पश्चात्, गम्यताम् = गच्छतु, अन्येऽपि = इतरेऽपि, गायकाः = गायनकर्मलीनाः, वादकाश्च = वादनकर्मलीनाश्च, सम्प्रत्येव = शीघ्रमेव, गताः = प्रयाताः सन्ति, इति कथयति = वदति, प्रहरिणि = रक्षके, घृतेन = आज्येन, स्नातु = स्नानं करोतु, भवद्रसना = श्रीमज्जिह्वा इति व्याहरन् = वदन्, शिविरमण्डलम् = पटमण्डपनिचयम्, प्रविवेश = जगाम।

समासः—परशतानां श्वेतपटानां कुटीरैः परशतश्वेतपटकुटीरैः। शारदानां मेघानां मण्डलमिवाचरितं शारदमेघमण्डलायितम्। दीपानां मालया विहितं बहुलं चाकचक्यं यत्र तत् दीपमालाविहितबहुलचाकचक्यम्। कोकनदच्छविना वस्त्रखण्डेन वेष्टितो मूर्धा यस्य सः कोकनदच्छविवस्त्रखण्डवेष्टितमूर्द्धा। कटि-पर्यन्ता सुनद्धा काकश्यामा अङ्गरक्षिका यस्य सः कटिपर्यन्तसुनद्धकाकश्यामाङ्ग-रक्षिकः। कर्बुरम् अधोवसनं यस्य सः कर्बुराधोवसनः। शोणानि श्मश्रूणि यस्य सः शोणश्मश्रुः। विजयपुरस्य अधीशः, तस्य नाम्ना अङ्कितया वर्तुलया पित्तलपट्टिकया परिकलितं वामं वक्षःस्थलं यस्य सः विजयपुराधीशनामाङ्कित-वर्तुलपित्तलपट्टिकापरिकलितवामवक्षःस्थलः। गतं च आगतं च गतागतम्। शिविराणां मण्डलं शिविरमण्डलम्।

विशेषः—(१) लोकोक्तिरलङ्कारः, (२) स्वभावोक्तिश्च ।

(३५) 'मैवं भोः ! श्व एव आहव-क्रीडाऽस्माकं भविष्यति, तत् श्रूयते सन्धिवार्त्ता-व्याजेन शिव एकत आकारयिष्यते, यावच्च स स्वसेनामपहाय एकाकी अस्मत्स्वामिना सहाऽऽलपितुमेकान्तस्थाने यास्यति; तावद् वयं श्येना इव शकुनिमण्डले महाराष्ट्रसेनायां, छिन्धि, भिन्धि—इति कृत्वा युगपदेव पतिष्यामः, वसन्तवाताहत-नीरसच्छदानिव च क्षणेन विद्रावयिष्यामः । इतस्तु छलेनाऽस्मत्स्वामिसहचराः शिवं पाशैर्नद्ध्वा पिञ्जरे स्थापयित्वा तं जीवन्तमेव वशंवदं करिष्यन्ति । परन्तु गोप्यतमोऽयं विषयो मा स्म भूत् कस्यापि कर्णगतः'—इति कर्णान्तिकं मुखमानीयोत्तरयतः साङ्ग्रामिक-भटानवलोकयन्; 'धन्या भवन्तो येषां गोप्यतमा अपि विषया एवं वीथिषु विकीर्यन्ते । महाराष्ट्रा धूर्ताचार्याः, नैतेषु भवतां धूर्तता सफला भवति' इत्यात्मन्येवाऽऽत्मना कथयन्, स्व-प्रभार्धर्षित-सकलरक्षकगणः स्वसौन्दर्येणाऽऽकर्षयन्निव विश्वेषां मनांसि, सपद्येव प्रधान-पट-कुटीर-द्वारमाससाद । तत्र च प्रहरिणमालोकयदुक्तवांश्च यत् पुण्यनगर-निवासी गायकोऽहमत्रभवन्तं गानरस-रसायनैरमन्दमानन्दयितुमिच्छामीति । तदवगत्य स भ्रूसञ्चारेण कञ्चित् निवेदकं सूचितवान् । स चान्तःप्रविश्य, क्षणानन्तरं पुनर्बहिर्निर्गत्य गायकमपृच्छत्—'किं नाम भवतः ? पूर्वं च कदाऽपि समायातो न वा ?' अथ स आह—'तानरङ्गनामाऽहं कदाचन युष्मत्कर्णमस्पृशम् । न पूर्वं कदाऽपि ममात्रोपस्थातुं संयोगोऽभूत्, अद्य भाग्यान्यनुकूलानि चेत्, श्रीमन्तमवलोकयिष्यामि' इति । स च 'आम्' इत्युदीर्य पुनः प्रविश्य क्षणानन्तरं निर्गत्य च, विचित्रगायकममुं सह निनाय ।

प्रसङ्गः—श्रीमदम्बिकादत्तव्यासोऽत्रापजलखानशिविरप्रवेशं वर्णयति छद्म-वेषधारिणो गौरसिंहस्य शिवराजविजयस्य द्वितीये निश्वासे ।

व्याख्या—(पूर्ववक्तारमाक्षिप्यापरो वीरो वदति—भो शङ्कालु !) मैवं भोः =इत्थं न चिन्तय, श्व एव=आगामि दिने एव, आहवक्रीडा=युद्धखेला, अस्माकम् =सैनिकानामपजलखानपक्षीयाणाम्, भविष्यति, तत् श्रूयते=आकर्ण्यते, सन्धि-वार्ताव्याजेन=सन्धिचर्चाछलेन, शिवः=शिववीरः, एकतः=एकस्मिन् स्थाने, आकारयिष्यते=आवाहयिष्यते, यावच्च, सः=शिवः, स्वसेनामपहाय=निज-बलं विहाय, एकाकी=केवलः, अस्मत्स्वामिना=अपजलखानेन सह, आल-पितुम्=वार्तां कर्तुम्, एकान्तस्थाने=गुप्तस्थले, यास्यति=गमिष्यति, तावत्,

वयम् = सैनिकाः यवनपक्षीयाः, श्येना इव = बाजपक्षिण इव, महाराष्ट्रसेनायाम् = शिवबलोपरि, छिन्धि भिन्धि इति कृत्वा = मारय कर्तय इति कृत्वा, युगपदेव = सहसैव, पतिष्यामः = आक्रमिष्यामः, वसन्तवाताहतनीरसच्छदानिव = मधु यवनान्दोलितशुष्कपलाशानिव च, क्षणेन = पलेन, विद्रावयिष्यामः = दूं करिष्यामः, इतरस्तु = अपरतस्तु, छलेन = कपटेन, अस्मत्स्वामिसहचराः = अप जलखानसहायकाः, शिवम् = शिववीरम्, पाशैर्बद्ध्वा = रज्जुभिः निगडयित्वा, पिञ्जरे = पक्षिपालनपात्रे, स्थापयित्वा = निक्षिप्य, तम् = शिवम्, जीवन्तम् = प्राणन्तमेव, वशंवदं करिष्यन्ति = स्ववशमानेष्यन्ति । परन्तु = किन्तु, गोप्य तमोऽयम् = केवलश्राव्यमिदम्, विषयः = वस्तु, मा स्म भूत् = न भवेत्, कस्यापि = शिवपक्षीयस्यापि, कर्णगतः = श्रोत्रचरम् । इति = इत्थम्, कर्णान्तिकम् = कर्णसमीपम्, मुखमानीय = लपनं संश्लिष्य, उत्तरयतः = उत्तरं ददतः, साङ्ग्रा मिकभटान् = सामरिकवीरान्, अवलोकयन् = पश्यन्, धन्याः = धन्यवादार्हाः, भवन्तः = श्रीमन्तः, येषां गोप्यतमाः = अतिगोप्याः अपि, विषयाः = पदार्थाः एवम् = पूर्वोक्तप्रकारेण, वीथिषु = रथ्यासु, विकीर्यन्ते = उत्क्षिप्यन्ते, महाराष्ट्रा = महाराष्ट्रदेशवास्तव्याः, धूर्ताचार्याः = वञ्चकविशिष्टाः, नैतेषु = नहि महाराष्ट्र जनेषु, भवताम् = श्रीमताम्, धूर्तता = वञ्चकता, सफला = फलवती, भवति इति = एतादृशम्, आत्मनि = स्वीये मनसि, आत्मना = स्वीयेनैव, कथयन् = वदन् स्वप्रभाधर्षितसकलरक्षकगणः = निजकान्तिजितसम्पूर्णप्रहरीगणः, स्वसौन्दर्येण कर्षयन्निव = निजप्रभया वशीकुर्वन्निव, विश्वेषाम् = सकलानाम्, मनांसि = हृदयानि, सपद्येव = शीघ्रमेव, प्रधानपटकुटीरद्वारमाससाद = मुख्यवसनगेहद्वार माजगाम । तत्र = पटकुटीरद्वारे च, प्रहरिणम् = यामिकम्, आलोकयदुक्तवांश्च = अपश्यत् अवदच्च, यत् पुण्यनगरनिवासी = पूनानगरवास्तव्यः, गायकोऽहम् = गानकरोऽहम्, अत्रभवन्तम् = पूज्यम्, गानरसरसायनैः = गीतिरसरसायनैः, अमन्दम् = बहु, आनन्दयितुम् = प्रीणयितुम्, इच्छामि = वाञ्छामि, इति । तदवगत्य = तत् ज्ञात्वा, सः = प्रहरी, भ्रूसञ्चारेण = नेत्रसञ्चारेण, कञ्चित् = कमपि, निवेदकम् = सन्देशवाहकम्, सूचितवान् = असूसुचत् । सः = सङ्केतितः पुरुषः, चान्तः प्रविश्य = आभ्यन्तरं गत्वा, क्षणानन्तरम् = पलोत्तरम्, पुनः = भूयः, बहिः = बाह्यदेशम्, निर्गत्य = निष्क्रम्य, गायकमपृच्छत् = गानकर्तारं पप्रच्छ—किं नाम भवतः = कानि ते नामाक्षराणि ? पूर्वं च कदाऽपि समायातो न वा ? = प्रथम मेवागतो वा पूर्वमप्यायातो भवान् ?, अथ = प्रश्नं श्रुत्वा, सः = गायकः,

=अवदत्, तानरङ्गनामाहम् = तानरङ्गनाम्ना ख्यातोऽस्मि, कदाचन, युष्मत्कर्ण-स्पृशम् = श्रीमच्छ्रोत्रमागमम् । न, पूर्वम् = प्रथमम्, अत्र = अपजलखानशिविरे, दापि, उपस्थातुम् = आगन्तुम्, संयोगः = अवसरः, अभूत् = अभवत्, अद्य, ग्यानि, अनुकूलानि = साहाय्यकराणि, चेत्, श्रीमन्तम् = पूज्यम्, अवलोक-ष्यामि = द्रक्ष्यामि, इति । सः = यामिकसङ्केतगृहीता च, आम् = शोभनम्, युदीर्य = उक्त्वा, पुनः = भूयः, प्रविश्य = प्रवेशं कृत्वा, क्षणानन्तरम् = पलो-रम्, निर्गत्य = निष्क्रम्य च, विचित्रगायकममुम् = न पूर्वं श्रुतं न वा दृष्टं नकर्तारममुम्, सह = साकम्, निनाय = नीतवान् ।

समासः—आहवस्य क्रीडा आहवक्रीडा । सन्धेः वार्तायाः व्याजेन सन्धि-र्ताव्याजेन । महाराष्ट्राणां सेनायां महाराष्ट्रसेनायाम् । वसन्तस्य वातेन आह-न् नीरसान् छदान् वसन्तवाताहतनीरसच्छदान् । अस्माकं स्वामिनः सहचराः स्मत्स्वामिसहचराः । कर्णयोरन्तिकं कर्णान्तिकम् । साङ्ग्रामिकान् भटान् ङ्ग्रामिकभटान् । धूर्तानाम् आचार्याः धूर्ताचार्याः । स्वप्रभया धर्षितः सकलः क्षकानां गणः येन सः स्वप्रभाधर्षितसकलरक्षकगणः । प्रधानस्य पटकुटीरस्य रं प्रधानपटकुटीरद्वारम् । पुण्यनगरस्य निवासी पुण्यनगरनिवासी । गान-स्य रसायनैः गानरसरसायनैः । भ्रुवः सञ्चारेण भ्रूसञ्चारेण । युष्माकं कर्णं मत्कर्णम् ।

(२८) तानरङ्गस्तु तेनैव तानपूरिका-हस्तेन बालकेनाऽनुगम्यमानः, शनैः नैः प्रविश्य, प्रथमं द्वितीयं तृतीयं च द्वारमतिक्रम्य, कांश्चित् मृदङ्ग-स्वरान् न्दधतः, कांश्चिद् वीणावरणमुन्मुच्य, प्रवालं प्रोञ्छ्य, कोणं कलयतः, कांश्चिद-चलोऽयमेतेनैव सह योज्यन्तामपरवाद्यानीति वंशीरवं साक्षीकुर्वतः; कांश्चित् लितनेपथ्यान्, पादयोर्नूपुरं बध्नतः; कांश्चित् स्कन्धावलम्बिगुटिकातः कर-लिकामुत्तोलयतः; कांश्चिच्च कर्णे दक्षकरं निधाय, चक्षुषी सम्मील्य, नासामा-ञ्चय, पातितोभयजानु उपविश्य, वामहस्तं प्रसार्य, तन्त्रीस्वरेण स्व-काकलीं लयतः; सम्मुखे च पृष्ठतः पार्श्वतश्चोपविष्टैः कैश्चित् ताम्बूल-वाहकैः, अपरै-ष्ठच्यूतादान-भाजन-हस्तैः, अन्यैरनवरत-चालितचामरैः इतरैर्बद्धाञ्जलिभि-र्लाटिकैः परिवृतम्, रत्नजटितोष्णीषिकामस्तकम् सुवर्ण-सूत्र-रचित-विविध-सुम-कुड्मल-लता-प्रतानाङ्कित-कञ्चुकं महोपबर्हमेकं क्रोडे संस्थाप्य, तदुपरि न्धारितभुजद्वयम्, रजतपर्य्यङ्के विविध-फेन-फेनिल-क्षीरधि-जल-तलच्छविमङ्गी-र्वत्यां तूलिकायामुपविष्टमपजलखानं च ददर्श ।

प्रसङ्गः—श्रीमदम्बिकादत्तव्यासोऽत्र तानरङ्गस्यापजलखानदर्शनं वर्णय
शिवराजविजयस्य द्वितीये निश्वासे ।

व्याख्या—तानरङ्गस्तु = गौरसिंहस्तु, तेनैवं = बालेनैव, तानपूरिकाहस्ते
= वाद्यविशेषलसितकरेण, बालकेन = बालेन, अनुगम्यमानः = अनुगतः, शनैः
शनैः = मन्दं मन्दम्, प्रविश्य = प्रवेशं कृत्वा, प्रथमं द्वितीयं तृतीयं च, द्वारम् =
द्वारदेशम्, अतिक्रम्य=उल्लङ्घ्य, कांश्चित्, मृदङ्गस्वरान्=मुरजस्वरान्, सन्दध
= साधयतः, कांश्चित् वीणावरणम् = विपञ्चीछादनम्, उन्मुच्य = अपवा
प्रवालम् = वीणादण्डम्, प्रोञ्छ्य = मार्जयित्वा, कोणम् = वादनोपयोगिनमु
करणविशेषम्, कलयतः = धारयतः, कांश्चित्, अविचलोऽयम् = निश्चलोऽय
एतेनैव = वंशीशब्देनैव, सह = साकम्, योज्यन्ताम् = मेलयन्ताम्, अपरवाद्य
नीति = शेषवाद्ययन्त्राणीति, वंशीरवम् = वीणाशब्दम्, साक्षीकुर्वतः = प्रत्यक्ष
दर्शितां नयतः, कांश्चित्, कलितनेपथ्यान् = गृहीतवेषान्, पादयोः = चरणयो
नूपुरम् = किङ्किणीम्, बध्नतः = योजयतः, कांश्चित्, स्कन्धावलम्बिगुटिकातः =
कन्धरलम्बमानवस्त्रमञ्जूषातः, करतालिकामुत्तोलयतः = वाद्यविशेषं वादयत
कांश्चिच्च, कर्णे = श्रोत्रे, दक्षकरम् = दक्षिणं हस्तम्. निधाय = संस्थाप्य, चक्षु
= नेत्रे, सम्मील्य = निमील्य, नासाम् = नासिकाम्, आकुञ्च्य = वक्रीकृत्य
पातितोभयजानु, उपविश्य=स्थित्वा, वामहस्तम् = सव्यकरम्, प्रसार्य=विस्ता
तन्त्रीस्वरेण वीणारवेण, स्वकाकलीम्=निजसूक्ष्मकलम्, मेलयतः=सङ्गमयत
सम्मुखे=अग्रे पृष्ठतः=पृष्ठभागे च, पार्श्वतः = पार्श्वभागे च, उपविष्टैः=
आसीनैः, कैश्चित् ताम्बूलवाहकैः=नागवल्लीदायकैः, अपरैः = अन्यैः, निष्ठ्यूत
दानभाजनहस्तैः = पतद्ग्रहपात्रकरैः, अन्यैः = इतरैः, अनवरतचालितचामरैः
निरन्तरोपवीज्यमानतालवृन्तैः, इतरैः = अन्यैः, बद्धाञ्जलिभिः = सम्पुटितकरै
लालाटिकैः = नृपललाटदर्शनक्षमैः, परिवृतम् = कलितम्, रत्नजटितोष्णीषि
मस्तकम् = मणिजटितटोपिकामस्तकम्, सुवर्णसूत्ररचितविविधकुसुमकुड्मलल
प्रतानाङ्कितकञ्चुकम् = कनकसूत्रनिर्मितविविधपुष्पकोरकव्रततीवितानाङ्किताङ्
रक्षकम्, महोपबर्हमेकम् = महोपधानम् एकम्, क्रोडे = अङ्के, संस्थाप्य, तदुप
सन्धारितभुजद्वयम् = महोपधानोपर्यवलम्बितबाहुयुगलम्, रजतपर्यङ्के = राज
खट्वायाम्, विविधफेनफेनिलक्षीरधिजलतलच्छविम्=अनेकडिण्डीरफेनिलसा
वारितलकान्तिम्, भङ्गीकुर्वत्याम् = स्वीकुर्वत्याम्, तूलिकायाम् = तूलनिर्मित
विष्टरे, उपविष्टम् = समासीनम्, अपजलखानम् = विजयपुराधीशसेनपं
ददर्श = अपश्यत् ।

समासः—तानपूरिका हस्ते यस्य, तेन तानपूरिकाहस्तेन । मृदङ्गस्य स्वरान् दङ्गस्वरान् । वीणाया आवरणं वीणावरणम् । अपराणि वाद्यानि अपर-वाद्यानि । कलिताः नेपथ्याः यैस्तान् कलितनेपथ्यान् । कन्धरस्य अवलम्बिनी गुटिका ततः स्कन्धावलम्बितगुटिकातः । पातिते उभये जानुनी यस्मिन् तत् पातितोभयंजानु । ताम्बूलानां वाहकैः ताम्बूलवाहकैः । निष्ठ्यूतादानस्य भाजनं हस्ते येषां, तैः निष्ठ्यूतादानभाजनहस्तैः । अनवरतं चालितं चामरं यैस्तैः अनवरतचालितचामरैः । वद्धः अञ्जलिः यैस्तैः वद्धाञ्जलिभिः । रत्नैः जटिता उष्णीषिका मस्तके यस्य, तं रत्नजटितोष्णीषिकामस्तकम् । सुवर्णसूत्रेण रचिता विविधा कुसुमकुड्मललताः, तासां प्रतानैः अङ्कितः कञ्चुको यस्य, तं सुवर्ण-सूत्ररचितविविधकुसुमकुड्मललताप्रतानाङ्कितकञ्चुकम् । सन्धारितं भुजयोः द्वयं यस्मिन् तत् सन्धारितभुजद्वयम् । रजतस्य पर्यङ्के । विविधफेनेन फेनिलस्य क्षीरधेः जलतलस्य छविं विविधफेनफेनिलक्षीरधिजलतलच्छविम् ।

कोषः—'वीणादण्डः प्रवालः स्यात्', 'काकली तु कले सूक्ष्मे', 'लालाटिकः प्रभोर्भालदर्शी' इति सर्वत्राप्यमरः ।

(३७) तान०—सेनापते ! वर्षत्रयात् पूर्वमहं काश्यां गङ्गायां संस्नाय, उज्जयिनीदेशीय-क्षत्रिय-कुलालङ्कृतं भोजपुरदेशमालोक्य, गङ्गागण्डक-तटोप-कण्ठं हरिहरनाथं प्रणम्य, विलासि-कुल-विलसितं पाटलिपुत्र-पुरमुल्लङ्घ्य सीता-कुण्डविक्रमचण्डिकादि-पीठ-पटलपूजितं विक्रम-यशःसूचक-दुर्गावशेष-शोभितं सुरधुनीतरङ्गक्षालित-प्रान्तं मुद्गलपुरं निरीक्ष्य, कर्ण-दुर्ग-स्थानेन तद्यशोमहामु-द्रयेवाङ्कितमङ्गदेशं दिनत्रयमध्युष्य, अतिवर्द्धमानवैभवं वर्द्धमान-नगरं च सम्यक् आलोक्य, यथोचित-सम्भारैस्तारकेश्वरमुपस्थाय, ततोऽपि पूर्वं बङ्गदेशे, पूर्व-बङ्गेऽपि च चिरमहमटाट्यामकार्षम् ।

उत्तरम्—प्रसङ्गः—श्रीमदम्बिकादत्तव्यासविरचितशिवराजविजयस्य द्विती निश्वासात् गृहीतोऽयमंशः । तानरङ्गनाम्ना ख्यातः गायकवेषधारी गौरसिंहोऽत्र वदति अपजलखानम् ।

व्याख्या—सेनापते ! = विजयपुराधिपतियूथपते ! वर्षत्रयात् = शरत्त्रित-यात्, पूर्वम् = प्रथमम्, अहम् = तानरङ्गः, काश्याम् = वाराणस्याम्, गङ्गायाम् = भागीरथ्याम्, संस्नाय = स्नानं कृत्वा, उज्जयिनीदेशीयक्षत्रियकुलालङ्कृतम् = उज्जयिनीमूलक्षत्रियान्वयशोभितम्, भोजपुरदेशम् = एतन्नामकविहारप्रान्तस्थ-

प्रदेशम्, आलोक्य = दृष्ट्वा, गङ्गागण्डकतटोपविष्टम् = भागीरथीगण्डकीकूलस्थम्, हरिहरनाथम् = एतन्नामकमहादेवं सोनपुरोपकण्ठम्, प्रणम्य = नमस्कृत्य विलासिकुलविलसितम् = रसिकसमुदयशोभितम्, पाटलिपुत्रपुरम्=पटना नाम्ना विख्यातं नगरम्, उल्लङ्घ्य=उत्तीर्य, सीताकुण्डविक्रमचण्डिकादिपीठपटलपूजितम् = एतत्स्थानद्वयादिस्थानसमूहार्चितम्, विक्रमयशःसूचकदुर्गविशेषशोभितम् = विक्रमादित्यनृपतिकीर्तिज्ञापकदुर्गविशेषलसितम्, देवधुनीतरङ्गक्षालितमन्तम् = गङ्गावीचिस्नापितप्रान्तं मुद्गलपुरम्, निरीक्ष्य = दृष्ट्वा, कर्णदुर्गस्थानेन=कर्णदुर्गनाम्ना प्रसिद्धेन स्थानेन, तद्यशोमहामुद्रयेवाङ्कितम् = कर्णकीर्तिमुद्रालसितम् अङ्गदेशम् = कर्णशासितप्रदेशम्, दिनत्रयमध्युष्य = दिवसत्रयमुषित्वा, अतिवर्द्धमानवैभवम् = बहूपचीयमानसम्पदम्, वर्द्धमाननगरम् = वर्द्धमाननाम्ना प्रसिद्धं नगरञ्च, सम्यक् = सुष्ठु, समालोक्य = विभाव्य, यथोचितसम्भारैः = यथायोग्यसामग्रीभिः, तारकेश्वरम् = एतन्नामकभगवन्तम्, उपस्थाय = पूजयित्वा, ततोऽपि = तारकेश्वरस्थानादपि, पूर्वम् = प्राचीस्थम्, वङ्गदेशे = वङ्गालनाम्ना ख्याते देशे, पूर्ववङ्गेऽपि = पूर्वीवङ्गाल इति नाम्ना ख्यातेऽपि च, चिरम् = बहुकालम् अहम् = तानरङ्गः, अटाट्याम् = पर्यटनम्, अकार्षम् = अकरवम् ।

समासः—वर्षाणां त्रयात् वर्षत्रयात् । उज्जयिनीदेशीयैः क्षत्रियकुलैः अलङ्कृतम् उज्जयिनीदेशीयक्षत्रियकुलालङ्कृतम् । गङ्गायाः गण्डकस्य च तटेषु उपविष्टं गङ्गागण्डकतटोपविष्टम् । विलासिनां कुलैः विलसितं विलासिकुलविलसितम् । सीताकुण्डविक्रमचण्डिकादेः पीठानां पटलैः पूजितम् । विक्रमस्य यशसः सूचकेन दुर्गविशेषेन शोभितम् । देवधुन्याः तरङ्गैः क्षालितम् । तस्य यशसः महामुद्रया । अत्यन्तं वर्द्धमानं वैभवं यस्य तत् अतिवर्द्धमानवैभवम् ।

(३८) तान०—आम् श्रीमन् ! पूर्ववङ्गमपि सम्यगवालुलोकदेष जनः, यत्र प्रान्त-प्ररूढां पद्मावलीं परिमर्दयन्ती पद्मेव द्रवीभूता पयः-पूर-प्रवाह-परम्पराभिः पद्मा प्रवहति, यत्र ब्रह्मपुत्र इव शत्रु-सेना-नाशनकुशलः ब्रह्म-देशं विभजन् ब्रह्मपुत्रो नाम नदो भूभागं क्षालयति, यत्र साम्ल-सुमधुर-रस-पूरितानि फूत्कारोद्धूतभूतिज्वलदङ्गार-विजित्वरवर्णानि जगत्प्रसिद्धानि नारङ्गाण्युद्भवन्ति, यद्देशीयानां जम्बीराणां रसालानां तालानां नारिकेलानां खर्जूराणां च महिमा सर्वदेशरसज्ञानां साम्रेडं कर्णं स्पृशति, यत्र च भयङ्कराऽऽवर्त-सहस्राऽऽकुलासु स्रोतस्वतीषु सहो-होंकारं क्षेपणीः क्षिपन्तः, अरित्रं चालयन्तः, बडिशं योजयन्तः, कुवेणीस्थभ्रियमाणमत्स्यपरीवर्त्तनालोकमालोकमानन्दतः, अदृष्टतटेष्वपि महाप्रवाहेषु स्वल्प

कूष्माण्डफक्किकाकारया नौकया भिन्नाञ्जन-लिप्ता इव मसी-स्नाता इव साकारा अन्धकारा इव काला धीवर-बाला निर्भयाः क्रीडन्ति ।

सन्दर्भः—श्रीमदम्बिकादत्तव्यासविरचिते शिवराजविजये द्वितीये निश्वासे तानरङ्गस्योक्तिरियं व्याख्यानाय दत्ता ।

व्याख्या—आम् श्रीमन् != एवमेव महाभाग ! पूर्वबङ्गमपि = पूर्वीवङ्गाल-नाम्ना प्रसिद्धं देशमपि, सम्यग् = सुष्ठु, अवालुलोकत् = अपश्यत्, एषः = सम्मुखस्थः, जनः = नरः, यत्र = यस्मिन् क्षेत्रे, प्रान्तप्ररूढाम् = तटोपान्तसमुद्गताम्, पद्मावलीम् = कमलपङ्क्तीम्, परिमर्दयन्ती = धर्षयन्ती, पद्मेव = लक्ष्मी यथा, द्रवीभूता = तरलिता, पयःपूरप्रवाहपरम्पराभिः = जलधारप्रवाहपरम्पराभिः, पद्मा = एतन्नामिका नदी, प्रवहति = वहति, यत्र = यस्मिन् देशे, ब्रह्मपुत्र इव = गरलविशेष इव, शत्रुसेनानाशनकुशलः = रिपुसैन्यविनाशपटुः, ब्रह्मदेशं विभजन् = वर्मानामकदेशं द्विधा कुर्वन्, ब्रह्मपुत्रो नाम = एतन्नामा, नदः = सरिद्वरः, भूभागम् = धरांशम्, क्षालयति = धावते, यत्र = प्रदेशे, साम्लसुमधुररसपूरितानि = खट्टमिष्टरसभरितानि, फूत्कारोद्धूतभूतिज्वलदङ्गारविजित्वरवर्णानि=मुखवायूड्डायितभस्मप्रकाशमानाङ्गारजयनशीलवर्णानि, जगत्प्रसिद्धानि = लोकख्यातानि, नारङ्गाण्युद्भवन्ति = नारङ्गफलानि जायन्ते, यद्देशीयानाम् = यद्देशोद्भवानाम्, जम्बीराणां रसालानाम् = आम्राणाम्, तालानाम् = तालफलानाम्, नारिकेलानाम् = नारिकेलफलानाम्, खर्जूराणाञ्च, महिमा = माहात्म्यम्, सर्वदेशरसज्ञानाम् = सकलदेशरसलम्पटानाम्, साम्रेडम् = वारं वारम्, कर्णम् = श्रोत्रम्, स्पृशति = स्पर्शं करोति, यत्र च भयङ्करावर्तसहस्राकुलासु = भीमजलभ्रमसहस्राकुलासु, स्रोतस्वतीषु = नदीषु, सहोहोकारम् = हो-हो-कारसंयुतम्, क्षेपणीः = नौकादण्डान्, क्षिपन्तः = निक्षिपन्तः, अरित्रम् = केनिपातकम्, चालयन्तः = सञ्चालयन्तः, बडिशम् = मत्स्यवेधनम्, योजयन्तः = लगयन्तः, कुवेणीस्थम्रियमाणमत्स्यपरिवर्तनालोकमालोकमानन्दन्तः = मत्स्याधानीस्थासन्नमरणमत्स्यपार्श्वपरिवर्तनान् दर्शं दर्शमानन्दन्तः, अदृष्टतटेष्वपि = अज्ञातकूलेष्वपि, महाप्रवाहेषु = भयङ्करजलधारेषु, स्वल्पया = लघ्वाकारया, कुष्माण्डफक्किकाकारया = कर्करखण्डाकारया, नौकया, भिन्नाञ्जनलिप्ता इव = विरुद्धाञ्जनलिप्ता यथा, मसीस्नाता इव, साकारा = आकारसहिता, अन्धकारा इव = तमोनिचया इव, काला = कृष्णा, धीवरबाला = निषादबालिका इव, निर्भयाः = भयरहिताः, क्रीडन्ति = खेलन्ति ।

समासः—प्रान्तेषु प्ररूढां प्रान्तप्ररूढाम् । पयसां पूरस्य यः प्रवाहः, तस्य परम्पराभिः पयःपूरप्रवाहपरम्पराभिः । शत्रूणां सेनायाः नाशने कुशलः शत्रुसेनानाशनकुशलः । साम्लेन सुमधुरेण रसेन पूरितानि साम्लसुमधुररसपूरितानि । फूत्कारेण उद्धूता भूतिः येषां तादृशा ये ज्वलदङ्गाराः, तेषां विजित्वरा वर्णा येषां तानि फूत्कारोद्धूतभूतिज्वलदङ्गारविजित्वरवर्णानि । सर्वस्य देशस्य रसज्ञानां सर्वदेशरसज्ञानाम् । भयङ्करेण आवर्तानां सहस्रेण आकुलासु भयङ्करावर्तसहस्राकुलासु । कुवेण्यां तिष्ठति इति कुवेणीस्थाः, तत्रत्या म्रियमाणाः मत्स्याः, तेषां परीवर्तान् कुवेणीस्थम्रियमाणमत्स्यपरीवर्तान् । कुष्माण्डस्य फक्किकाया आकार इव आकारो यस्याः, तया कुष्माडफक्किकाकारया ।

(३९) ततस्तानपूरिकायाः स्वरान् सम्मेल्य पातित-वाम-जानुः तानपूरिकातुम्बं क्रोडे निधाय दक्षपादस्योत्थितजानुनि च दक्ष-हस्तकूर्पर-स्थापन पुरःसरं तेनैव हस्तेन तर्जन्यङ्गुल्या तानपूरिकां रणयन् स्वकण्ठेनापि त्रीन् ग्रामान् सप्त स्वरांश्च समधात् । तन्मात्रश्रवणेनैव मुग्धेष्विवाऽखिलेषु इमां राग-माला-गीतिमगायत् ।

सन्दर्भः—श्रीमदम्बिकादत्तव्यासविरचितशिवराजविजयस्य द्वितीयनिश्वासात् तानरङ्गगायनप्रस्तावनाभूताः पङ्क्तयः व्याख्यानाय दत्ताः ।

व्याख्या—ततः = अपजलखानाऽऽदेशानन्तरम्, तानपूरिकायाः = वाद्ययन्त्रविशेषायाः, स्वरान् = शब्दान्, सम्मेल्य = संयोज्य, पातितवामजानुः = निपातितसव्यजानुः, तानपूरिकातुम्बम् = वाद्यदीर्घमाम्, क्रोडे = अङ्के, निधाय = स्थापयित्वा, दक्षपादस्योत्थितजानुनि = वामेतरकरणस्योत्थितजानुनि च, दक्षहस्तकूर्परस्थापनपुरःसरम् = वामेतरकरकफोणिस्थापनपुरस्सरम्, तेनैव = दक्षिणेनैव, हस्तेन = करेण, तर्जन्यङ्गुल्या = अङ्गुष्ठसमीपवर्तिन्या अङ्गुल्या, तानपूरिकां, रणयन् = वादयन्, स्वकण्ठेनापि = निजगलविलेनापि, त्रीन् = त्रिसङ्ख्यकान्, ग्रामान् = षड्जमध्यमगान्धारान्, सप्तस्वरान् = सा-रे-ग-म-प-ध-नि—इति सप्तसङ्ख्यकान् स्वरान्, समधात् = समयोजयत् । तन्मात्रश्रवणेनैव = स्वरसमायोजनमात्रश्रवणेनैव, मुग्धेषु = मोहमापन्नेषु, इवाखिलेषु = सर्वेषु, इमाम् = अग्रेवक्ष्यमाणाम्, 'सखि हे नन्दतनय आगच्छति' इति रूपाम्, रागमालागीतिम् = एतन्नामिकां गीतिम्, अगायत् = गायति स्म ।

समासः—पातितं वामजानु येन सः पातितवामजानुः । उत्थिते जानुनि

उत्थितजानुनि । दक्षस्य हस्तस्य यः कूर्परः तत्स्थापनं, तेन पुरःसरं दक्षहस्त-कूर्परस्थापनपुरःसरम् ।

विशेषः—(१) 'निषादर्षभगान्धारषड्जमध्यमधैवताः ।
पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः' ॥ इत्यमरः ।

(२) स्वरसन्दोहस्य ग्राम इति संज्ञा । यथोक्तम्—

'यथा कुटुम्बिनः सर्वेऽप्येकीभूता भवन्ति हि ।
तथा स्वराणां सन्दोहो ग्राम इत्यभिधीयते' ॥

त्रयो ग्रामाश्च सन्ति--

'षड्जग्रामो भवेदादौ मध्यमग्राम एव च ।
गान्धारग्राम इत्येतद् ग्रामत्रयमुदाहृतम्' ॥

(४०) ततस्तानरङ्गोऽचकथत्—को नामाऽपरः शिववीरात् ? स एव राजनीतौ निष्णातः, स एव सैन्धवाऽऽरोह-विद्या-सिन्धुः, स एव चन्द्रहासचालने चतुरः, स एव मल्ल-विद्या-मर्मज्ञः, स एव बाणविद्या-वारिधिः, स एव पण्डित-मण्डल-मण्डनः, स एव धैर्य-धारि-धौरेयः, स एव वीर-वार-वरः, स एव पुरुष-पौरुष-परीक्षकः, स एव दीन-दुःख-दाव-दहनः, स एव स्वधर्मरक्षण-सक्षणः, स एव विलक्षणविचक्षणः, स एव च मादृश-गुणि-गण-गुण-ग्रहणाऽऽग्रही वर्तते ।

प्रसङ्गः—तानरङ्गकथनमिदमपजलखानं प्रति व्याख्यानाय दत्तं श्रीमद-म्बिकादत्तव्यासविरचितस्य शिवराजविजयस्य द्वितीय-निश्वासात् ।

व्याख्या—ततः = अपजलखानप्रश्नश्रवणोत्तरम्, तानरङ्गः = गौरसिंहः, अचकथत् = अवदत्, को नाम, अपरः = अन्यः, शिववीरात् = शिवाजी इति ख्यातात्, सः = शिववीरः एव, राजनीतौ = नृपनये, निष्णातः = पण्डितः, स एव, सैन्धवाऽऽरोहविद्यासिन्धुः = घोटकाऽऽरोहविद्यासागरः, स एव, चन्द्रहास-चालने = खड्गप्रहारे, चतुरः = पण्डितः, स एव, मल्लविद्यामर्मज्ञः = मल्लविद्या-धुरन्धरः, स एव, बाणविद्यावारिधिः = शरसन्धानसागरः, स एव, पण्डितमण्डल-मण्डनः = विद्वद्वर्गविभूषणः, स एव, धैर्यधारिधौरेयः = धीरतासम्पन्नसमुद्रः, स एव, वीरवारवरः = शूरसमूहश्रेष्ठः, स एव, पुरुषपौरुषपरीक्षकः = नरपौरुष-निकषोपलः, स एव, दीनदुःखदावदहनः = अनाथक्लेशविपिनाग्निः, स एव, स्वधर्मरक्षणसक्षणः = निजधर्मावनसोत्साहः, स एव, विलक्षणविचक्षणः = विशिष्टविद्वान्, स एव च, मादृशगुणिगणगुणग्रहणाऽऽग्रही = मद्विधगुणिसमूह-गुणग्रहणाऽऽग्रही, वर्तते = अस्ति ।

समासः—सैन्धवानामारोहविद्यायाः सिन्धुः सैन्धवारोहविद्यासिन्धुः। चन्द्रहासस्य चालने चन्द्रहासचालने। मल्लविद्यायाः मर्मज्ञः। बाणविद्यायाः वारिधिः। पण्डितानां मण्डलस्य मण्डनः पण्डितमण्डलमण्डनः। धैर्यधारिषु धौरेयः धैर्यधारिधौरेयः। वीराणां वारेषु वरः वीरवारवरः। पुरुषाणां पौरुषस्य परीक्षकः पुरुषपौरुषपरीक्षकः। दीनानां दुःखदावस्य दहनः दीनदुःखदावदहनः। स्वस्य धर्मस्य रक्षणे सक्षणः स्वधर्मरक्षणसक्षणः। मादृशानां गुणिगणानां गुणग्रहणे आग्रही मादृशगुणिगणगुणग्रहणाऽऽग्रही।

(४१) 'भगवन्! सामान्य-राजभृत्यस्य पुत्रः शिववीरो यदि नाम नाऽभविष्यत् स्वयमीदृश ऊर्जस्वलः, तत् कथं स्वर्णदेव-सदृश-सहचरं प्राप्स्यत्? तद्द्वारा समस्तं कल्याण-प्रदेशं कल्याण-दुर्गं च स्वहस्तगतमकरिष्यत्? कथं तोरण-दुर्गभोग-भाजनतामकलयिष्यत्? कथं तोरण-दुर्गाद् दक्षिण-पूर्वस्यां पर्वतस्य शिखरे महेन्द्रमन्दिर-खण्डमिव धर्षितारि-वर्गं डमरु-हुडुक्कार-तोषित-भर्गं रायगढनामकं महादुर्गं व्यरचयिष्यत्? कथं वा तपनीय-भित्तिका-जटित-महारत्न-किरणावली-वितन्यमान-महावितान-वितति-विरोचित-प्रताप-तापित-परिपन्थि-निवहं चन्द्रचुम्बन-चतुर-चारु-शिखर-निकरं भुशुण्डिका-किणाङ्कित-प्रचण्ड-भुज-दण्डरक्षक-कुलविधीयमान-परस्सहस्र-परिक्रमं धमद्धमद्दोधूयमानाऽनेक-ध्वज-पटल-निर्मथित-महाकाशं प्रताप-दुर्गं निरमापयिष्यत्? कथं वा 'आगत एष शिववीरः' इति भ्रमेणापि सम्भाव्य अस्य विरोधिषु केचन मूर्च्छिता निपतन्ति, अन्ये विस्मृत-शस्त्रास्त्राः पलायन्ते, इतरे महात्रासाऽऽकुञ्चितोदरा विशिथिल-वाससो नग्ना भवन्ति, अपरे च शुष्कमुखा दशनेषु तृणं सन्धाय साम्रेडं प्रणिपात-परम्परा रचयन्तो जीवनं याचन्ते।

प्रसङ्गः—श्रीमदम्बिकादत्तव्यासविरचितशिवराजविजयस्य द्वितीयनिश्वासाद् गृहीतोऽयमंशः। तानरङ्गो वदत्यत्र अपजलखानम्।

व्याख्या—भगवन्! = श्रीमन्! सामान्यराजभृत्यस्य = साधारणराजसेवकस्य, पुत्रः = सुतः, शिववीरः, यदि = चेत्, नाम, नाभविष्यत् = न स्यात्, स्वयमीदृशः = ईदृग्विधः, ऊर्जस्वलः = तेजस्वी, तत् कथं, स्वर्णदेवसदृशसहचरम् = स्वर्णदेवसमसहायकम्, प्राप्स्यत् = अवाप्स्यत्? तद् द्वारा = स्वर्णदेवद्वारा, समस्तम् = सकलम्, कल्याणप्रदेशं कल्याणदुर्गं च = एतन्नामकं प्रदेशं दुर्गंञ्च, स्वहस्तगतम् = स्वाधीनम्, अकरिष्यत् = सम्पादयिष्यत्। कथम् = केन प्रकारेण, तोरणदुर्गभोगभाजनताम् = एतन्नामकदुर्गभोग्यपात्रताम्, अकलयिष्यत् = अकरि-

ष्यत्। कथं तोरणदुर्गाद्=एतद्दुर्गाद्, दक्षिणपूर्वस्याम्=दक्षिणपूर्वायाम्, महेन्द्रमन्दिरखण्डमिव=देवेन्द्रसद्मांश इव, धर्षितारिवर्गम्=भयभीतरिपुवर्गम्, डमरुहुडुक्कारतोषितभर्गम्=डमरुध्वनितोषितशिवम्, रायगढनामकम्=एतन्नामानं महादुर्गम्, व्यरचयिष्यत्=अघटयिष्यत्। कथं वा, तपनीयभित्तिकाजटितमहारत्नकिरणावलीवितन्यमानमहावितानवितितिविरोचितप्रतापतापितपरिपन्थिनिवहम् = हिरण्यभित्तिखचितहीरकादिमयूखसमूहविस्तार्यमाणमहोल्लोचविस्तारशोभिततेजोज्ज्वलितशत्रुसमूहम्, चन्द्रचुम्बनचतुरचारुशिखरनिकरम्=शशिस्पर्शपटुसुन्दरशिखरसमूहम्, भुशुण्डिकाकिणाङ्कितप्रचण्डभुजदण्डरक्षककुलविधीयमानपरस्सहस्रपरिक्रमम् = वन्दूकनामकास्त्रविशेषाघातचिह्नितभीमबाहुदण्डरक्षकसमूहक्रियमाणपरस्सहस्रमण्डलम्, धमद्धमद्दोधूयमानानेकध्वजपटलनिर्मथितमहाकाशम् = धम्-धम्-इत्याकारकशब्दसञ्चलदनेकपताकानिवहनिर्मथितगगनाभोगम्, प्रतापदुर्गम्=एतन्नामकदुर्गम्, निरमापयिष्यत्=व्यरचयिष्यत्? कथं वा, आगतः=समायातः, एष वीरः=अयं भटः, इति=ईदृग्विधेन, भ्रमेणापि, सम्भाव्य=भावयित्वा, अस्य=शिवस्य, विरोधिषु=शत्रुषु, केचन=केचित्, मूर्च्छिताः=संज्ञारहिताः, निपतन्ति=धराशायिनो भवन्ति, अन्ये=इतरे, विस्मृतशस्त्रास्त्राः=शस्त्रास्त्रस्मृतिविरहिताः, पलायन्ते=दूरं यान्ति, इतरे=अन्ये, महात्रासाऽऽकुञ्चितोदरा=महाभयकृशोदरा, विशिथिलवाससः=विश्लथवस्त्राः, नग्ना, भवन्ति=जायन्ते, अपरे च=इतरे च शुष्कमुखाः=विशुष्कवदनाः, दशनेषु=दन्तेषु, तृणं, सन्धाय=धृत्वा, साम्रेडं=वारं वारम्, प्रणिपातपरम्पराः=नमस्कारपद्धतयः, रचयन्तः=घटयन्तः, जीवनम्=प्राणान्, याचन्ते=भिक्षन्ते।

समासः—सामान्यस्य राजभृत्यस्य सामान्यराजभृत्यस्य। स्वर्णदेवेन सदृशं सहचरं स्वर्णदेवसदृशसहचरम्। तोरणदुर्गभोगस्य भाजनतां तोरणदुर्गभोगभाजनताम्। महेन्द्रमन्दिरस्य खण्डमिव महेन्द्रमन्दिरखण्डमिव। धर्षितः अरीणां वर्गः यत्र तत् धर्षितारिवर्गम्। डमरोः हुडुक्कारेण तोषितः भर्गः यत्र तत् डमरुहुडुक्कारतोषितभर्गम्। तपनीयस्य भित्तिकासु जटितानां महारत्नानां किरणावलीभिः वितन्यमानस्य महावितानस्य, वितत्या विरोचितेन प्रतापेन तापितः परिपन्थिनिवहः येन, तं तपनीयभित्तिकाजटितमहारत्नकिरणावलीवितन्यमानमहावितानवितितिविरोचितप्रतापतापितपरिपन्थिनिवहम्। चन्द्रस्य चुम्बने चतुरः चारुः शिखराणां निकरः यस्य, तं चन्द्रचुम्बनचतुरचारुशिखरनिकरम्। भुशुण्डिकानां

किणै: अङ्कित प्रचण्डा: भुजा: दण्डा इव येषां, तेषां रक्षकाणाम्, कुलेन विधीयमाना: परस्सहस्रपरिक्रमा: यस्य, तं भुशुण्डिकाकिणाङ्कितप्रचण्डभुजदण्डरक्षककुलविधीयमानपरस्सहस्रपरिक्रमम् । धमद्धमदिति शब्देन दोधूयमानानाम् अनेकेषां ध्वजानां पटलेन निर्मथित: महाकाश: येन, तं धमद्धमद्दोधूयमानानेकध्वजपटलनिर्मथितमहाकाशम् । विस्मृतानि शस्त्राणि अस्त्राणि येषां ते विस्मृतशस्त्रास्त्रा: । महात्रासेन आकुञ्चितानि उदराणि येषां ते महात्रासाऽऽकुञ्चितोदरा। विशिथिलानि वासांसि येषां ते विशिथिलवासस: । शुष्कं मुखं येषां ते शुष्कमुखा: । प्रणिपातानां परम्परा: प्रणिपातपरम्परा: ।

(४२) अथ सहासं सोऽब्रवीत्—'को नाम खपुष्पायित:, शशशृङ्गायित:, कमठीस्तन्यायित:, सरीसृप-श्रवणायित:, भेक-रसनायित: वन्ध्यापुत्रायितश्च शिवोऽस्ति ? य एनं रक्षिष्यति, दृश्यतां श्व एवैषोऽस्माभि: पाशैर्बद्ध्वा चपेटैस्ताड्यमानो विजयपुरं नीयते ।'

इति सकष्टमाकर्ण्य, 'स्यादेवं भगवन् !' इति कथयति तानरङ्गे अभिमानपरवश: स स्वसहचरान् सम्बोध्य पुनरादिशत्–'भो-भो योद्धार: ! सूर्योदयात् प्रागेव भवन्त: पञ्चाऽपि सहस्राणि सादिनां दशाऽपि च सहस्राणि पत्तीनां सज्जीकृत्य युद्धाय तिष्ठत । गोपीनाथपण्डित-द्वाराऽऽहूतोऽस्ति मया शिव-वराक: । तद् यदि विश्वस्य स समागच्छेत्, ततस्तु बद्ध्वा जीवन्तं नेष्याम:, अन्यथा तु सदुर्गमेनं धूलीकरिष्याम: । यद्यप्येवं स्पष्टमुदीरणं राजनीति-विरुद्धम्, तथाऽपि मदावेशस्तु न प्रतीक्षते विवेकम् ।

प्रसङ्ग:—श्रीमदम्बिकादत्तव्यासविरचितशिवराजविजयस्य द्वितीयनिश्वासाद् गृहीतोऽयमंश: । अपजलखानस्योक्तिरियम् ।

व्याख्या—अथ = तानरङ्गवाक्यश्रवणोत्तरम्, सहासम् = हासपूर्वकम्, स: = अपजलखान:, अब्रवीत् = अवदत्—को नाम, खपुष्पायित: = गगनकुसुमायित:, शशशृङ्गायित: = शशविषाणायित:, कमठीस्तन्यायित: = कच्छपीस्तन्यायित:, सरीसृपश्रवणायित: = सर्पश्रोत्रायित:, भेकरसनायित: = व्यङ्गजिह्वायित:, वन्ध्यापुत्रायित: = वन्ध्यासुतायितश्च, शिव: = शङ्कर:, अस्ति = वर्तते, य एनम् = शिववीरम्, रक्षिष्यति = गोपयिष्यति । दृश्यताम् = अवलोक्यताम्, श्व: = आगामि दिने एव, एष: = शिववीर:, अस्माभि: = यवनै:, पाशै: = रज्जुभि:, बद्ध्वा = संयम्य, चपेटै:, ताड्यमान: = पेठ्यमान:, विजयपुरम् = अस्मत्स्वामिनगरम्, नीयते = नेष्यते ।

इति = इत्थम्, सकष्टम् = सपीडम्, आकर्ण्य = श्रुत्वा, स्यादेवं भगवन् ! = सम्भवोऽयमपि श्रीमन् ! इति कथयति = वदति, तानरङ्गे = गौरसिंहे, अभिमानपरवशः = गर्वनिर्भरः, सः = यवनसेनापतिः, स्वसहचरान् = निजसैनिकान्, सम्बोध्य, पुनरादिशत् = भूयः समादिदेश, भो भो योद्धारः ! = सैनिकाः ! सूर्योदयात् = रव्युदयात्, प्रागेव = पूर्वमेव, भवन्तः = श्रीमन्तः, पञ्चापि, सहस्राणि, सादिनाम् = वाजिनाम्, दशाऽपि च सहस्राणि पत्तीनाम् = पदातीनाम्, सज्जीकृत्य, युद्धाय = समराय, तिष्ठत । गोपीनाथपण्डितद्वाराऽऽहूतोऽस्ति = आकारितोऽस्ति, मया = यवनसेनापतिना, शिववराकः = पामरः शिवः, तद्, यदि = चेत्, विश्वस्य सः = शिववीरः समागच्छेत् = समाव्रजेत्, ततस्तु, बद्ध्वा = नियम्य, जीवन्तम् = प्राणन्तम्, नेष्यामः, अन्यथा तु, सदुर्गम् = दुर्गयुतम्, एनम् = शिवम्, धूलीकरिष्यामः = धूलिसात् विधास्यामः, यद्यप्येवं, स्पष्टमुदीरणम् = स्पष्टभाषणम्, राजनीतिविरुद्धम् = नृपनयविपरीतम्, तथापि = पुनरपि, मदावेशस्तु = मम उत्साहस्तु, न = नहि, प्रतीक्षते विवेकम् = कर्तव्यविचारम् ।

(४३) शिववीरः—'शिव ! शिव ! खलु खलु खल्विदमुक्त्वा, येषां श्रीमतां चरणेनाऽङ्कितं विष्णोरपि वक्षःस्थलमैश्वर्य-मुद्रयेव मुद्रितं विभाति; न तेषां ब्राह्मणकुल-कमल-दिवाकराणां यवन-कैङ्कर्य-कलङ्क-पङ्को युज्यते, यं शृण्वतोऽपि मम स्फुटत इव कर्णौ । तथापि कुलीना निरभिमाना भवन्ति—इति आनीतश्चेत् कश्चित् सन्देशः, तदेष आज्ञाप्यतां श्रीमच्चरण-कमल-चञ्चरीकः ।'

प्रसङ्गः—श्रीमदम्बिकादत्तव्यासविरचितशिवराजविजयस्य द्वितीयनिश्वासाद् गृहीतोऽयं गद्यखण्डः । शिववीरस्योक्तिरियम् ।

व्याख्या—शिववीरः = शिवाजी इति नाम्ना प्रसिद्धः वीरः, शिव शिव, खलु खलु खल्विदमुक्त्वा = ईदृगवाच्यम्, येषां श्रीमताम् = पूज्यानां, चरणेनाङ्कितम् = पादेन चिह्नितम्, विष्णोरपि = लक्ष्मीपतेरपि, वक्षःस्थलम् = उरः, ऐश्वर्यमुद्रयेव = सौभाग्यशोभयेव, मुद्रितम् = शोभितम्, विभाति = शोभते, न तेषां, ब्राह्मणकुलकमलदिवाकराणाम् = द्विजान्वयपद्मदिनकराणाम्, यवनकैङ्कर्यकलङ्कपङ्कः = तुरुष्कसेवादोषमलीमसः, युज्यते = युक्तं प्रतिभाति, यं, शृण्वतोऽपि = श्रवणनिरतस्यापि, मम = शिवस्य, स्फुटतः = भिद्यत इव, कर्णौ = श्रोत्रौ, तथाऽपि = पुनरपि, कुलीनाः = सद्वंशीयाः, निरभिमानाः = अमानाः भवन्ति, इति = इत्थं विचार्य, आनीतश्चेत् = समानीतश्चेत्, कश्चित्, सन्देशः = कथनीय-

वाक्यसन्दोहः, तदेव, आज्ञाप्यताम् = उच्यताम्, श्रीमच्चरणकमलचञ्चरीकः = त्वत्पादारविन्दभ्रमरः ।

समासः—ऐश्वर्यस्य मुद्रया ऐश्वर्यमुद्रया । ब्राह्मणस्य कुलमेव कमलं, तस्य दिवाकराणां ब्राह्मणकुलकमलदिवाकराणाम् । यवनानां कैङ्कर्यमेव कलङ्कपङ्को यवनकैङ्कर्यकलङ्कपङ्कः । श्रीमतां चरणकमलानां चञ्चरीकः श्रीमच्चरणकमल-चञ्चरीकः ।

(४४) गोपीनाथः—'कथयति विजयपुरेश्वरो यद्—वीर ! परित्यज नवामिमां चञ्चलतामस्माभिः सह युद्धस्य, त्वदपेक्षयाऽत्यन्तमधिकं बलिनो वयम्, प्रवृद्धोऽत्र कोषः, महती सेना, बहूनि दुर्गाणि, बहवश्च वीराः सन्ति । तच्छुभमात्मन इच्छसि चेत्, त्यक्त्वा निखिलां चञ्चलताम्, शस्त्रं दूरतः परित्यज्य, करप्रदतामङ्गीकृत्य, समागच्छ मत्सभायाम् । मत्तः प्राप्त-पदश्चिरं जीविष्यसि, अन्यथा तु सदुर्दशं निहतः कथावशेषः संवत्स्र्यसि । तत् केवलं त्वयि दययैव सन्देशं प्रेषयामि, अङ्गीकुरु । मा स्म वृद्धायाः प्रसविन्या रजतश्वेतां पक्ष्मपङ्क्तिमश्रु-प्रवाह-दुर्दिने पातय—इति' ।

शिववीरः—'भगवन् ! कथयेदेवं कश्चिद् यवनराजः, परं किं भवानपि मामनुमन्यते—यद् ये अस्मदिष्टदेवमूर्तीर्भङ्क्त्वा, मन्दिराणि समुन्मूल्य, तीर्थस्थानानि पक्कणीकृत्य, पुराणानि पिष्ट्वा वेदपुस्तकानि विदार्य च, आर्यवंशीयान् बलाद् यवनीकुर्वन्ति; तेषामेव चरणयोरञ्जलिं बद्ध्वा लालाटिकतामङ्गीकुर्याम् ? एवं चेद् धिङ् मां कुल-कलङ्कं क्लीवम्; यः प्राणभयेन सनातनधर्म-द्वेषिणां वासेरकतां वहेत् । यदि चाऽहमाहवे म्रियेय, वध्येय, ताड्येय वा, तदैव धन्योऽहम्, धन्यौ च मम पितरौ । कथ्यतां भवादृशां विदुषामत्र का सम्मतिः ?

प्रसङ्गः—श्रीमदम्बिकादत्तव्यासविरचितशिवराजविजयस्य द्वितीयनिश्वासात् गृहीता पङ्क्तयश्चेमाः । अपजलखानसन्देशहरो गोपीनाथो वदति शिववीरम् ।

व्याख्या—कथयति = वदति, विजयपुरेश्वरः = बीजापुरसुल्तानाभिधानेन प्रजासु विश्रुतः, यद्—वीर ! = भटवर ! परित्यज = मुञ्च, नवामिमाम् = नूतनामिमाम्, चञ्चलताम् = अस्थिरताम्, अस्माभिः = राजाधिराजैः, सह = साकम्, युद्धस्य = समरस्य, त्वदपेक्षया, अत्यन्तमधिकम् = प्रभूतम्, बलिनः = बलसम्पन्नाः, वयम् = यवनाः, प्रवृद्धोऽत्र = बहुसङ्ख्यकोऽत्र, कोषः = धनानि, महती = बहुसङ्ख्यका, सेना = अनीकनी, बहूनि = बहुसङ्ख्यकानि, दुर्गाणि, बहवः = बहुसङ्ख्यकाः च, वीराः = भटाः, सन्ति = वर्तन्ते । तत् शुभमात्मनः = कल्याणं

स्वस्य, इच्छसि = वाञ्छसि चेत्, त्यक्त्वा = परित्यज्य, निखिलाम् = सकलाम्, चञ्चलताम् = चपलताम्, शस्त्रम् = क्षेपणीयादिकम्, दूरत: = सुदूरत:, परित्यज्य = त्यक्त्वा, करप्रदतामङ्गीकृत्य = अधीनत्वं स्वीकृत्य, समागच्छ = आयाहि, मत्सभायाम् = अस्माकं परिषदि, मत्त: = यवनशासकात्, प्राप्तपद: = लब्धप्रतिष्ठितस्थानक:, चिरम् = बहुकालम्, जीविष्यसि = जीवितो भविष्यति, अन्यथा तु, सदुर्दशम् = दुर्दशासहितम्, निहत: = व्यापादित:, कथावशेष: = मृत:, भवितस्यसि = भविष्यसि, तत् केवलम् = मात्रम्, त्वयि = शिवे, दययैव = कृपयैव, सन्देशम् = सूचना, प्रेषयामि = प्रहिणोमि, अङ्गीकुरु = स्वीकुरु। मा स्म = न च, वृद्धाया: = जरत्या:, प्रसविन्या: = मातु:, रजतश्वेताम् = रजतसमशुभ्राम्, पक्ष्मपङ्क्तिम् = भ्रूराजिम्, अश्रुप्रवाहदुर्दिने = नेत्रजलधारासारे, पातय = मज्जय, इति।

भगवन्! = श्रीमन्! कथयेदेवम् = वदेदेवम्, कश्चित्, यवनराज: = तुरुष्कपति:, परम् = किन्तु, किं, भवानपि = श्रीमानपि, मामनुमन्यते = मामनुज्ञापते, यद् ये, अस्मदिष्टदेवमूर्ती: = अस्मत्प्रियदेवप्रतिमा:, भङ्क्त्वा = विभज्य, मन्दिराणि = देवायतनानि, समुन्मूल्य = मूलघातं नाशयित्वा, तीर्थस्थानानि = तीर्थास्पदानि, पङ्ककणीकृत्य = शवरसदनीकृत्य, पुराणानि = व्यासवचनानि, पिष्ट्वा = निष्पिष्य, वेदपुस्तकानि = श्रुती:, विदार्य = विदीर्य च, आर्यवंशीयान् = भारतीयान्, बलात् = हठात्, यवनीकुर्वन्ति = तुरुष्कीकुर्वन्ति, तेषामेव, चरणयो: = पादयो:, अञ्जलिम् = करसम्पुटम्, बद्ध्वा = संयोज्य, लालाटिकताम् = भृत्यताम्, अङ्गीकुर्याम् = स्वीकुर्याम्? एवं चेद्, धिङ् मां, कुलकलङ्कम् = वंशदूषकम्, क्लीवम् = नपुंसकम्, य: प्राणभयेन = जीवनलोभेन, सनातनधर्मद्वेषिणाम् = आर्यधर्मविनाशिनाम्, दासेरकताम् = दासताम्, वहेत् = धारयेत्। यदि चाहमाहवे = युद्धे, म्रियेय = मरणं प्राप्नुयाम्, वध्येय = वधं वा प्राप्नुयाम्, ताड्येय वा = ताडनं वा प्राप्नुयाम्, तदैव, धन्योऽहम् = धन्यवादार्होऽहम्, धन्यौ = पुण्यात्मानौ च, मम = शिवस्य, पितरौ = प्रसूजनयितारौ। कथ्यताम् = उच्यताम्, भवादृशाम् = भवद्विधानाम्, विदुषामत्र-सुमनसां बुधानामस्मिन् विषये का सम्मति:?

समास:—करस्य प्रदतां करप्रदताम्। प्राप्तं पदं येन स: प्राप्तपद:। दुर्दशया सहितं सदुर्दशम्। रजत इव श्वेतां रजतश्वेताम्। पक्ष्मणो: पङ्क्ति पक्ष्मपङ्क्तिम्। अश्रूणां प्रवाहेण दुर्दिने अश्रुप्रवाहदुर्दिने। इष्टानां देवानां

मूर्तीः इष्टदेवमूर्तीः। तीर्थानां स्थानानि तीर्थस्थानानि। वेदानां पुस्तकानि वेदपुस्तकानि। सनातनस्य धर्मस्य द्वेषिणां सनातनधर्मद्वेषिणाम्।

(४५) बहवो--'वयमद्य शिवमवश्यमेव विजेष्यामहे; परं तथाऽपि न जानीमहे किमिति कम्पत इव हृदयम्, अहो! विलक्षणः प्रताप एतस्य, पवनेऽपि प्रवहति, पतत्रेऽपि पतति, पत्रेऽपि मर्मरीभवति, स एवाऽऽगत इत्यभिशङ्क्यतेऽस्माभिः। अहह!! विचित्रोऽयं वीरो, यो दुर्ग-प्राचीरमुल्लङ्घ्य, प्रहरि-परीवारमविगणय्य, लोहार्गल-शृङ्खलासहस्र-नद्धानि करि-कुम्भाघात-सहानि द्वाराणि प्रविश्य, विकोशचन्द्रहासाऽसिधेनुका-रिष्टि-तोमर-शक्ति-त्रिशूल-मुद्गर-भुशुण्डी-कराणां रक्षकाणां मण्डलमवहेल्य, प्रियाभिः सह पर्य्यङ्केषु सुप्तानामपि प्रत्यर्थिनां वक्षःस्थलमारोहति, निद्रास्वपि तान् न जहाति, स्वप्नेष्वपि च विदारयति। कथमेतस्य चञ्चच्चन्द्रहास-चमत्कार-चाकचक्य-चिल्लीभूत-चक्षुष्काः समराङ्गणे स्थास्यामः?' इति चिन्ताचक्रमारूढा अपि कथं कथमपि कैश्चित् वीरवरैर्वर्धितोत्साहाः समर-भूमिमवातरन्।

अथ कथञ्चित् प्रकाश-बहुले, संवृत्ते नभःस्थले, परस्परं परिचीयमानासु आकृतिषु, कमलेष्विव विकचतामासादयत्सु वीरवदनेषु, भ्रमरालिष्विव परितः प्रस्फुरन्तीषु असि-पङ्क्तिषु, चाटकैर-चकचकायितेषु कवच-चकत्कारेषु, गोपीनाथ-पण्डितो वारमेकं शिववीरदिशि परतश्च यवन-सेनापति-दिशि गतागतं विधाय, सेनाद्वयस्य मध्य एव कस्मिंश्चित् पट-कुटीरे अपजलखानमानेतुं प्रबबन्ध।

प्रसङ्गः---अपजलखानस्य समराङ्गणावतरणं वर्णयति कविरत्र श्रीमदम्बिकादत्तव्यासविरचितस्य शिवराजविजयस्य द्वितीयनिश्वासे।

व्याख्या—बहवः=यवनसैनिकाः, कथयन्ति स्म—वयम्=यवनाः, अद्य, शिवम्=शिववीरम्, अवश्यमेव=निश्चितमेव, विजेष्यामहे=विजयं प्राप्स्यामहे, परं, तथाऽपि=पुनरपि, न, जानीमहे=जानीमः, किमिति, कम्पते=वेपते, इव, हृदयम्=मनः, अहो! विलक्षणः=विचित्रः, प्रतापः=तेजोराशिः, एतस्य=शिवस्य, पवनेऽपि=वायौ अपि, प्रवहति=चलति, पतत्रे=पक्षिणि अपि, पतति=चलति, पत्रे अपि=शुष्कपर्णे अपि, मर्मरीभवति=मर्मरध्वनिं कुर्वति, सः=शिव एव, आगतः=समायातः, इति अभिशङ्क्यते=शङ्का क्रियते, अस्माभिः=यवनैः, अहह!=आश्चर्यम्! विचित्रः=विलक्षणः, अयम्=मस्तिष्कोपस्थितः, वीरः=भटः, यो दुर्गप्राचीरम्=दुर्गप्राकारम्, उल्लङ्घ्य=उत्तीर्य, प्रहरिपरीवारम्=रक्षकगणम्, अविगणय्य=तिरस्कृत्य, लोहार्गल-

शृङ्खलासहस्रनद्धानि = कृष्णापसार्गलशृङ्खलासहस्ररचितानि, करिकुम्भाघातसहानि = गजकुम्भप्रहारसहानि, द्वाराणि = कपाटानि, प्रविश्य, विकोशचन्द्रहासाऽसिधेनुकारिष्टितोमरशक्तित्रिशूलमुद्गरभुशुण्डीकराणाम् = नग्नखड्गाऽसिधेनुकारिष्टितोमरशक्तित्रिशूलमुद्गरभुशुण्डीहस्तानाम्, रक्षकाणाम्=प्रहरीणाम्, मण्डलम् = समूहम्, अवहेल्य = तिरस्कृत्य, स्त्रियाभिः = रमणीभिः, सह=साकम्, पर्यङ्केषु = शोभनखट्वासु, सुप्तानामपि=निद्रितानामपि, प्रत्यर्थिनाम्=रिपूणाम्, वक्षःस्थम् = उरः, आरोहति, निद्रास्वपि = सुप्तेष्वपि, तान् = रिपून्, न जहाति =न त्यजति, स्वप्नेष्वपि = स्वप्नदर्शनकालेष्वपि, विदारयति = विभजति भागद्वये। कथम् = केन प्रकारेण, एतस्य=शिवस्य, चञ्चचन्द्रहासचमत्कारचाकचक्यचिल्लीभूतचक्षुष्काः = चलत्खड्गचमत्कृतिचाकचक्यक्लिन्नीभूतनयनाः, समराङ्गणे = युद्धे, स्थास्यामः = स्थिता भविष्यामः, इति चिन्ताचक्रमारूढा = चिन्तनचक्रमारूढा अपि, कथं कथमपि = येन केनाऽपि प्रकारेण, कैश्चित् वीरवरैः =भटश्रेष्ठैः, वर्धितोत्साहाः = समृद्धोत्साहाः, समरभूमिम्=युद्धभुवम्, अवातरन् =समागच्छन्।

अथ = समागमानन्तरम्, कथञ्चित् = केनापि प्रकारेण, प्रकाशबहुले=प्रभूतप्रकाशयुक्ते, संवृत्ते = भूते, नभःस्थले = आकाशे, परस्परम् = अन्योऽन्यम्, परिचीयमानासु = संस्तवविषयतामागतासु, आकृतिषु = आकारेषु, कमलेष्विव = पद्मेष्विव, विकचतामासादयत्सु = विकासमागच्छत्सु, वीरवदनेषु = भटमुखेषु, भ्रमरालिष्विव = द्विरेफमालास्विव, परितः = सर्वतः, प्रस्फुरन्तीषु = स्फुरणशीलासु, असिपङ्क्तिषु = खड्गचक्रेषु, चाटकैरचकचकायितेषु = चटकापुत्राणां चकचकमिवाचरितेषु, कवचचकत्कारेषु=उरश्छदतादृशशब्देषु, गोपीनाथपण्डितः =एतन्नामा यवनसन्देशहरः, वारमेकं शिववीरदिशि = शिवराजदिशायाम्, परतश्च = द्वितीयवारम्, यवनसेनापतिदिशि = तुरुष्कगणपदिशायाम्, गतागतम्= चङ्क्रमणम्, विधाय = कृत्वा, सेनाद्वयस्य = बलोभयस्य, मध्ये = अन्तराले एव, कस्मिंश्चित्, पटकुटीरे = वस्त्रगेहे, अपजलखानमानेतुम् = यवनसेनापतिमानेतुम्, प्रबन्ध = प्रबन्धमकरोत्

समासः—दुर्गस्य प्राचीरं दुर्गप्राचीरम्। प्रहरीणां परीवारं प्रहरिपरीवारम्। लोहार्गलस्य शृङ्खलानां सहस्रैः नद्धानि लोहार्गलशृङ्खलासहस्रनद्धानि। करीणां कुम्भस्य आघातसहानि करिकुम्भाघातसहानि। विकोशः चन्द्रहासः असिधेनुका, रिष्टिः तोमरं शक्तिः त्रिशूलं मुद्गरं भुशुण्डी च करे येषाम्, तेषां विकोशचन्द्र-

ह्रासासिधेनुकारिष्टितोमरशक्तित्रिशूलमुद्गरभुशुण्डीकराणाम् । चञ्चतां चन्द्रहासानां चमत्कारस्य चाकचक्येन चिल्लीभूतानि चक्षूंषि येषां ते चञ्चच्चद्रहास-चमत्कारचाकचक्यचिल्लीभूतचक्षुष्काः । चिन्तायाः चक्रं चिन्ताचक्रम् । वर्धिताः उत्साहाः येषां ते वर्धितोत्साहाः । समरस्य भूमिं समरभूमिम् । वीराणां वदनेषु वीरवदनेषु । यवनानां सेनापतेः दिशि यवनसेनापतिदिशि ।

(४६) अपजलखानोऽपि च—'यदाऽहमेनं साक्षात्कृत्य, करताडनमेकं कुर्य्याम्, तदैव तालिकाध्वनि-समकालमेव अमुकामुकैः श्येनैरिवाऽभिपत्य पाशैरेष बन्धनीयः, सेनया च क्षणात् तत्सेना झञ्झया घनघटेवाऽपनेया'—इति सङ्केत्य सूक्ष्मवसन-परिधानः, वज्रकजटितोष्णीषिकः; गल-विलुलित-पद्मराग-मालः, मुक्तागुच्छ-चोचुम्ब्यमान-भालः, निःश्वास-प्रश्वास-परिमथित-मद्य-गन्ध-परिपूरित-पार्श्वदेशान्तरालः, शोण-श्मश्रु-कूर्च-विजित-नूतन-प्रवालः, कञ्चुक-स्यूत-काञ्चन-कुसुमजालः विविध-वर्ण-वर्णनीय-शिबिकामारुह्य निर्दिष्ट-पटकुटीराभिमुखं प्रतस्थे।

इतस्तु कुरङ्गमिव तुरङ्गं नर्त्तयन् रश्मिग्राह-वेषेण गौरसिंहेनाऽनुगम्यमानः माल्यश्रीक-प्रभृतिभिर्वीर-वरैर्युद्ध-सज्जैः सतर्कं निरीक्ष्यमाणः शिववीरोऽपि तस्यैव सङ्केतितस्य समागमस्थानस्य निकटे एव सव्यकरेण वल्गामाकृष्याऽश्वमवारुधत्।

सन्दर्भः—अपजलखानशिववीरयोः समराङ्गणावतरणं वर्णयति श्रीमदम्बिकादत्तव्यासः शिवराजविजयस्य द्वितीये निश्वासे ।

व्याख्या—अपजलखानोऽपि = यवनसेनापतिरपि च, यदा, अहम्, एनम् = शिवम्, साक्षात्कृत्य = दृष्ट्वा, करताडनमेकम् = हस्तताडनमेकम्, कुर्य्याम् = विदध्याम्, तदैव, तालिकाध्वनिसमकालमेव = करतलशब्दसमसमयमेव, अमुकामुकैः, श्येनैरिवाभिपत्य = शशादनापातैरिव आक्रम्य, पाशैः = रज्जुभिः, एषः = शिवः, बन्धनीय = नियम्य, सेनया = बलेन च, क्षणात् = पलात्, तत्सेना = शिवसेना, झञ्झया = झञ्झावातेन, घनघटेव = मेघमालेव, अनपेया = दूरे करणीया, इति सङ्केत्य = सङ्केतं कृत्वा, सूक्ष्मवसनपरिधानः = सूक्ष्मवस्त्रवेषः, वज्रकजटितोष्णीषिकः = हीरकखचितोष्णीषिकः, गलविलुलितपद्मरागमालः = कण्ठलोलपद्मरागहारः, मुक्तागुच्छचोचुम्ब्यमानभालः=मौक्तिकसमूहस्पष्टललाटः, निःश्वासप्रश्वासपरिमथितमद्यगन्धपरिपूरितपार्श्वदेशान्तरालः=श्वासोच्छ्वासपरिमथितमदिरागन्धपूरितसमीपदेशभागः, शोणश्मश्रुकूर्चविजितनूतनप्रवालः = रक्तश्मश्रुकूर्चजितनवपल्लवः, कञ्चुकस्यूतकाञ्चनकुसुमजालः = अङ्गरक्षकस्यूतसुवर्णपुष्पसमूहः, विविधवर्णवर्णनीयशिबिकाम् = अनेकरङ्गप्रशंसनीयपुरुषवाह्य-

नम्, आरुह्य, निर्दिष्टपटकुटीराभिमुखम्=सङ्केतितवसनगेहाभिमुखम्, प्रतस्थे =प्रस्थानमकरोत् ।

इतस्तु=शिवपक्षे तु, कुरङ्गमिव=हरिणमिव, तुरङ्गम्=घोटकम्, नर्तयन् =चालयन्, रश्मिग्राहवेषेण=रज्जुग्राहवेषेण, गौरसिंहेनानुगम्यमानः=एतन्नामक-ायकेनानुव्रज्यमानः, माल्यश्रीकप्रभृतिभिः=माल्यश्रीकादिभिः, वीरवरैः=श्रेष्ठैः, युद्धसज्जैः=समरोद्यतैः, सतर्कं, निरीक्ष्यमाणः=अवलोक्यमानः, वीरोऽपि=भारतभक्तोऽपि, तस्यैव सङ्केतितस्य=कृतसङ्केतस्य, समागम-ानस्य=मिलनस्थलस्य, निकटे=समीपे एव, सव्यकरेण=वामहस्तेन, गाम्=कविकाम्, आकृष्य=आकुञ्च्य, अवारुधत्=निरुद्धवान् ।

समासः—करस्य ताडनं करताडनम् । तालिकायाः ध्वनेः समकालमेव लिकाध्वनिसमकालमेव । सूक्ष्मः वसनपरिधानः यस्य सः सूक्ष्मवसनपरिधानः । क्रेण जटितां उष्णीषिका यस्यासौ वज्रकजटितोष्णीषिकः । गले विलुलिता रागस्य माला यस्यासौ गलविलुलितपद्मरागमालः । मुक्तायाः गुच्छेन चोचु-मानः भालो यस्यासौ मुक्तागुच्छचोचुम्ब्यमानभालः । निःश्वासप्रश्वासाभ्यां रिमथितो यो मद्यगन्धः, तेन परिपूरितं पार्श्वदेशान्तरालं येन सः निःश्वास-ासपरिमथितमद्यगन्धपरिपूरितपार्श्वदेशान्तरालः । शोणाभ्यां श्मश्रुकूर्चाभ्यां जितो नूतनः प्रवालः येन सः शोणश्मश्रुकूर्चविजितनूतनप्रवालः । कञ्चुके ताः काञ्चनकुसुमानां जाला यस्यासौ कञ्चुकस्यूतकाञ्चनकुसुमजालः । विविधैः ः वर्णनीयां शिविकां विवधवर्णवर्णनीयशिविकाम् । निर्दिष्टस्य पटकुटीर-ाभिमुखं निर्दिष्टपटकुटीराभिमुखम् । रश्मिग्राहस्य वेषेण रश्मिग्राहवेषेण । ाय सज्जैः युद्धसज्जैः ।.

(४७) ततस्तु, इतोऽश्वात् शिववीरः, ततस्तु शिविकातोऽपजलखानः अपि पदेवाऽवातरताम्, परस्परं साक्षात्कृत्य च, उभावप्युत्सुकाभ्यां नयनाभ्याम्, वराभ्यां पादाभ्याम्, स्वागताऽऽम्रेडनतत्परेण वदनेन, आश्लेषाय प्रसारिताभ्यां हस्ताभ्यां कौशेयास्तरणविरोचितायां बहिर्वेदिकायां धावमानौ परस्परमालि-ङ्गतुः ।

शिववीरस्तु आलिङ्गन-च्छलेनैव स्वहस्ताभ्यां तस्य स्कन्धौ दृढं गृहीत्वा हनखैर्जत्रुणी कन्धरां च व्यपाटयत् । रुधिरदिग्धं च तच्छरीरं कटि-प्रदेशे समु-ोल्य भूपृष्ठेऽपोथयत् ।

प्रसङ्गः—शिववीरस्य अपजलखानस्य च परस्परालिङ्गनं वर्णयत्यत्र श्रीमद
म्बिकादत्तव्यासः शिवराजविजयस्य द्वितीये निश्वासे।

व्याख्या—ततस्तु = समराङ्गणावतरणोत्तरं तु, इतोऽश्वात् = एकतः घो
कात्, शिववीरः, ततस्तु = शिववीरानन्तरं तु, शिविकातोऽपजलखानः = पु
वाह्ययानात् यवनसेनापतिः अपि, युगपदेवावतरताम् = सममेवागच्छता
परस्परम् = अन्योऽन्यम्, साक्षात्कृत्य = विलोक्य च, उभावपि = द्वावपि, उत्
काभ्याम् = सोत्कण्ठाभ्याम्, नयनाभ्याम् = नेत्राभ्याम्, सत्वराभ्याम् = शीघ्रत
युक्ताभ्याम्, पदाभ्याम् = चरणाभ्याम्, स्वागताऽऽम्रेडनतत्परेण = स्वागतं स्वाग
मिति भाषणे लीनेन, वदनेन = मुखेन, आश्लेषाय = आलिङ्गनाय, प्रसारित
भ्याम् = विस्तारिताभ्याञ्च, हस्ताभ्याम् = कराभ्याम्, कौशेयास्तरणविरोचित
याम् = क्षौमास्तरणशोभितायाम्, बहिर्वेदिकायाम् = बहिर्वेद्यम्, धावमानौ
धावन्तौ, परस्परम् = अन्योऽन्यम्, आलिलिङ्गतुः = आशिश्लिषतुः।

शिववीरस्तु, आलिङ्गनच्छलेनैव, = आश्लेषव्याजेनैव, स्वहस्ताभ्याम् = निज
कराभ्याम्, तस्य = अपजलखानस्य, स्कन्धौ = अंशौ, दृढम् = गाढम्, गृहीत्
= समाकृष्टय, सिंहनखैः = व्याघ्रनखरैः, जत्रुणी = स्कन्धसन्धी, कन्धरा
स्कन्धश्च, व्यपाटयत् = व्यदारयत्, रुधिरदिग्धम् = रक्तक्लिन्नञ्च, तच्छरीर
= अपजलखानदेहम्, कटिप्रदेशे = कटिभागे, समुत्तोल्य = समुत्थाप्य, भूपृष्ठे
धराफलके, अपोथयत् = न्यपातयत।

समासः—स्वागतस्य आम्रेडने तत्परेण स्वागताऽऽम्रेडनतत्परेण। कौशेये
आस्तरणेन विरोचितायां कौशेयास्तरणविरोचितायाम्। आलिङ्गनस्य छले
आलिङ्गनच्छलेन।

(४८) तत्क्षणादेव च शिववीर-ध्वजिन्यां महाध्वज एक समुच्छ्रितः
तत्समकालमेव यवनशिविरस्य पृष्ठस्थिता शिववीर-सेना शिविरमग्निसात्कृतवती
पुरःस्थित-सेनासु च अकस्मादेव महाराष्ट्र-केसरिणः समपतन्। तेषां 'हरहर
महादेव' गर्जनपुरस्सरं 'छिन्धि-भिन्धि-मारय-विपोथय' इति कोलाहलः, प्रत्य
र्थिनां च 'खुदा-तोबा-अल्लादि' पारस्य-पदमयः कलकलो रोदसी समपूरयत्।

सन्दर्भः—यवनसेनानिग्रहं वर्णयत्यत्र श्रीमदम्बिकादत्तव्यासः शिवराज
विजयस्य द्वितीये निश्वासे।

व्याख्या—तत्क्षणादेव = सद्य एव च, शिववीरध्वजिन्याम् = शिववीर
सेनायाम्, महाध्वजः = बृहद्ध्वजः, एकः समुच्छ्रितः = ऊर्ध्वीभूतः, तत्समकाल

=ध्वजसमुच्छ्रयणकालमेव, यवनशिविरस्य = तुरुष्कपटगृहस्य, पृष्ठस्थिता पृष्ठभागवर्तमाना, शिववीरसेना = शिववीरवाहिनी, शिविरम् = यवनसेनापटम्, अग्निसात्कृतवती = भस्मीचकार, पुरःस्थितसेनासु च = अग्रस्थवाहिनीसु अकस्मादेव=सहसैव, महाराष्ट्रकेसरिणः=शिववीरसैनिकाः, समपतन्=आक्रान्तवन्तः, तेषाम् = शिवसैनिकानाम्, 'हरहर महादेव' गर्जनपुरस्सरम् = 'हर-हर-महादेव'तारोच्चारणपूर्वकम्, छिन्धि भिन्धि = छिन्नं कुरु भिन्नं कुरु, मारय ताडय, विपोथय = निपातय, इति, कोलाहलः = शब्दः, प्रत्यर्थिनां च = शत्रूणां च, खुदा-तोबा=अल्लादि, पारस्यपदमयः = पारसीशब्दप्रचुरः, कलकलः= ध्वनिः, रोदसी = द्यावापृथिव्यौ, समपूरयत् = पूरितवान् ।

समासः—शिववीरस्य ध्वजिन्यां शिववीरध्वजिन्याम् । महा चासौ ध्वजश्च महाध्वजः । यवनानां शिविरस्य यवनशिविरस्य । शिववीरस्य सेना शिववीरसेना ।

(४९) ततो यवन-सेनासु शतशः सादिनः गगनं चोचुम्ब्यमानाः, कृतनन्तप्रकाशाः, कडकडा-ध्वनि-धर्षित-प्रान्त-प्रजाः उड्डीयमान-दन्दह्यमान-परसहस्र-पटखण्ड-विहित-हैम-विहङ्गम-विभ्रमाः, ज्योतिरिङ्गणायित-परस्कोटि-स्फुलिङ्गरिङ्गित-पिङ्गीकृत-प्रान्ताः, दोधूयमान-धूम-घटा-पटल-परिपात्यमान-सित-सिती-कृतानोकहाः, सकलकलध्वनि-पलायमानैः पतत्रि-पटलैरिव सोसूच्यमानाः शिविरघस्मरा ज्वालमाला अवलोक्य, स-हाहाकारं तदभिमुखं प्रयाताः । परे च महाराष्ट्राऽसिभुजङ्गिनीभिर्दन्दश्यमाना, केचन 'त्रायस्व-त्रायस्व' इति साम्रेडं व्याहरमाणाः पलायमानाः, अन्ये धीरा वीराश्च—

तिष्ठत रे तिष्ठत धूर्त-धुरीणाः ! महाराष्ट्र-हतकाः ! किमिति चौरा इव लुण्ठका इव दस्यव इव च यवन-सेनापतीनाक्राम्यथ ? समागच्छत सम्मुखम्, यथा शाम्येदस्मच्चन्द्रहासानां चिरप्रवृद्धा महाराष्ट्र-रुधिराऽऽस्वाद-तृषा' ।

इति सक्ष्वेडं सङ्गर्ज्य, युद्धाय सज्जाः समतिष्ठन्त ।

तेषां चाऽश्वानां सव्यापसव्यमार्गैः खुरक्षुण्णा व्यदीर्यत वसुधा । खड्ग-खटखटाशब्दैः सह च प्रादुरभूवन् स्फुलिङ्गाः । रुधिरधाराभिः जपा-सुमनस्समाच्छन्नमिवाऽभूद् रणाङ्गणम् ।

सन्दर्भः—श्रीमदम्बिकादत्तव्यासः शिवराजविजयस्य द्वितीये निश्वासे यवन-युद्धं वर्णयति ।

व्याख्या—ततः = कलकलध्वनिसमाप्त्यनन्तरम्, यवनसेनासु = तुरुष्क-वाहिनीसु, शतशः = सङ्ख्यातीताः, सादिनः = अश्वारोहाः, गगनम् = आकाशम्, चोचुम्ब्यमानाः = पस्पृश्यमानाः, कृतदिगन्तप्रकाशाः = विहितदिगन्तप्रकाशाः, कडकडाध्वनिघर्षितप्रान्तप्रजाः = कडकडाशब्दत्रासितसमीपजनताः, उड्डीयमान-दन्दह्यमानपरस्सहस्रपटखण्डविहितहैमविहङ्गमविभ्रमाः = उत्पतज्ज्वलत्परःसहस्र-वसनांशकृतसौवर्णपक्षिविभ्रमाः, ज्योतिरिङ्गणायितपरस्कोटिस्फुलिङ्गरिङ्गित-पिङ्गीकृतप्रान्ताः = खद्योतायितासङ्ख्याग्निकणोड्डयनपिञ्जरीकृतपरिसरभूमि-भागाः, दोधूयमानधूमघटापटलपरिपात्यमानभसितसितीकृतानोकहाः = बहुकम्प्य-मानधूम्रलेखासंमूहविकीर्यमाणभस्मशुभ्रीकृतवृक्षाः, सकलकलध्वनिपलायमानैः = स-कलकलशब्दयुक्तपलायनरतैः, पतत्त्रिपटलैरिव = पक्षिगणैरिव, सोसूच्यमानाः = स-बोबुध्यमानाः, शिविरघस्मरा = पटगृहभक्षिका, ज्वालमाला = वह्निगणाः, अव-लोक्य, सहाहाकारम् = हाहाकारसंयुतम्, तदभिमुखम् = शिविराभिमुखम्, प्रयाताः = गताः, अपरे च = अन्ये च, महाराष्ट्रासिभुजङ्गिनीभिः = शिवसैनि-कासिसर्पिणीभिः, दन्दश्यमाना = खण्डयमाना, केचन = केचित्, त्रायस्व त्रायस्व = रक्ष रक्ष, इति साम्रेडम् = वारं वारम्, व्याहरमाणाः = वदन्तः, पलायमानाः = पलायनं कुर्वन्तः, अन्ये = इतरे, धीरा वीराश्च = धैर्यशालिनो भटाश्च, तिष्ठत ! रे तिष्ठत ! = स्थिरा भवत ! रे स्थिरा भवत ! धूर्तधुरीणाः = धूर्तधौरेयाः, महाराष्ट्रहतकाः = दुष्टमहाराष्ट्रीयाः, किमिति, चौराः = स्तेना इव, लुण्ठका इव दस्यवः = चौरा इव च, यवनसेनापतीनाक्राम्यथ = तुरुष्कबलाधिपतीन् आक्रान्तान् कुरुथ, समागच्छत = समापतत, सम्मुखम् = मुखसमक्षम, यथा = येन, शाम्येत् = शान्ति गच्छेत, अस्मच्चन्द्रहासानाम् = मत्खड्गानाम्, चिरप्रवृद्धा = बहुकाल-विवृद्धा, महाराष्ट्ररुधिरास्वादतृषा = शिवभटरक्तास्वादपिपासा, इति, सक्ष्वेडम् = ससिंहनादम्, सङ्गर्ज्य = गर्जनं कृत्वा, युद्धाय = समराय, सज्जाः = उद्यताः, समतिष्ठन्त = समजायन्त । तेषाम् = यवनानाम्, चाश्वानाम् = घोटकानाञ्च, सव्यापसव्यमार्गैः = दक्षिणवाममार्गैः, खुरक्षुण्णा = पादमर्दिता, व्यदीर्यत = विदारिताऽभवत्, वसुधा = पृथ्वी, खड्गखटखटाशब्दैः = चन्द्रहासखटखटा-ध्वनिभिः, सह = साकम्, च प्रादुरभवन् = समजायन्त, स्फुलिङ्गाः = वह्निकणाः, रुधिरधाराभिः = रक्तप्रवाहैः, जपासुमनस्समाच्छन्नमिव = जपापुष्पव्याप्तमिव, अभूत् = अभवत्, रणाङ्गणम् = युद्धस्थलम् ।

समासः—कडकडाध्वनिभिः घर्षिताः प्रान्तप्रजाः याभिस्ताः । उड्डीयमानैः दन्दह्यमानैः परःसहस्रैः पटखण्डैः विहितो हैमानां विहङ्गमानां विभ्रमो

याभिस्ताः। ज्योतिरिङ्गणायितानां परस्कोटीनां स्फुलिङ्गानां रिङ्गितैः पिङ्गीकृता प्रान्ता याभिस्ताः। दोधूयमानानां धूमघटानां पटलेन परिपात्यमानैः भसितैः सितीकृता अनोकहाः याभिस्ताः।

(५०) तदवलोक्य गौरसिंहो मृतस्याऽपजलखानस्य शोणितं-शोणं शोणशरीरं प्रलम्ब-वेणु-दण्डाग्रेषु बद्ध्वा समुत्तोल्य सर्वान् सन्दर्श्य सभेरीनादं घोषितवान् यद्-'दृश्यतां दृश्यतामितो हतोऽयं यवन-सेनापतिः, ततश्चाऽग्निसात् कृतानि ससकल-सामग्री-जातानि शिविराणि, परितश्च बहूनि विनाशितानि यवन-वीरकदम्बकानि, तत् किमिति अवशिष्टा यूयं मुधा बक-गृध्र-शृगालानां भोज्याः संवर्तध्वे ? शस्त्राणि त्यक्त्वा पलायध्वं पलायध्वम्, यथा नेयं भूः कदुष्णैर्भवतां सद्यश्छिन्न-कन्धरा-गलद्रुधिरप्रवाहैर्भवद्रमणीनां च कज्जल-मलिनैर्बाष्प-पूरैरार्द्रा भवेद्'-इति। तदवधार्य, दृष्ट्वा च रुधिर-दिग्धं क्रीडापुत्तलायितं स्वस्वामिशरीरम्, सर्वे ते हतोत्साहा विसृज्य शस्त्राणि, कान्दिशीका दिशो भेजुः।

प्रसङ्गः—द्वितीयनिश्वासान्ते श्रीमदम्बिकादत्तव्यासो गौरसिंहघोषणां श्रुत्वा यवनसेनापलायनं वर्णयत्यत्र।

व्याख्या—तदवलोक्य=यवनविनाशं दृष्ट्वा, गौरसिंहः=शिववीरसहायकः, मृतस्य=अपगतासोः, अपजलखानस्य=यवनसेनापतेः, शोणितशोणम्=रक्तरक्तम्, शोणशरीरम्=रक्तदेहम्, प्रलम्बवेणुदण्डाग्रेषु=सुदीर्घवंशदण्डाग्रेषु, बद्ध्वा=नियम्य, समुत्तोल्य=उत्थाप्य, सर्वान्=यवनसैनिकान्, सन्दर्श्य=दर्शयित्वा, सभेरीनादम्=सडिण्डिमनादम्, घोषितवान्=अघोषयत्, दृश्यतां दृश्यताम्=निरीक्ष्यतां निरीक्ष्यताम्, इतः=अत्र, हतोऽयम्=व्यापादितोऽयम्, यवनसेनापतिः=तुरुष्कगणनायकः, ततश्च=तदनन्तरं च, अग्निसात् कृतानि=दग्धानि, ससकलसामग्रीजातानि=निखिलवस्तुसहितानि, शिविराणि=पटगृहाणि; परितश्च=सर्वतश्च, बहूनि=अनेकानि, विनाशितानि=समुन्मूलितानि, यवनवीरकदम्बकानि=तुरुष्कभटसमूहानि, तत् किमिति, अवशिष्टाः=शेषाः, यूयम्=यवनाः, मुधा=व्यर्थम्, बकगृध्रशृगालानाम्=बकगृध्रगोमायुप्रभृतीनाम्, भोज्याः=खाद्याः, संवर्तध्वम्=भवथ। शस्त्राणि, त्यक्त्वा=परित्यज्य, पलायध्वं पलायध्वम्=पलायनं कुरुत, पलायनं कुरुत, यथा=येन, नेयम्=पुरो वर्तमाना, भूः=धरा, कदुष्णैः=ईषदुष्णैः, भवताम्=श्रीमताम्, सद्यः=झटिति, छिन्नकन्धरागलद्रुधिरप्रवाहैः=भिन्नकण्ठपतद्रक्तधाराभिः, भवद्रमणीनाम्=श्रीमल्ललनानाम्, कज्जलमलिनैः=अञ्जनश्यामैः, बाष्पपूरैः=अश्रु-

प्रवाहैः, आर्द्रा = क्लिन्ना, भवेत् । इति । तदवधार्य = ज्ञात्वा, तत् सर्वं, दृष्ट्वा च = विलोक्य च, रुधिरदिग्धम् = रक्तक्लिन्नम्. क्रीडापुत्तलायितम्=खेलनिर्मित पटादिमूर्तिवदाचरन्तम्, स्वस्वामिशरीरम् = निजप्रधानसेनापतिदेहम्, सर्वे ते = यवनाः, हतोत्साहाः = नष्टोत्साहाः, विसृज्य = त्यक्त्वा, शस्त्राणि, कान्दिशीकाः = भयभीताः, दिशो भेजुः = आशाः आश्रितवन्तः ।

समासः—शोणितेन शोणं शोणितशोणम् । प्रलम्बस्य वेणोः दण्डस्य अग्रेषु प्रलम्बवेणुदण्डाग्रेषु । सकलेन सामग्रीणां जातेन सहितानि ससकलसामग्रीजातानि । यवनवीराणां कदम्बकानि यवनवीरकदम्बकानि । वकाः गृध्राः शृगालाश्च, तेषां वकगृध्रशृगालानाम् । सद्यः छिन्नायाः कन्धरायाः गलन्तः ये रुधिरप्रवाहाः, तैः सद्यश्छिन्नकन्धरागलद्रुधिरप्रवाहैः । हताः उत्साहाः येषां ते हतोत्साहाः ।

कोषः—'कान्दिशीको भयद्रुतः' इत्यमरः ।

तृतीयो निश्वासः

(५१) तत्र पर्ण-कुटीरे तु कथं कथमपि दाडिमाद्यास्वादन-तत्परां कुसुम-गुच्छैर्मनो विनोदयन्तीं बालिकां गुरोः समीपे परित्यज्य तदाज्ञया तत्पितरौ समन्वेष्टुम्, अन्तर्गोपित-क्षुर-प्रच्छुरिकां यष्टिकामेकां हस्तेन धृत्वा, तैरेव श्याम-श्यामैः गुच्छ-गुच्छैः लोल-लोलैः कुञ्चित-कुञ्चितैः कचैः ब्रह्मचारि-बटु-वेष एव श्यामबटुरासन्नग्रामटिका-दिशि समगात् ।

ततो 'हन्त ! कथमद्यापि शूली त्रिशूलेन नैतान् शूलाकरोति ? कथं खड्गिनी खड्गेन न खण्डयति ? कथं चक्री चक्रेण न चूर्णयति ? कथं पाशी पाशैर्न पाशयति ? कथं हली हलेन नाऽवहेलयति ? कथं वा जम्भारातिर्दम्भोलिघातैर्दम्भिन एतानम्भोधि-जल-स्तम्भाऽऽरम्भेषु न पातयति ? अहह !! क इतोऽप्यधिकोऽनर्थो भविता यद् भगवानवतरिष्यति । शिव ! शिव !! न शक्यते द्रष्टुमपि यदेतैर्निर्दय-हृदयैः परमपूजनीयानां ब्राह्मणानामपि अत्यल्पवयस्का अपि बालिका अपह्रियन्ते । धिगेतान् धर्मादपि निर्भीकान् अभीकान्'— इति चिन्ता-सन्तान-वितानैकताने एव ब्रह्मचारि-गुरौ, सपद्येव न्यविशत श्यामबटुः सह देव-शर्म्मणा वर्षीयसा ब्राह्मणेन । स तु वाष्प-क्षालितोपनयनः शोकाधिक-कम्पित-गात्रयष्टिः प्रविश्यैव, दृष्ट्वैव तां बालिकां 'कुतः कुतः कोशले !' इत्युदीर्य तामङ्के जग्राह ।

साऽपि प्रक्षिप्य दाडिम-खण्डं निरस्य च कोरक-स्तबक-क्रीडनकम्, तं कराभ्यां कण्ठे गृहीत्वा मुक्तकण्ठं रुरोद ।

उत्तरम्—प्रसङ्गः—प्रथमनिश्वासप्रारब्धां बालिकाकथां समुपस्थापयति अग्रे श्रीमदम्बिकादत्तव्यासः तृतीये निश्वासेऽस्मिन् ।

व्याख्या—तत्र पर्णकुटीरे=तस्मिन् शुष्कपत्रनिर्मितगृहे, तु कथं कथमपि =येन केनापि प्रकारेण, दाडिमाद्यास्वादनतत्पराम्=मालूरफलादिभक्षणलीनाम्, कुसुमगुच्छैः=पुष्पस्तबकैः, मनो विनोदयन्तीम्=चित्तरञ्जनरताम्, बालिकाम् =कन्यकाम्, गुरोः=शिक्षकस्य समीपे, परित्यज्य=विसृज्य, तदाज्ञया= शिक्षकनिदेशेन, तत्पितरौ=बालिकाप्रसृजनयितारौ, समन्वेष्टुम्=गवेषयितुम्, अन्तर्गोपितक्षुरप्रच्छुरिकाम्=आभ्यन्तरस्थापितक्षुरप्रच्छुरिकाम्, यष्टिकाम्= लकुटिकामेकाम्, हस्तेन=करेण, धृत्वा=गृहीत्वा, तैरेव, श्यामश्यामैः=कृष्ण-वर्णैः, गुच्छगुच्छैः=अतिगुच्छैः, लोललोलैः=चपलैः, कुञ्चितकुञ्चितैः= ग्रन्थिलैः, कचैः=बालैः, ब्रह्मचारिबटुवेष एव=ब्रह्मचारिवेष एव, श्यामबटुः= कृष्णवर्णः ब्रह्मचारी, आसन्नग्रामटिकादिशि=समीपस्थलघुसंवसथदिशि, समगात् =गतवान् । ततो=गमनोत्तरम्, 'हन्त !=कष्टम् ! कथम्=किम्, अद्यापि =अधुनाऽपि, शूली=शिवः, त्रिशूलेन=अस्त्रविशेषेण, नैतान्=न यवनहत-कान्, शूलाकरोति=शूलेन पचति । कथं, खड्गिनी=दुर्गा, खड्गेन=चन्द्र-हासेन, न खण्डयति=विदारयति, कथं, चक्री=कृष्णः, चक्रेण=शस्त्रविशेषेण, न, चूर्णयति=विधूनयति, कथं, पाशी=वरुणः, पाशैः=बन्धनसाधनैः, न, पाशयति=बध्नाति । कथं, हली=बलः, हलेन=लाङ्गलेन, न अवहेलयति= तिरस्करोति, कथं वा, जम्भारातिः=इन्द्रः, दम्भोलिघातैः=वज्रपातैः, एतान् =यवनान्, अम्भोधिजलस्तम्भारम्भेषु=सागरजलस्तम्भोपक्रमेषु, न पातयति =न मज्जयति, अहह !!=कष्टम् !! कः, इतोऽप्यधिकोऽनर्थः=अस्मादप्यधि-कोपद्रवो भविता, यद् भगवान्=जनिता यद् विष्णुः, अवतरिष्यति=भूमौ समागमिष्यति, शिव ! शिव !!=शङ्कर ! शङ्कर !! न शक्यते=न वारयते, द्रष्टुमपि=आलोकितुमपि, यदेतैः=यवनैः, निर्दयहृदयैः=दयादरिद्रैः, परम-पूजनीयानाम्=समाराध्यानाम्, ब्राह्मणानामपि=द्विजानामपि, अत्यल्पवयस्काः अतिन्यूनवया अपि, बालिकाः=कन्यकाः, अपह्रियन्ते=चोर्यन्ते, धिगेतान्= यवनान् धिक्, धर्मादपि, निर्भीकान्=भयरहितान्, अभीकान्=कामुकान्', इति, चिन्तासन्तानवितानैकताने=चिन्तासमूहविस्तारस्थिरचित्ते, एव, ब्रह्म-

चारिगुरौ = श्यामबटुशिक्षके, सपद्येव = झटित्येव, न्यविशत् = प्राविशत्, श्यामबटुः, सह = साकम्, देवशर्मणा = एतन्नामकेन, वर्षीयसा = वृद्धेन, ब्राह्मणेन = द्विजेन। स तु = ब्राह्मणस्तु, बाष्पक्षालितोपनयनः = अश्रुधौतोपनेत्रः, शोकाधिककम्पितगात्रयष्टिः = करुणाधिकवेपमानदेहयष्टिः, प्रविश्यैव = प्रवेशं कृत्वैव, दृष्ट्वैव = विलोक्य एव, ताम् = बटुगोपिताम्, बालिकाम् = कन्यकाम्, कुतः कुतः, कोशले ! = भो कोशलाभिधाने ! कुतः सम्प्राप्तासि, इत्युदीर्य = कथयित्वा, ताम् = बालिकाम्, अङ्के = क्रोडे, जग्राह = अगृह्णात्।

समासः—पर्णस्य कुटीरे। दाडिमाद्यानाम् आस्वादने तत्पराम्। कुसुमानां गुच्छैः। अन्तर्गोपिते क्षुरप्रच्छुरिके यस्यां, ताम्। आसन्नायाः ग्रामटिकायाः दिशि। अम्भोधेः जलस्तम्भानाम् आरम्भेषु। चिन्तायाः सन्तानस्य विताने य एकतानस्तस्मिन् चिन्तासन्तानवितानैकताने। बाष्पेण क्षालित उपनयनो यस्य सः बाष्पक्षालितोपनयनः। शोकेन अधिकं कम्पिता गात्रयष्टिः यस्य सः शोकाधिककम्पितगात्रयष्टिः।

कोषः—'प्रचेता वरुणः पाशी', 'दम्भोलिरशनिर्द्वयोः', 'कम्रः कामयिताऽभीकः' इति सर्वत्राप्यमरः।

(५२) वृद्धोऽपि च एकं करं तत्पृष्ठे विन्यस्य अन्येन च तस्याः शिरः परिमृशन् 'कोशले ! कानि पातकानि पूर्वजन्मनि कृतवत्यसि ? यद् बाल्य एव त्वत्पिता सङ्ग्रामे म्लेच्छ-हतकैर्धर्मराजनगराध्वन्यध्वन्यः कृतः। माता च तव ततोऽपि पूर्वमेव कथावशेषा संवृत्ता, यमलौ भ्रातरौ च तव द्वादशवर्षदेश्यावेव आखेटव्यसनिनौ महार्ह-भूषण-भूषितौ तुरगावारुह्य वनं गतौ दस्युभिरपहृताविति न श्रूयते तयोर्वार्ताऽपि, त्वं तु मम यजमानस्य पुत्रीति स्वपुत्रीव मयैव सह नीता, वर्द्धसे च। अहह !! कथं वारं वारं बालैव सुन्दरकन्या-विक्रय-व्यसनिभिर्यवनवराकैरपह्रियसे ? भगवदनुग्रहेण च कथं कथमपि मत्कर-मुक्ता पुनः प्राप्यसे। परमात्मन् ! त्वमेव रक्षैनामनाथां दीनां क्षत्रियकुमारीम्'—इति सकरुणं विललाप।

प्रसङ्गः—श्रीमदम्बिकादत्तव्यासविरचितस्य शिवराजविजयस्य तृतीये निश्वासे ब्राह्मणवृद्धस्योक्तिरियम्।

व्याख्या—वृद्धोऽपि = देवशर्मा अपि, एकं, करम् = हस्तम्, तत्पृष्ठे = बालिकापृष्ठभागे, विन्यस्य = संस्थाप्य, अन्येन = अपरेण, च, तस्याः = कन्यायाः, शिरः = मस्तकम्, परिमृशन् = स्पृशन्, कोशले ! = एतन्नामिके ! कानि, पात-

कानि = पापाचाराणि, पूर्वजन्मनि = प्राक्तनजन्मनि, कृतवत्यसि = विहितवत्यसि ? यद्, बाल्ये = बाल्यावस्थायामेव, त्वत्पिता = तव जनकः, सङ्ग्रामे = युद्धे, म्लेच्छहतकैः = दुष्टम्लेच्छैः, धर्मराजनगराध्वनि=यमपुरमार्गे, अध्वन्यः = पान्थः, कृतः = विहितः, माता = जननी च, तव = ते, ततोऽपि=पितृमरणादपि, पूर्वम् = प्रथममेव, कथावशेषा = स्मृतिविषया, संवृत्ता = अभूत्, यमलौ = यमौ, भ्रातरौ = बान्धवौ, च, तव = कन्यायाः, द्वादशवर्षदेशीयावेव = आदित्यसङ्ख्यवर्षकल्पावेव, आखेटव्यसनिनौ=मृगयाव्यसनिनौ, महार्हभूषणभूषितौ = बहुमूल्यालङ्करणालङ्कृतौ, तुरगावारुह्य=घोटकावारुह्य, वनम् = विपिनं गतौ, दस्युभिः = चौरैः, अपहृताविति = चोरिताविति, न = नहि, श्रूयते = आकर्ण्यते, तयोः= भ्रात्रोः, वार्ता = समाचारः अपि, त्वम् = भवती, तु, मम = देवशर्मणः, यजमानस्य = ऋत्विजः, पुत्रीति = कन्यकेति, स्वपुत्रीव = निजसुतेव, मयैव = देवशर्मणैव, सह = साकम्, नीता = आनीता, वर्द्ध्यसे=पाल्यसे च, अहह !! = दारुणम्, कथं, वारं वारम् = पुनः पुनः, बालेव = बालिकैव, सुन्दरकन्याविक्रयव्यसनिभिः = शुभमसुताविक्रयव्यसनिभिः, यवनवराकैः = नीचयवनैः, अपह्रियसे = चोर्यसे । भगवदनुग्रहेण = ईश्वरानुकम्पया, च कथं कथमपि = येन केनाऽपि प्रकारेण, मत्करमुक्ता = देवशर्महस्तत्यक्ता, पुनः = भूयः, प्राप्यसे = अवाप्यसे, परमात्मन् ! = भगवन् ! त्वमेव = भवानेव, रक्ष=अव, एनाम्=मत्सम्मुखीनाम्, अनाथाम् = मातृपितृविहीनाम्, दीनाम् = दुःखकातराम्, क्षत्रियकुमारीम् = बाहुजकन्याम्, इति सकरुणम् = कारुण्यपेशलम्, विललाप = व्यलपत् ।

समासः—धर्मराजस्य नगरस्य अध्वनि धर्मराजनगराध्वनि । कथा एव अवशेषा यस्याः सा कथावशेषा । आखेटस्य व्यसनिनौ आखेटव्यसनिनौ । महार्हैः भूषणैः भूषितः महार्हभूषणभूषितः । सुन्दराणां कन्यानां विक्रयस्य व्यसनिभिः सुन्दरकन्याविक्रयव्यसनिभिः । मम करात् मुक्ता मत्करमुक्ता ।

(५३) तावत् कुटीराद् बहिः कस्मिंश्चित् कार्ये व्यासक्तो गौरवटुर्विलापेनैतेन कर्णयोराकृष्यमाण इव त्वरितमन्तः प्रविवेश । पौनःपुन्येन दृष्ट्वा च तां कन्यां देवशर्माणं वृद्धं ब्राह्मणं च, परिपक्वतालीदलीभूत-कपोल-पालीकः, उदश्चितरोममाली, त्वरित-कोष्ण-श्वास-प्रश्वासशाली, शारदशर्वरी-शर्वरी-सार्वभौमकिरण-किरणोद्भूतोद्भूत-कीला-लाली-व्यालीढ-चन्द्रकान्त-जालीभूत-लोचनः, बाष्पावरुद्धकण्ठः कमपि वृत्तान्तं स्मारित इव, कमपि चिरविनष्टं प्रेयांसं प्रापित इव, किमपि चिरानुभूतं दुःखं पुनरनुभावित इव च स्मारं स्मारमिव किमपि

स्वसमानवशं श्यामबटुं सम्बोध्य कातरेण भज्यमानेन कम्पमानेन च स्वरेणाऽचकथत् ।

सन्दर्भः—श्रीमदम्बिकादत्तव्यासविरचितस्य शिवराजविजयस्य तृतीयनिश्वासाद् गृहीतोऽयमंशः । देवशर्माणं कन्यां च दृष्ट्वा गौरसिंहं मनोदशां वर्णयति कविरत्र ।

व्याख्या—तावत् = समयान्तरालेऽस्मिन्, कुटीरात् = पर्णशालातः, वहिः = वाह्यम्, कस्मिश्चित् कार्ये = व्यापारे, व्यासक्तः = लीनः, गौरबटुः, विलापेन = रोदनेन, एतेन = अनेन, कर्णयोः = श्रोत्रयोः, आकृष्यमाण इव = कृताकर्षण इव, त्वरितम् = शीघ्रम्, अन्तः = आभ्यन्तरम्; प्रविवेश = प्रविष्टो वभूव, पौनःपुन्येन = वारं वारम्, दृष्ट्वा = विलोक्य च, ताम् = सम्मुखीनाम्, कन्याम् = वालिकाम्, देवशर्माणम् = एतन्नामकम्, वृद्धम् = वर्षीयसंम्, ब्राह्मणम्=द्विजञ्च, परिपक्वतालीदलीभूतकपोलपालीकः=पूर्णपक्वतालीदलीभूतगण्डप्रान्तः, उदञ्चितरोममाली = प्रोद्गतलोमावली, त्वरितकोष्णश्वासप्रश्वासशाली = शीघ्रकदुष्णश्वासोच्छ्वासयुक्तः, शारदशर्वरीशर्वरीसार्वभौमकिरणकिरणोद्भूतोद्भूतकीलालालीव्यालीढचन्द्रकान्तजालीभूतलोचनः = शरत्कालिकनिशाशशिरश्मिक्षेपात्यन्तनिर्यातपानीयपङ्क्तिग्रस्तचन्द्रकान्तजालीभूतनयनः, बाष्पावरुद्धकण्ठः = अश्रुनिरुद्धगलविलः, कमपि = पूर्वानुभूतम्, वृत्तान्तम् = समाचारम्, स्मारित इव = कृतस्मरण इव, कमपि = अनिर्वचनीयम्, चिरविनष्टम् = बहुदिननष्टम्, प्रेयांसम् = प्रेमास्पदम्, प्रापित इव = लम्भित इव, किमपि = पूर्वस्थम्, चिरानुभूतम् = बहुकालानुभवजन्यम्, दुःखम् = कष्टम्, पुनरनुभावित इव=अनुभवविषयं प्रापित इव च, स्मारं स्मारमिव = स्मृत्वा स्मृत्वा इव, किमपि, स्वसमानदशम् = निजसमावस्थम्, श्यामबटुम् = स्वसहचरम्, सम्बोध्य = अभिमुखीकृत्य, कातरेण = दुःखबहुलेन, भज्यमानेन = त्रुट्यमानेन, कम्पमानेन = वेपमानेन च, स्वरेण = शब्देन, अचकथत् = अवदत् ।

समासः—परिपक्वं यत्तालीदलं तत् समतामापन्ना ('अभूततद्भावे च्विः') तालीदलीभूता कपोलपाली यस्य सः परिपक्वतालीदलीभूतकपोलपालीकः । उदञ्चिता रोममाला यस्य सः उदञ्चितरोममाली । शरदि भवा शारदी, सा चासौ शर्वरी च, तस्याः शर्वरी सार्वभौमस्य किरणानां किरणेन उद्भूतोद्भूतं यत् कीलालम्, तस्य आली, तया व्यालीढः यः चन्द्रकान्तः, तस्य जालीभूते लोचने यस्य सः शारदशर्वरीशर्वरीसार्वभौमकिरणकिरणोद्भूतोद्भूतकीलालाली-

व्यालीढचन्द्रकान्तजालीभूतलोचनः । बाष्पैः अवरुद्धः कण्ठः यस्य सः बाष्पाव-रुद्धकण्ठः ।

(५४) अथ कथमपि रिङ्गत्तुङ्ग-तिमिङ्गिल-गिल-परिवर्त-प्रसङ्ग-सङ्ग-सभङ्ग-तरङ्ग-रङ्गप्राङ्गण-सोदरीभूतं हृदयं वशीकृत्य, अनुजां सुवर्णवर्णां सौवर्णी-नाम्ना बाल्य एव प्रसिद्धां कोशलामङ्के संस्थाप्य, समुपविष्टे गौरे; श्यामेऽपि च तस्या एव समीपे समुपविश्य तस्या एव पृष्ठं परिमृजति; पूज्यपादे पुरोहिते च क्रियासमभिहारेणोद्गच्छतो बाष्पान् पटान्तेन परिहरति; कुटीराध्यक्षः कुतुक-परवशः सम्बोध्य गौरश्यामौ समुवाच—

'वत्सौ गौर-श्यामौ ! जानेऽहं वां क्षत्रियोचिताचारेषु चातन्द्रितौ सनातन-धर्म-विप्लवासहनौ नीतिकुशलौ परोपकार-व्यसनिनौ दुर्बलात्कार-परायण-तुच्छ-यवन-च्छेदेच्छोच्छल-च्छटाच्छन्नौ, बालावप्यबालपराक्रमौ, सकल-कला-कलाप-कोविदौ गुणि-गण-गणनीयौ च, किन्तु नाऽद्यावधि कदाऽपि भवतोर्जन्मस्थानादि-प्रश्न-प्रसङ्गोऽभूत्, आकर्ण्य च भवतोर्दुःखमयमपि विलापमयमपि चाऽऽलापं महत् कुतूहलमस्माकं वर्वर्ति । तत् समाश्वस्य धैर्यमाधाय सङ्क्षेपेण कथ्यतां का भवतो-र्जन्मभूः ? कथमत्रागतौ ? किमेषा सहोदरा स्वसा ? सत्यमेव किं भुवं विरहय्य लोकान्तरं सनाथितवन्तौ युष्मत्पितरौ ? क्व यौष्माकीण-पैतृपितामहिक-सम्पत्तिः ? किं भवतोरुद्देश्यम् ?' इत्यादि ।

प्रसङ्गः—श्रीमदम्बिकादत्तव्यासविरचितस्य शिवराजविजयस्य तृतीय-निश्वासाद् गृहीतोऽयमंशः । प्रथमभागे कविः गुरोर्मनोभावं व्यनक्ति द्वितीये च तस्योद्गारम् ।

व्याख्या—अथ = करुणप्रवाहप्रसारानन्तरम्, कथमपि = केनापि प्रकारेण, रिङ्गत्तुङ्गतिमिङ्गिलगिलपरिवर्तप्रसङ्गसङ्गसभङ्गतरङ्गरङ्गप्राङ्गणसोदरीभूतम् = चलन्महन्मत्स्यविशेषपार्श्वपरिवर्तावसरसंसर्गसमुच्छलितवीचिनर्तनचत्वरसदृशम्, हृदयम् = मानसम्, वशीकृत्य = स्वाधीनतामानीय, अनुजाम् = भगिनीम्, सुवर्ण-वर्णाम् = कनकाभाम्, सौवर्णीनाम्ना = एतदभिधानेन, बाल्ये एव, प्रसिद्धाम् = ख्याताम्, कौशलाम् = कौशलानामिकाम्, अङ्के = क्रोडे, संस्थाप्य, समुपविष्टे = स्थिते, गौरे = गौरबटौ, श्यामे = श्यामबटौ, अपि च, तस्याः = बालिकायाः, एव, समीपे = निकटे, समुपविश्य = स्थित्वा, तस्याः = बालिकायाः एव, पृष्ठम् = पृष्ठभागम्, परिमृजति = परामृशति, पूज्यपादे = समाराध्यचरणे, पुरोहिते च,

क्रियासमभिहारेण = पौनःपुन्येन च, उद्गच्छतः = निःसरतः, बाष्पान् = अश्रुकणान्, परान्तेन = वस्त्रान्तभागेन, परिहरति = परिमृजति, कुटीराध्यक्षः = गुरुः, कुतुकपरवशः = सकौतुकः, सम्बोध्य, गौरश्यामौ = एतन्नामानौ शिष्यौ, समुवाच = अकथयत्—

वत्सौ ! = पुत्रौ ! गौरश्यामौ !=एतन्नामानौ, जाने=जानामि, अहं, वाम्=युष्माकम्, क्षत्रियोचिताचारेषु = बाहुजोचितव्यवहारेषु, चातन्द्रितौ=निरालस्यौ, सनातनधर्मविप्लवासहनौ = आर्यधर्मोपद्रवासहनौ, नीतिकुशलौ = नयपारङ्गतौ, परोपकारव्यसनिनौ = परहितव्यसनिनौ, दुर्बलात्कारपरायणतुच्छयवनच्छेदेच्छोच्छलच्छटाच्छन्नौ = दुष्टसाहसनिरतनीचयवनखण्डनाभिलाषोद्गच्छत्हार्दावस्थाविशेषव्याप्तौ, बालौ = बाल्यावस्थासम्पन्नौ, अपि, अबालपराक्रमौ = महाबलौ, सकलकलाकलापकोविदौ = सम्पूर्णकलासमूहपण्डितौ, गुणिगणगणनीयौ = कलावित्समुदायगण्यौ, च, किन्तु = परन्तु, नाद्यावधि = एतावद्दिनपर्यन्तं न, कदापि, भवतोः=श्रीमतोः, जन्मस्थानादिप्रश्नप्रसङ्गोऽभूत् = जनिप्रदेशादिजिज्ञासाप्रसङ्गोऽभवत्, आकर्ण्य = श्रुत्वा च, भवतोः = युवयोः, दुःखमयमपि = पीडाबहुलमपि, विलापमयमपि = प्रलापपेशलमपि, चाऽऽलापम् = संल्लापम्, महत् = भूयः, कुतूहलम् = कौतुकम्, अस्माकम् = मम, वर्वर्ति = वरीवर्ति । तत् समाश्वस्य = आश्वस्य, धैर्यम् = धीरताम्, आधाय = धृत्वा, सङ्क्षेपेण=समासेन, कथ्यताम् = उच्यताम्, का = किन्नामा, भवतोः =श्रीमतोः, जन्मभूः = उत्पत्तिस्थानम्, कथम् = केन प्रकारेण, अत्रागतौ = मत्समीपमायातौ, किमेषा = किमियम्, सहोदरा = समानोदरा, स्वसा = भगिनी ? सत्यमेव = वस्तुत एव, किं भुवम् = धराम्, विरहय्य = त्यक्त्वा, लोकान्तरम् = मृत्युलोकभिन्नं स्वर्गलोकमिति, सनाथितवन्तौ = गतवन्तौ, युष्मत्पितरौ = त्वदीयौ जननीजनकौ ? क्व = कुत्र, यौष्माकीणपैतृपितामहिकसम्पत्तिः = भवद्वंशानुगतधनम्, किम्, भवतोः = श्रीमतोः, उद्देश्यम् = लक्ष्यम् ? इत्यादि ।

समासः—रिङ्गन् यः तुङ्गः तिमिङ्गिलगिलः, तस्य परिवर्तः, तस्य प्रसङ्गस्य सङ्गेन सभङ्गानां तरङ्गाणां रङ्गप्राङ्गणस्य सोदरीभूतं रिङ्गत्तुङ्गतिमिङ्गिलगिलपरिवर्तप्रसङ्गसङ्गसभङ्गतरङ्गरङ्गप्राङ्गणसोदरीभूतम् । कुटीरस्य अध्यक्षः । कुतुकेन परवशः । क्षत्रियाणाम् उचितेषु आचारेषु । सनातनधर्मस्य विप्लवासहनौ सनातनधर्मविप्लवासहनौ । दुर्बलात्कारे परायणानां तुच्छानां यवनानां छेदस्य इच्छया उच्छलन्त्या छटया आच्छन्नौ दुर्बलात्कारपरायणतुच्छयवन-

च्छेदेच्छोच्छलच्छटाच्छन्नौ। सकलस्य कलाकलापस्य कोविदौ सकलकलाकलाप-कोविदौ। गुणिनां गणे गणनीयौ गुणिगणगणनीयौ। जन्मस्थानादेः प्रश्नानां प्रसङ्गः जन्मस्थानादिप्रश्नप्रसङ्गः। यौष्माकीणां पैतृपितामहिकी सम्पत्तिः यौष्माकीणपैतृपितामहिकसम्पत्तिः।

(५५) 'अस्ति कश्चन धैर्य-धारि-धुरन्धरैः, धर्मोद्धार-धौरेयैः, सोत्साह-साहस-चश्चचन्द्रहासैः, सुशक्ति-सुशक्तिभिः, सद्यश्छिन्न-परिपन्थि-गलगलच्छोणित-च्छुरित-च्छन्न-च्छुरिकैः, भयोद्भेदनभिन्दिपालैः, स्वप्रतिकूल-कुलोन्मूलनानुकूल-व्यापार-व्यासक्त-शूलैः, घन-विघ्नविघट्टक-घर्घराघोष-घोर-शतघ्नीकैः, प्रत्यर्थि-शुण्ड-शुण्डा-खण्डनोद्दण्ड-भुशुण्डीकैः प्रचण्ड-दोर्दण्ड-वैदग्ध्य-भाण्ड-काण्ड-प्रकाण्डैः, क्षत्रियवर्यैरार्यवर्यैरर्यवर्यैश्च व्याप्तो राजपुत्रदेशः।

प्रसङ्गः—श्रीमदम्बिकादत्तव्यासविरचितस्य शिवराजविजयस्य तृतीय-निश्वासाद् गृहीतोऽयमंशः। गौरसिंहस्योक्तिरियम्।

व्याख्या—अस्ति = वर्तते, कश्चन, धैर्यधारिधुरन्धरैः = विशालधीरता-शालिभिः, धर्मोद्धारधौरेयैः = धर्मोद्धाराग्रेसरैः, सोत्साहसाहसचश्चचन्द्रहासैः = साध्यवसायसाहसचलदसिभिः, सुशक्तिसुशक्तिभिः = शुभकृपाणशोभनसामर्थ्यैः, सद्यश्छिन्नपरिपन्थिगलगलच्छोणितच्छुरितच्छन्नच्छुरिकैः = तत्कालकृतशत्रुकण्ठ-स्रवद्रुधिरबिन्दुलिप्तासिधेनुकैः, भयोद्भेदनभिन्दिपालैः = भीघस्मरनालिकास्त्रैः, स्वप्रतिकूलकुलोन्मूलनानुकूलव्यापारव्यासक्तशूलैः = निजशत्रुवंशविध्वंसनोचित-कर्तव्यलीनकुन्तैः, घनविघ्नविघट्टकघर्घराघोषघोरशतघ्नीकैः = विपुलप्रत्यूहवि-मर्दकघर्घराघोषभयावहशतमारिकैः, प्रत्यर्थिशुण्डिशुण्डाखण्डनोद्दण्डभुशुण्डीकैः = शत्रुकरिकरखण्डनोद्दण्डभुशुण्डीकैः, प्रचण्डदोर्दण्डवैदग्ध्यभाण्डकाण्डप्रकाण्डैः = प्रबलबाहुदण्डपाण्डित्यसदनप्रशस्तबाणैः, क्षत्रियवर्यैः = बाहुजश्रेष्ठैः, आर्यवर्यैः = ब्राह्मणश्रेष्ठैः, अर्यवर्यैः = वैश्यश्रेष्ठैः, व्याप्तः = भूषितः, राजपुत्रदेशः।

समासः—धैर्यस्य धारिणां धुरन्धरैः। धर्मस्य उद्धारे धौरेयैः। सोत्साहेन साहसेन चश्चन्तः चन्द्रहासाः येषां, तैः सोत्साहसाहसचश्चचन्द्रहासैः। सद्यः छिन्नेभ्यः परिपन्थिनां गलेभ्यः गलतां शोणितानां छुरितैः छन्नाः छुरिकाः येषां, तैः सद्यश्छिन्नपरिपन्थिगलगलच्छोणितच्छुरितच्छन्नच्छुरिकैः। भयोद्भेदना भिन्दिपाला येषां ते भयोद्भेदनभिन्दिपालैः। स्वप्रतिकूलानां कुलानाम् उन्मू-लनानुकूलव्यापारेषु व्यासक्तानि शूलानि येषां, तैः स्वप्रतिकूलकुलोन्मूलनानुकूल-व्यापारव्यासक्तशूलैः। घनानां विघ्नानां विघट्टकाः घर्घराघोषेण घोराः शतघ्नयः

येषां ते घनविघ्नविघट्टकघर्घराघोपघोरशतघ्नीकैः। प्रत्यर्थिशुण्डिनां शुण्डानां खण्डने उद्दण्डाः भुशुण्डीकाः येषां, तैः प्रत्यर्थिशुण्डिशुण्डाखण्डनोद्दण्डभुशुण्डीकैः। प्रचण्डानां दोर्दण्डानां वैदग्ध्यस्य भाण्डानि प्रचण्डदोर्दण्डवैदग्ध्यभाण्डानि, तानि काण्डप्रकाण्डानि येषां, तैः प्रचण्डदोर्द्दण्डवैदग्ध्यभाण्डकाण्डप्रकाण्डैः।

(५६) यत्र कोष-पूरिताः काञ्चनमया इव सानुमन्तः, महार्हं-मणिगण-जटिल-जाम्बूनद-भूषणभूषिता गन्धर्वा इव जनाः, विचित्र-गवाक्ष-जालाऽट्टालिकाऽङ्गण-कपोतपालिका-चत्वर-गोष्ठ-भित्तिकाः विश्वकर्मरचिता इव गृहाः, सादि-करस्थ-कशाग्र-चालन-सङ्केत-सञ्चलितसप्ति-समूह-शफ-सम्मर्द्द-समुद्धूत-धूलि-धूसरिताश्च मार्गाः। अस्ति तस्मिन्नेव राजपुत्रदेशे उदयपुरनाम्नी काचनराजधानी, यत्रत्याः क्षत्रियकुलतिलका यवनराज-वशंवदता-कर्द्दम-सम्मर्देन कदाऽप्याऽऽत्मानं कलङ्कयामासुः' इति कथयत्येव गौरसिंहे, ब्रह्मचारिगुरुरपि कोष्णं निःश्वस्य—

'को न जानीते उदयपुर-राज्यम्? यदीय-चित्रपूर-दुर्गे परस्सहस्राः क्षत्रिय-कुलाङ्गनाः, कमला इव विमलाः, शारदा इव विशारदाः, अनसूया इवाऽनसूयाः, यशोदा इव यशोदाः, सत्या इव सत्याः, रुक्मिण्य इव रुक्मिण्यः सुवर्णा इव च सुवर्णाः, सत्य इव सत्यः, सम्भाव्यमान-यवन-बलात्कार-धिक्कारोर्जस्वल-तेजस्काः, योगाग्निने पतिविरहाग्निनेव स्वक्रोधाग्निनेव च सन्दीपितासु ज्वालाजालाञ्चितासु चितासु, स्मारं स्मारं स्वपतीन्, पश्यतामेव स्वकीयानां परकीयाणां च क्षणात् पतङ्गतामङ्गीकृत्य, गङ्गाधरस्याऽङ्गभूषणतामगमन्'—इति मन्दं व्याजहार।

उत्तरम्—सन्दर्भः—श्रीमदम्बिकादत्तव्यासविरचितशिवराजविजयस्य तृतीय-निश्वासाद् गृहीतोऽयमंशः। गौरसिंहोऽत्र राजपुत्रदेशं वर्णयति, गुरुश्च उदयपुरम्।

व्याख्या—यत्र = राजपुत्रदेशे, कोषपूरिताः=निधानपूर्णाः, काञ्चनमया इव, =सुवर्णमया इव, सानुमन्तः = शिखरिणः, महार्हंमणिगणजटिलजाम्बूनदभूषण-भूषिताः = बहुमूल्यहीरकादिसमूहमिलितसुवर्णालङ्करणशोभिताः, गन्धर्वाः = देव-योनिविशेषाः, इव = यथा, जनाः=नराः, विचित्रगवाक्षजालांट्टालिकाङ्गणकपोत-पालिकाचत्वरगोष्ठभित्तिकाः = विविधवातायनजालाट्टालिकाजिरविटङ्कचत्वरगो-शालाकुड्याः, विश्वकर्मरचिता इव = देवशिल्पिनिर्मिता इव, गृहाः=गेहाः, सादि-करस्थकशाग्रचालनसङ्केतसञ्चालितसप्तिसमूहशफसम्मर्द्दसमुद्धूतधूलिधूसरिताश्च =अश्ववाहहस्तस्थितदशाग्रधावनप्रेरणगच्छद्वाजिनिवहखुरकुट्टनोच्छलितरजोव्या-

राश्च, मार्गाः = पन्थानः । अस्ति = वर्तते, तस्मिन्नेव = तत्रैव, राजपुत्रदेशे = राजपूतानानामके प्रदेशे, उदयपुरनाम्नी = उदयपुरनामिका, काचन, राजधानी = नृपसद्म, यत्रत्याः क्षत्रियकुलतिलकाः = बाहुजान्वयभूषणाः, यवनराजवशंवदताकर्दमसम्मर्दैः = तुरुष्कराजवशंवदतापङ्कलेपैः, न = नहि, कदाप्यात्मानम् = स्वम्, कलङ्कयामासुः = दूषितं चक्रुः, इति कथयत्येव = वदत्येव, गौरसिंहे, ब्रह्मचारिगुरुरपि = वटुशिक्षकोऽपि, कोष्णम् = कदुष्णम्, निःश्वस्य—जगादेति अग्रिमेण सम्बन्धः, को न, जानीते = जानाति, उदयपूरराज्यम् = एतन्नामकराज्यम् । यदीयचित्रपुरदुर्गे = यदीयचित्तौडनामकदुर्गे, परस्सहस्राः = सहस्रतोऽधिकाः, क्षत्रियकुलाङ्गनाः = बाहुजान्वयललनाः, कमला इव = श्रिय इव, विमला = विशुद्धाः, शारदा = सरस्वती इव, विशारदाः = पण्डिताः, अनसूया = अत्रिपत्नी इव, अनसूया = असूयारहिताः, यशोदा = कृष्णमातेव, यशोदा = कीर्तिदा, सत्या = सत्यभामा इव, सत्याः = सत्यभाषिण्यः, रुक्मिण्य इव = कृष्णपत्नी इव, रुक्मिण्यः = सुवर्णवत्यः, सुवर्णा = कनकपदार्था इव च, सुवर्णाः = शोभनवर्णवत्यः, सत्यः = पार्वत्यः इव, सत्यः = पतिव्रताः, सम्भाव्यमानयवनबलात्कारप्रकारोर्जस्वलतेजस्काः = अनुमीयमानतुरुष्कबलात्कारतिरस्कारोर्जस्वलतेजस्काः, योगाग्निनेव = योगसामर्थ्योत्पन्नाग्निनेव, पतिविरहाग्निनेव = स्वस्वामिवियोगाग्निनेव, स्वक्रोधाग्निनेव = निजकोपाग्निनेन च, सन्दीपितासु = प्रज्वालितासु, ज्वालाजालाश्लिष्टासु = कीलनसमूहसमवेतासु, चितासु, स्मारं स्मारम् = स्मृत्वा स्मृत्वा, स्वपतीन् = निजस्वामिनः, पश्यतामेव = अवलोकयतामेव, स्वकीयानाम् = आत्मीयानाम्, परकीयाणाम् = अन्यदीयानाञ्च, क्षणात् = पलात्, पतङ्गताम्-अङ्गीकृत्य = शलभतां स्वीकृत्य, गङ्गाधरस्य = शिवस्य, अङ्गभूषणताम् = भूतिताम्, अगमन् = जग्मुः, इति मन्दम् = मधुरम्, व्याजहार = अकथयत् ।

समासः—कोपेण पूरिताः कोपपूरिताः । महार्हाणां मणीनां गणेन जटिलैः जाम्बूनदभूषणैः भूषिताः महार्हमणिगणजटिलजाम्बूनदभूषणभूषिता । विचित्राः गवाक्षाणां जालाः, अट्टालिकाः अङ्गणं कपोतपालिका चत्वरं गोष्ठं भित्तिकाश्च येषु ते विचित्रगवाक्षाट्टालिकाङ्गणकपोतपालिकाचत्वरगोष्ठभित्तिकाः । सादिकरस्थानां कशानामग्रस्य चालनसङ्केतेन सञ्चालितस्य सप्तिसमूहस्य शफसम्मर्दैः समुद्धूताभिः धूलिभिः धूसरिताः सादिकरस्थकशाग्रचालनसङ्केतसञ्चलितसप्तिसमूहशफसम्मर्दसमुद्धूतधूलिधूसरिताः । क्षत्रियकुलानां तिलकाः क्षत्रियकुलतिलकाः । यवनराजस्य वशंवदता एव कर्दमः, तत्सम्मर्दैः यवनराजवशंवदता-

कर्दमसम्मर्दः । सम्भाव्यमानस्य यवनबलात्कारस्य धिक्कारे ऊर्जस्वलं तेजो यासां ताः सम्भाव्यमानयवनबलात्कारधिक्कारोर्जस्वलतेजस्काः । ज्वालानां जालैरन्वितासु ज्वालाजालान्वितासु ।

(५७) 'अस्मज्जननी तु बालावेवाऽऽवां स्तनन्धयामेव चास्म सहोदरीं सौवर्णीं परित्यज्य, भुवं विरहयाम्बभूव । अस्मत्तातचरणश्च कैश्चित् तुरुष्कैर्लुण्ठकप्रायैर्युद्ध-क्रीडां कुर्वन् पृष्ठतः केनाऽपि विशालभल्लेनाऽऽहतो वीरगतिमगमत् । ततः पुरोहितेनैव पाल्यमानावावामपि यमलौ भ्रातरौ गौर-श्यामौ एकदा मित्रैः सहाऽऽखेटार्थं निःसृतौ तुरगौ चालयन्तौ मार्ग-भ्रष्टौ अकस्मात् काम्बोजीय-दस्यु-वारेणा-ऽवृतौ तेनैवाऽपहृत-महार्ह-भूषणौ गृहीताश्वौ बद्धौ च सहैव वनाद् वनमनायिष्वहि । 'यद्यपि शत्रुसन्ताना निर्दयं हन्तव्या एव; तथाऽपि नासा-भूषण-मौक्तिके इव वीणा तुम्बाविव श्यामकर्ण-हयाविव च मनोहर-रूपौ समानाकारौ समान-वयस्कौ समान-परिणाहौ समानस्वभावौ समान-स्वरौ समान-गुणौ केवलं वर्ण-मात्रतो भिन्नौ रामकृष्णाविवां गौर-श्यामौ बालकौ । तदवश्यं बहुमूल्याविति कुत्रापि कस्यचिदपि महाधनस्य हस्ते विक्रयणीयौ' इति तेषां घोरतरान् संल्लापान् शृण्वन्तौ 'कथं पलायावहे ? कथं वा मुच्यावहे ?' इत्यनवरतं चिन्तयन्तौ कथं कथञ्चित् कञ्चित् समयमयापयाव ।

सन्दर्भः—श्रीमदम्बिकादत्तव्यासविरचितशिवराजविजयस्य तृतीयनिश्वासे गौरसिंहस्य कथनमिदम् ।

व्याख्या—अस्मज्जननी = गौरश्याममाता तु, बालौ = बालकौ, एव, आवाम् = गौरश्यामौ, स्तनन्धयामेव = दुग्धपानरतामेव, चास्मत्सहोदरीम् = अस्मद्भगिनीञ्च, सौवर्णीम् = एतन्नामिकाम्, परित्यज्य = त्यक्त्वा, भुवम् = धराम्, विरहयाम्बभूव = अत्यजत् । अस्मत्तातचरणश्च = अस्मज्जनकश्च, कैश्चित् तुरुष्कैः = यवनैः, लुण्ठकप्रायैः = लुण्ठनप्रायस्वभावैः, युद्धक्रीडाम् = समरखेलाम्, कुर्वन्, पृष्ठतः, केनाऽपि, विशालभल्लेन = दीर्घभल्लेन, आहतः = मारितः, वीरगतिमगमत् = जगामोत्तमं लोकम् । ततः = पितृमरणोत्तरम्, पुरोहितेनैव = ऋत्विजेव, पाल्यमानौ = पोष्यमाणौ, आवामपि, यमलौ = यमौ, भ्रातरौ = बान्धवौ, गौरश्यामौ = गौरवर्णश्यामवर्णौ, एकदा = एकस्मिन् काले, मित्रैः = सुहृद्भिः, सह = साकम्, आखेटार्थम् = मृगयार्थम्, निःसृतौ = निर्गतौ, तुरगौ = घोटकौ, चालयन्तौ = वाहयन्तौ, मार्गभ्रष्टौ = विचलितपन्थानौ, अकस्मात् = सहसा, काम्बोजीयदस्युवारेण = कम्बोजदेशीयतस्करसमूहेन, आवृत्तौ = परिवृतौ, तेनैवापहृतमहार्ह-

भूषणौ=तस्करचयेन गृहीतबहुमूल्यभूषणौ, गृहीताश्वौ=नियमितघोटकौ, बद्धौ निगडितौ च, सहैव=साकमेव, वनाद् वनम्=विपिनात् विपिनान्तरम्, अनायिषहि=नीतौ, यद्यपि, शत्रुसन्तानाः=रिपुसुताः, निर्दयम्=निष्कृपम्, हन्तव्या आपादनीया, एव, तथापि=पुनरपि, नासाभूषणमौक्तिके इव=घोणालङ्कारमौक्तिके इव, वीणातुम्बाविव, श्यामकर्णहयाविव=कृष्णश्रोत्रघोटकाविव च, मनोहररूपौ=सुन्दराकारौ, समानाकारौ=तुल्यरूपौ, समानवयस्कौ=समावस्थायुक्तौ, समानपरिणाहौ=समविशालौ, समानस्वभावौ=समप्रकृतिकौ, समानस्वरौ=तुल्यस्वरौ, समानगुणौ=सदृशगुणौ, केवलं वर्णमात्रतो भिन्नौ=रङ्गमात्रतो भिन्नौ, रामकृष्णाविवाम्=बलरामश्यामाविवाम्, गौरश्यामौ=एतद्वर्णौ, बालकौ=बालौ। तदवश्यं बहुमूल्याविव=महार्हाविव, कुत्रापि=यत्रापि, कस्यचिदपि, महाधनस्य=महाश्रेष्ठिनः, हस्ते=करे, विक्रीयणीयौ=विक्रेय्यौ, इति, तेषाम्=तस्कराणाम्, संल्लापान्=वार्तालापान्, शृण्वन्तौ=आकर्णयन्तौ, कथम्=केन प्रकारेण, पलायावहे=निर्गच्छावः? कथं=केन प्रकारेण, मुच्यावहे=मुक्ता भवावः, इति, अनवरतम्=सदा, चिन्तयन्तौ=विचारयन्तौ, कथं कथञ्चित्=येन केनाऽपि प्रकारेण, समयम्=कालम्, यापयाव=अत्यवाहयाव।

समासः—अस्माकं जननी। अस्माकं सहोदरीम्। अस्माकं तातचरणश्च। युद्धस्य क्रीडाम्। विशालेन भल्लेन। मार्गात् भ्रष्टौ। काम्बोजीयानां दस्युनां वारेण काम्बोजीयदस्युवारेण। अपहृतानि महार्हाणि भूषणानि ययोस्तौ। गृहीतौ अश्वौ ययोस्तौ। शत्रूणां सन्ताना शत्रुसन्तानाः।

विशेषः—(१) 'द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ।
परिव्राड् योगयुक्तश्च, रणे चाऽभिमुखो हतः'॥ इति स्मृतिः।

(२) 'वंशोऽन्ववायः सन्तानः' इत्यमरः।

(५८) अथैकदा कश्चित् पान्थ-सार्थमवलोक्य तल्लुण्ठयिषया सर्वेष्वपि तस्य पन्थानमेवानुसृतेषु आवाभ्यामपि पलायनावसरो लब्धः। यावच्चाऽऽवां वस्त्राणि परिधाय, परिकरे असिधेनुकां बद्ध्वा बाहुमूले निस्त्रिंशं चर्म च लम्बयित्वा, तद्भुशुण्डिकानामेवैकामेकां मल्पीयसीमास्मत्तोलन-योग्यां सज्जां करे धृत्वा, उपकारिकाया बहिर्निर्गतौ; तावद् दृष्टम्—यदेको रक्षकः खड्गहस्तो नौ बहिर्गमनाद् वारयतीति।

प्रसङ्गः—श्रीमदम्बिकादत्तव्यासविरचितशिवराजविजयस्य तृतीये निश्वासे गौरसिंहोऽत्र वदति स्वपरिचयम् ।

व्याख्या—अथ=तस्करसाकं वसन्ताभ्याम्, एकदा=एकस्मिन् काले, कञ्चित् पान्थसार्थमवलोक्य=यात्रिवारं विलोक्य, तल्लुलुण्ठयिषया=यात्रिवर्ग-लुण्ठनेच्छया, सर्वेष्वपि=तस्करेषु, तस्य=यात्रिवर्गस्य, पन्थानम्=मार्गम्, अनुसृतेषु=अनुगमनरतेषु, आवाभ्यामपि=गौरश्यामाभ्यामपि, पलायनावसरः=निष्क्रमणावसरः, लब्धः=प्राप्तः, यावच्चावाम्=गौरश्यामौ, वस्त्राणि=वसनानि, परिधाय=धृत्वा, परिकरे=शरीरबन्धे, असिधेनुकाम्=छुरिकाम्, बद्ध्वा=कृत्वा, बाहुमूले=भुजमूले, निस्त्रिंशम्=खड्गम्, चर्म=अजिनं च, लम्बयित्वा=अवलम्ब्य, तद्भुशुण्डिकानाम्=चौरनालिकास्त्राणामेवैकामेकाम्, अलघीयसीम्=लघ्वीम्, आत्मोत्तोलनयोग्याम्=निजोद्वहनक्षमाम्, सज्जाम्=गोलिकापूर्णाम्, करे=हस्ते, धृत्वा=विधृत्य, उपकारिकायाः=वस्त्रगेहात्, बहिर्निर्गतौ=निष्क्रान्तौ, तावद्, दृष्टम्=विलोकितम्, यदेको, रक्षकः=रक्षिता, नौ=आवाम्, बहिर्गमनात्=निष्क्रमणात्, वारयतीति=रुणद्धि इति ।

समासः—पान्थानां सार्थं पान्थसार्थम् । तेषां भुशुण्डिकानां तद्भुशुण्डिकानाम् । आत्मना उत्तोलनयोग्याम् आत्मोत्तोलनयोग्याम् । खड्गः हस्ते यस्य सः खड्गहस्तः ।

(५९) अथाऽऽवाभ्यां भुशुण्डिकां सन्धायोक्तम्—'अलमलं कदर्य ! किमप्यधिकं वक्ष्यसि तत्स्थानात् पादमेकामपि च प्रचलिष्यसि चेत्; क्षणेन परेतपति-पालित-पुरी-पान्थं विधास्यावः' इत्याकलय्य भयेन काष्ठभूते तस्मिन् मूढ-रक्षके मयि च तथैव बद्ध-लक्ष्ये स्थिते; मदिङ्गितानुसारेण श्यामसिंहस्तस्या एवोपकार्य्यायाः प्रान्ते बद्धानां फेनवर्षिणामश्वानां कौचिच्चण्डवेगौ श्यामकर्णावाञ्जनेयौ उन्मुच्य, वल्गामायोज्य सर्वतः सज्जीकृत्य चैकमारुह्य रक्षकोपरि भुशुण्डिकां तथैव सज्जीकृतवान् । ततश्चाऽहमपरं हयमारुह्य तस्य ग्रीवामास्फोट्य नर्तयन् रक्षकं साम्रेडं तर्ज्जनैर्हतोत्साहं मृतप्रायं च विधाय श्यामसिंहमिङ्गितवान् ।

तथाऽऽवां द्वावपि वायुवेगाभ्यामश्वाभ्यामज्ञातेनैवाऽपथा उपत्यकात् उपत्यकाम्, वनाद् वनम्, प्रान्तराच्च प्रान्तरमुल्लङ्घमानौ तेनैव दिनेन गव्यूति-पञ्चकं प्रयातौ । सायं समये च कामपि ग्रामटिकामासाद्य अन्यतमस्य गृहस्य द्वारं गतौ । तच्च हनुमन्मन्दिरमवगत्य तस्मिन् प्रविष्टौ तदध्यक्षेण केनचित् साधुना च सस्वागतमाग्रहेण वासितौ, तत्रैव निवासमकुर्वहि ।

सन्दर्भः—श्रीमदम्बिकादत्तव्यासः शिवराजविजयस्य तृतीये निश्वासे गौर-श्यामयोः तस्करसमूहात् पलायनं वर्णयति ।

व्याख्या—अथ = रक्षकवारणोत्तरम्, आवाभ्याम् = गौरसिंहश्यामसिंहाभ्याम्, भुशुण्डिकाम् = नालिकास्त्रम्, सन्धाय = धृत्वा, उक्तम् = कथितम्, अलमलं कदर्य ! = पर्याप्तं पर्याप्तं नीच ! किमपि = किञ्चिदपि, अधिकम् = अतिरिक्तम्, वक्ष्यसि = कथयिष्यसि, तत्स्थानात् = तस्मात् स्थानात्, पादमेकापि = पदात्पदमपि च, प्रचलिष्यसि = अग्रं गमिष्यसि चेत्, क्षणेन = पलेन, प्रेतपतिपालितपुरीपान्थम्=कीनाशनिकेतनातिथिम्, विधास्याव: = करिष्यावः, इत्याकलय्य = श्रुत्वेदम्, भयेन काष्ठभूते = भिया काष्ठवत् सञ्जाते, तस्मिन् मूढरक्षके = किङ्कर्तव्यविमूढरक्षितारि, मयि च = गौरसिंहे च, तथैव बद्धलक्ष्ये=सन्धानितनालिकास्त्रे, स्थिते, मदिङ्गितानुसारेण=मत्सङ्केतानुकूलम्, श्यामसिंहः =गौरसिंहानुजः, तस्या एव = पूर्वमावासभूताया एव, उपकार्यायाः = पटगेहस्य, प्रान्ते = समीपे, बद्धानाम् = नियमितानाम्, फेनवर्षिणाम् = सुखोपविष्टानाम्, अश्वानाम् = घोटकानाम्, कौचित्, द्वौ, चण्डवेगौ = प्रभूतवेगौ, श्यामकर्णौ = कृष्णश्रोत्रौ, आञ्जनेयौ = कुलीनौ, उन्मुच्य = बन्धनाद् विमुच्य, वल्गामायोज्य = कविकामाकलय्य, सर्वतः = परितः, सज्जीकृत्य = तल्लीनीकृत्य, चैकमारुह्य = घोटकमेकमारुह्य, रक्षकोपरि = रक्षितरि, भुशुण्डिकाम् = नालिकास्त्रम्, तथैव = तेन प्रकारेण, सज्जीकृतवान् = तल्लीनीकृतवान्, ततश्च = एतदुत्तरं च, अहमप्यपरम् = गौरसिंहोऽपीतरम्, हयमारुह्य = घोटकमारुह्य, तस्य = हयस्य, ग्रीवाम् = कन्धराम्, आस्फोटच = करतलैः सन्ताड्य, नर्तयन्=चालयन्, रक्षकम् = परगृहसुरक्षाकर्मिणम्, साम्रेडम् = वारं वारम्, तर्जनैः = भीषणैः, हतोत्साहम् = नष्टोत्साहम्, मृतप्रायम् = संज्ञाशून्यञ्च, विधाय = कृत्वा, श्यामसिंहमिङ्गितवान् = निजभ्रातरं सङ्केतितवान् ।

अथ = एतदुत्तरम्, आवां द्वावपि = उभावपि भ्रातरौ, वायुवेगाभ्याम् = पवनवेगाभ्याम्, अश्वाभ्याम् = घोटकाभ्याम्, अज्ञातेनैवाऽपथा = अदृष्टेनैवामार्गेण, उपत्यकात् उपत्यकाम् = शैलनिकटस्थानात् शैलनिकटस्थानम्, वनात् वनम् = विपिनात् विपिनम्, प्रान्तराच्च प्रान्तरम् = दूरशून्यमार्गाद् दूरशून्यमार्गम्, उल्लङ्घमानौ = उद्गच्छन्तौ, तेनैव दिनेन = दिवसेन, गव्यूतिपञ्चकम् = दशक्रोशम्, प्रयातौ = निर्गतौ, सायं समये = सन्ध्याकाले, कामपि ग्रामटिकाम्=लघुग्रामम्, आसाद्य=अवाप्य, अन्यतमस्य = एकस्य, गृहस्य = गेहस्य, द्वारम् = द्वार-

देशम्, गतौ = प्रयातौ, तच्च, हनुमन्मन्दिरमवगत्य = मारुतिदेवायतनं ज्ञात्वा, तस्मिन् = मन्दिरे, प्रविष्टौ, तदध्यक्षेण = तत्स्वामिना, केनचित्, साधुना = सज्जनेन च, सस्वागतमाग्रहेण = स्वागतपूर्वम्, आग्रहसहितम्, न्यासितौ = स्थापितौ, तत्रैव = मारुतिमन्दिरे, निवासमकुर्वहि = वसतिं कृतवन्तौ।

(६०) ततश्च दुग्धधाराभिरिव प्रथमं प्राचीं सङ्क्षाल्य, भसितच्छुरितामिव विधाय, चन्दनैरिव सञ्चर्च्य, कुन्द-कुसुमैरिवाऽऽकीर्य, गगनसागर-मीने इव, मनोज-मनोज्ञ-हंसे इव, विरहि-निकृन्तन-रौप्य-कुन्त-प्रान्ते इव, पुण्डरीकाक्ष-पत्नी-कर-पुण्डरीकपत्रे इव, शारदाभ्र-सारे इव, सप्तसप्ति-सप्ति-पाद-च्युते राजत-खुरत्रे इव, मनोहरता-महिलाललाटे इव, कन्दर्प-कीर्तिलताङ्कुरे इव, प्रजा-जन-नयन-कर्पूरखण्डे इव, तमी-तिमिर-कर्तन-शाणोल्लीढ-निस्त्रिंशे इव च समुदिते चैत्र-चन्द्रखण्डे; तत्प्रकाशेन स्फुटं प्रतीयमानासु सर्वासु दिक्षु, अहं परितो दृक्पातम-कार्षम्, अद्राक्षं च यदुत्तराभिमुखम्, तद् विशालं मन्दिरमस्ति, तद्द्वारस्योभयतः सुधालिप्त-भित्तिकायां विशालैः सिन्दूराक्षरैः 'जयति हनुमान्' 'रामदूतो विजय-तेतराम्' 'विजयतामक्षक्षयकारी'–इति बहूनि वाक्यानि गदादि-चिह्नानि च लिखितानि सन्ति। तत उत्तरस्यामेकः स्वल्पः शैलखण्डः, पूर्वस्यां गहनं वनम्, पश्चिमायां च स्वल्पमेकं पल्वलमासीत्। यद्यप्यसौ पर्वत-खण्डो नात्यन्तं भयानक इव, तथाऽपि विविधगण्डशैलावृतः, झर-झर्झर-ध्वनि-पूरित-दिगन्तरालः, महीरुह-समूह-समावृतः, उच्चावच-सानु-प्रचय-सूचित-विविध-कन्दरश्चाऽऽसीत्। चन्द्र-चन्द्रिका-चाकचक्यात् स्फुटमवालोक्यन्तैतस्योपत्यकाः।

प्रसङ्गः—गौरसिंहप्रोक्ता पङ्क्तिरियं श्रीमदम्बिकादत्तव्यासविरचितशिव-राजविजयस्य तृतीयनिश्वासाद् गृहीता।

व्याख्या—ततश्च = मन्दिरवासोत्तरञ्च, दुग्धधाराभिरिव = पयःप्रवाहैरिव, प्रथमम् = पूर्वम्, प्राचीम् = पूर्वदिशाम्, सङ्क्षाल्य = प्रक्षाल्य, भसितच्छु-रितामिव = भूतिरूपितामिव, विधाय = कृत्वा, चन्दनैरिव = मलयजैरिव, सञ्चर्च्य = विलिप्य, कुन्दकुसुमैरिव = माध्यपुष्पैरिव, आकीर्य = सम्पूज्य, गगन-सागरमीने इव = नभःसमुद्रमत्स्ये इव, मनोजमनोज्ञहंसे इव = कामसुन्दर-हंसे इव, विरहिनिकृन्तनरौप्यकुन्तप्रान्ते इव = वियोगिकर्तनरौप्यकुन्ताग्रे इव, पुण्डरीकाक्षपत्नीकरपुण्डरीकपत्रे इव = लक्ष्मीहस्तस्थकमलदले इव, शारदाभ्र-सारे इव = शरदुत्पन्नमेघतत्त्वांशे इव, सप्तसप्तिसप्तिपादच्युते = सूर्याश्वपादपतिते, राजतखुरत्रे = रौप्यखुरत्रे इव, मनोहरतामहिलाललाटे इव = सुन्दरतारमणी-

ललाटपट्टे इव, कन्दर्पकीर्तिलताङ्कुरे इव = मनोजयशोलताङ्कुरे इव, प्रजा-जननयनखण्डे इव = जनतानेत्रहिमवालुकाखण्डे इव, तमीतिमिरकर्तनशाणो-त्तीढनिस्त्रिंशे इव = रात्र्यन्धकारनाशनकपतेजितखड्गे इव च, समुदितम् = उदयं प्राप्ते, चैत्रचन्द्रखण्डे = सुरिभमासेन्दुशकले, तत्प्रकाशेन = चन्द्रचन्द्रि-कया, स्फुटम् = स्पष्टम्, प्रतीयमानासु = परिलक्ष्यमानासु, सर्वासु = सकलासु, दिक्षु = ककुभवलये, अहम् = गौरसिंहः, परितः = सर्वतः, दृक्पातम् = नयन-निक्षेपम्, अकार्षम् = अकरवम्, अद्राक्षं च = अपश्यं च, यदुत्तराभिमुखम् = उदीचीसम्मुखम्, तत् विशालम् = दीर्घम्, मन्दिरमस्ति = देवायतनमस्ति, तद्द्वारस्योभयतः = देवायतनद्वारोभयतः, सुधालिप्तभित्तिकायाम् = चूर्णलिप्त-कुड्याम्, विशालैः = आयतैः, सिन्दूराक्षरैः = द्रव्यविशेषाक्षरैः, जयति = विजयते, हनुमान् = मारुतिः, रामदूतः = राघवसन्देशहरः, विजयतेतराम् = अधि-जयति, विजयताम् = जयतु, अक्षक्षयकारी = अक्षहन्ता, इति बहूनि = अधि-कानि, वाक्यानि = सुप्तिङन्तरूपाणि, गदाचिह्नानि = गदाद्याकाराणि च, लिखि-तानि = विरचितानि सन्ति । तत उत्तरस्याम् = देवायतनोत्तरदिशि, एकः = अन्यतमः, स्वल्पः = लघु, शैलखण्डः = शिलाखण्डः, पूर्वस्याम् = पूर्वदिशि, गहनम् = भीषणम्, वनम् = विपिनम्, पश्चिमायाम् = प्रतीच्याम्, स्वल्पमेकम् = लघ्वाकारमेकम्, पल्वलम् = सरः आसीत् । यद्यप्यसौ, पर्वतखण्डः = शिला-शकलः, नात्यन्तं, भयानकम् = भीतिजनकम् इव, तथापि, विविधगण्डशैलावृतः = अनेकलघुशैलपरिवृतः, झरझर्झरध्वनिपूरितदिगन्तरालः = वारिप्रवाहझर्झर-शब्दनिनादितदिक्प्रान्तः, महीरुहसमूहसमावृतः = वृक्षगणपरिवृतः, उच्चावच-सानुप्रचयसूचितविविधकन्दरः = निम्नोन्नताद्रिनितम्बसमूहप्रकटीकृतानेकगह्वरः, चासीत् । चन्द्रचन्द्रिकाचाकचक्यात्=शशिज्योत्स्नाचाकचक्यात्, स्फुटमवलोक्यन्ते = स्पष्टं प्रतिभान्ति, तस्योपत्यकाः = पर्वताधोभागाः ।

समासः— दुग्धस्य धाराभिः दुग्धधाराभिः । भसितेन च्छुरितां भसित-च्छुरिताम् । कुन्दानां कुसुमैः कुन्दकुसुमैः । गगनसागरस्य मीने गगनसागर-मीने । मनोजस्य मनोज्ञे हंसे मनोजमनोज्ञहंसे । विरहिणा निकृन्तनाय रौप्यस्य कुन्तस्य प्रान्ते विरहिनिकृन्तनरौप्यकुन्तप्रान्ते । पुण्डरीके इव अक्षिणी यस्यासौ पुण्डरीकाक्षः, तत्पत्न्याः करपुण्डरीकपत्रे पुण्डरीकाक्षपत्नीकरपुण्डरीकपत्रे । शरदि भवं शारदम्, अभ्रं तत्सारे शारदाभ्रसारे । सप्तसप्तेः सप्तिः, तत्पाद-च्युते सप्तसप्तिसप्तिपादच्युते । मनोहरता एव महिला, तस्याः ललाटे मनोहरता-

महिलाललाटे । कन्दर्पस्य कीर्तिलतायाः अङ्कुरे कन्दर्पकीर्तिलताङ्कुरे । प्रजाजननयनानां कर्पूरखण्डे प्रजाजननयनकर्पूरखण्डे । तमीतिमिरकर्तनाया शाणेन उल्लीढे निस्त्रिंशे तमीतिमिरकर्तनाशाणोल्लीढनिस्त्रिंशे । सुधया लिप्तायां भित्तिकायां सुधालिप्तभित्तिकायाम् । झरस्य झर्झरध्वनिना पूरितानि दिगन्तरालानि यस्य सः झरझर्झरध्वनिपूरितदिगन्तरालः । महीरुहाणां समूहेन समावृतः महीरुहसमूहसमावृतः । उच्चावचानां सानूनां प्रचयेन सूचिता विविधाः कन्दराः यस्य सः उच्चावचसानुप्रचयसूचितविविधकन्दरः । चन्द्रस्य चन्द्रिकायाः चाकचक्यात् चन्द्रचन्द्रिकाचाकचक्यात् ।

(६१) ततश्च झिल्ली-झङ्कारेणेव केनचित् विलक्षणेन अनाहतध्वनिनेव पर्य्यपूर्यत वसुधा । विचित्र एष कश्चन परस्सहस्र-तानपूर-षड्जस्वरसोदरो वनरात्रि-ध्वनिः, तमेव स्वरं गम्भीरं विशकलय्य आकर्णयता समश्रावि कीचकध्वनिरपि, तत्राऽप्यवदधता साक्षादकारि मधुकरनिकर-झङ्कारः, पुनरेकाग्रतामङ्गीकुर्वता समाकर्णि स्रोतस्संसरण-सरत्कारः, तस्मिन्नपि च लयमिवाऽऽकलयता समन्वभावि समीरण-समीरित-किशलय-परिप्लवता-प्रभूत-स्वनः, तत्रापि च स्थिरतां बिभ्रता प्रत्यक्षीकृतं सुधा-धारामप्यधरीकुर्वत्, वीणा-रणनमपि विगणयत्, मधु विधुरयत्, मरन्दं मन्दयत्, कल-काकली-कलन-पूजितं कोकिल-कुलकूजितम् । ततश्च बहूनामेव मधुर-कण्ठानां वन्य-पतत्रिणां स्थगितमन्थराऽऽरावाः समाकर्णिषत । अथाऽनुभवन् धीर-समीर-स्पर्शसुखम्, साम्रेडमवलोकयंश्च तारकितं नभः, स्मारं स्मारं स्वगृहस्य, महाचिन्ता-पारावारे इवाऽहं न्यमाङ्क्षम्। ततः पृष्ठतो भित्तिकामाश्रित्य, करौ कटि-प्रदेशे संस्थाप्य, साम्मुखीन-शिखरे चक्षुषी स्थिरयित्वा, आत्मानमपि विस्मृत्य व्यचारयं यत् ।

उत्तरम्—प्रसङ्गः—श्रीमदम्बिकादत्तव्यासविरचितस्य शिवराजविजयस्य तृतीयनिश्वासाद् गृहीतोऽयमंशः । गौरसिंहस्योक्तिरियम् ।

व्याख्या—ततः = उपत्यकादर्शनानन्तरम्, च, झिल्लीझङ्कारेणेव = भृङ्गारीध्वनिनेव, केनचित्, विलक्षणेन = विचित्रेण, अनाहतध्वनिनेव = अव्यक्तशब्देनेव, पर्यपूर्यत = पूरिता, वसुधा = धरा, विचित्रः = विलक्षणः, एष कश्चन, परस्सहस्रतानपूरषड्जस्वरसोदरः = बहुसङ्ख्यतानपूरषड्जस्वरसहोदरः, वनरात्रिध्वनिः = विपिननिशाशब्दः, तमेव, स्वरम् = शब्दम्, गम्भीरम् = गभीरम्, विशकलय्य = विविच्य, आकर्णयता = शृण्वता, समश्रावि = श्रुता, कीचकध्वनिरपि = वेणुविशेषशब्दोऽपि, तत्राप्यवदधता = ध्यानं ददता, साक्षादकारि = दृष्टः, मधु-

करनिकरझङ्कार: = भ्रमरसमूहक्वणनः, पुनरेकाग्रतामङ्गीकुर्वता = एकचित्ततां स्वीकुर्वता, समाकर्णि=श्रुतः, स्रोतस्संसरणसरत्कार: = स्रोतोवहनध्वनिः, तस्मिन्नपि च = तत्रापि च, लयमिवाऽऽकलयता=सम्मेलयता, समन्वभावि=समनुभूतः, समीरणसमीरितकिसलयपरिप्लवताप्रभूतस्वनः = पवनचालितपल्लवस्फुरमाणताप्रचुरस्वनः, तत्रापि, च, स्थिरताम् = स्थैर्यम्, बिभ्रता = धारयता, प्रत्यक्षीकृतम् = दृष्टम्, सुधाधारामप्यधरीकुर्वत् = अमृतप्रवाहमप्यधरयत्, वीणारणनमपि = वीणाक्वणनमपि, विगणयत्=तिरस्कुर्वत्, मधु = क्षौद्रम्, विधुरयत्=तिरस्कुर्वत्, मरन्दम् = भ्रमरम्, मन्दयत् = गतिरहितं विदधत्, कलकाकलीकलनपूजितम् = सूक्ष्माव्यक्तध्वनिसत्कृतम्, कोकिलकुलकूजितम् = पिककुलशब्दम् । ततश्च = तदनन्तरं च, बहूनामेव = अनेकेषामेव, मधुरकण्ठानाम् = सुमधुरगलबिलानाम्, वन्यपतत्रिणाम् = विपिनपक्षिणाम्, स्थगितमन्थरारावः = शून्यधीरशब्दः, समकर्णिषत = श्रुताः । अथ = अनन्तरम्, अनुभवन् = अनुभूतिं कुर्वन्, धीरसमीरस्पर्शसुखम् = मन्थरवायुस्पर्शसुखम्, साम्रेडम् = कतिवारम्, अवलोकयंश्च = विलोकयश्च, तारकितम् = तारकैश्चितम्, नभः = गगनम्, स्मारं स्मारम् = स्मृत्वा स्मृत्वा, स्वगृहस्य = निजगेहस्य, महाचिन्तापारावारे=वृहच्चिन्तनसागरे, इव = यथा, अहम्=गौरसिंहः, न्यमाङ्क्षम् = निमग्नोऽभवम् । ततः = अनन्तरम्, कटिपृष्ठतः, भित्तिकाम् = कुड्यम्, आश्रित्य = अवलम्ब्य, करौ = हस्तौ, कटिप्रदेशे = देहमध्यभागे, संस्थाप्य = स्थापयित्वा, साम्मुखीनशिखरिशिखरे = सम्मुखस्थपर्वतशिखरे, चक्षुषी = नेत्रे, स्थिरयित्वा = स्थिरीकृत्य, आत्मानम् = स्वम्, अपि, विस्मृत्य = स्मृत्यभावमानीय, व्यचारयम् = विचारितवान्, यत्—

समासः—झिल्ल्याः झङ्कारेण झिल्लीझङ्कारेण । अनाहतेन ध्वनिना अनाहतध्वनिना । परस्सहस्राणां तानपूराणां यः षड्जस्वरः, तत्सोदरः परस्सहस्रतानपूरषड्जस्वरसोदरः । मधुकरनिकराणां झङ्कारः मधुकरनिकरझङ्कारः । स्रोतसां संसरणस्य सरत्कारः स्रोतस्संसरणसरत्कारः । समीरणेन समीरितानां किशलयानां परिप्लवतया प्रभूतः स्वनः । कला या काकली, तस्याः कलनेन पूजितं कलकाकलीकलनपूजितम् । धीरो यः समीरः, तस्य स्पर्शस्य सुखं धीरसमीरस्पर्शसुखम् ।

कोषः—'वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः', 'काकली तु कले सूक्ष्मे' इत्युभयत्राप्यमरः ।

(६२) 'अहह ! दुरदृष्टोऽस्मि !! धन्यावावयोः पितरौ यौ सुखिनावेवाऽऽवां परित्यज्य दिवं सनाथितवन्तौ, न तयोरदृष्टे पुत्र-विश्लेष-दुःखं व्यलेखि धात्रा। नितान्तं पापिनौ चाऽऽवाम्, यौ बाल्य एवेदृशीषु दुरवस्थासु पतितौ। का दशा भवेत् साम्प्रतमावयोरनुजायाः सौवर्ण्याः ? हन्त !! हतभाग्या सा बालिका; या अस्मिन्नेव वयसि पितृभ्यां परित्यक्ता, आवयोरप्यदर्शनेन क्रन्दनैः कण्ठं कदर्थयति। अहह ! सततमस्मत्क्रोडैक-क्रीडनिकाम, सततमस्मन्मुखचन्द्र-चकोरीम्, सततमस्मत्कण्ठ-रत्नमालाम्, सततमस्मत्सहभोजिनीम्, बाल्य-लुलितैः, मधुर-मधुरैः, सुधास्यन्दनैः, दादा-दादेति भाषणैः आवयोर्हृदयं हरन्तीम्, क्षणमात्र-मस्मदनवलोकनेनाऽपि बाष्प-प्रवाहैः कपोलौ मलिनयन्तीम्, कथमेनां वृद्धः पुरोहितः सान्त्वयिष्यति ? अस्मज्जनकाविशेषः पुरोहित एव वा कथं नौ विना जीविष्यति ? परमेश्वर ! तथा विधेहि यथा जीवन्तं वृद्धं पुरोहितं सौवर्णी साक्षात्कुर्वः'।

प्रसङ्गः—श्रीमदम्बिकादत्तव्यासविरचितस्य शिवराजविजयस्य तृतीयनिश्वा-साद् गृहीतोऽयमंशः। गौरसिंहस्योक्तिरियम्।

व्याख्या—अहह !=हा हा ! दुरदृष्टोऽस्मि=दुर्भाग्योऽस्मि। धन्यौ=धन्यवादार्हौ, आवयोः=गौरश्यामयोः, पितरौ=प्रसूजनपितरौ, यौ, सुखिनौ=सुशर्माणौ एव, आवाम्=गौरश्यामौ, परित्यज्य=त्यक्त्वा, दिवम्=स्वर्गम्, सनाथितवन्तौ=गतौ, न=नहि, तयोः=मातापित्रोः, अदृष्टे=भाग्ये, पुत्र-विश्लेषदुःखम्=तनयवियोगक्लेशम्, व्यलेखि=लिखितम्, धात्रा=विधात्रा, नितान्तम्=बहु, पापिनौ=पापपूर्णौ, चावाम्=गौरश्यामौ, यौ बाल्ये एव, ईदृशीषु=ईदृग्विधासु, दुरवस्थासु=दुर्दशासु, पतितौ=आयातौ, का दशा=अवस्था, भवेत्, साम्प्रतम्=अधुना, आवयोः, अनुजायाः=भगिन्याः, सौवर्ण्याः=एतन्नामिकायाः ? हन्त ! हतभाग्या=दुर्भाग्या, सा बालिका=सौवर्णी, या अस्मिन्नेव=कुसुमसुकुमारे, वयसि=अवस्थायाम्, पितृभ्यां परित्यक्ता=मात्रा पित्रा च विरहिता, आवयोः=गौरश्यामयोः अपि, अदर्शनेन=अनवलोकनेन, क्रन्दनैः कण्ठम्=गलविलम्, कदर्थयति=दूषयति। अहह !=हा ! सततम्=सदा, अस्मत्क्रोडैकक्रीडनिकाम्=अस्मदङ्कखेलाम्, सततम्, अस्मन्मुखचन्द्रचकोरीम्=अस्मद्वदनविधुदर्शनरताम्, सततम्, अस्मत्कण्ठरत्नमालाम्=अस्मत्गल-विलमणिमालिकाम्, सततम्—अस्मत्सहभोजिनीम्=अस्मत्सहखादिनीम्, बाल्य-लुलितैः=शैशवसुन्दरैः, मधुरमधुरैः=अतिमधुरैः, सुधास्यन्दनैः=पीयूषवर्षिणैः,

दादादादेति भाषणैः = तातताेति वाक्यैः, आवयोः = गौरश्यामयोः, हृदयम् = मनः, हरन्तीम् = आकर्षन्तीम्, क्षणमात्रम् = पलमात्रम्, अस्मदनवलोकनेनापि = अस्मद्दर्शनाभावेनापि, बाष्पप्रवाहैः = अश्रुधाराभिः, कपोलौ = गण्डस्थलौ, मलिनयन्तीम् = दूषयन्तीम्, कथम् = केन प्रकारेण, एनाम् = मद्भगिनीम्, वृद्धः = वर्षीयान्, पुरोहितः = ऋत्विक्, सान्त्वयिष्यति = सान्त्वनां दास्यति, अस्मज्जनकाविशेषः = अस्मत्पितृनिर्भिन्नः, पुरोहित एव वा = ऋत्विगेव वा, कथम् = केन प्रकारेण, नौ = आवां विना, जीविष्यति = जीवनं धारयिष्यति, परमेश्वर ! = भगवन् ! तथा विधेहि = कुरु, यथा, जीवन्तम् = प्राणन्तम्, वृद्धम् = जरतीम्, तनुं बिभ्राणं पुरोहितं, सौवर्णीम् = स्वभगिनीम्, साक्षात्कुर्वः = पश्यावः साक्षात् ।

समासः—दुष्टः अदृष्टो यस्य सः दुरदृष्टः । पुत्राणां विश्लेपस्य दुःखं पुत्रविश्लेपदुःखम् । हतं भाग्यं यस्याः सा हतभाग्या । अस्माकं क्रोडस्य एकां क्रीडनिकाम् अस्मत्क्रोडैकक्रीडनिकाम् ।

(६३) ततोऽवलोक्य तां वज्रेणेव निर्मिताम्, साकारामिव वीरताम्, गदामुद्यम्य दुष्ट-दल-दलनार्थमुच्छलन्तीमिव केशरि-किशोर-मूर्तिम्, न जाने कथं वा कुतो वा किमिति वा प्रातरन्धकार इव, वसन्ते हिम इव, बोधोदयेऽबोध इव ब्रह्मसाक्षात्कारे भ्रम इव च झटित्यपससार आवयोः शोकः । प्राकाशि च हृदये यद्—

'अलं बहुल-चिन्ताभिः ! कश्चन पुरुषार्थः स्वीक्रियताम्, न खलु बुद्धचतां यदावामेव दुरदृष्टवशात् त्यक्त-कुटुम्बौ वने पर्य्यटावः—इति, किन्तु कोशलेश्वर-तनयौ राम-लक्ष्मणावपि चतुर्दश-वर्षाणि यावद् दण्डकारण्ये भ्रान्तवन्तौ ।' इति ।

सन्दर्भः—गौरसिंहोऽत्र वर्णयति मारुतिविग्रहं श्रीमदम्बिकादत्तव्यासविरचितशिवराजविजयस्य तृतीये निश्वासे ।

व्याख्या—ततः = उपवेशनोत्तरम्, अवलोक्य = विलोक्य, ताम् = मारुतिमूर्तिम्, वज्रेणेव निर्मिताम् = इन्द्रायुधेनेव घटिताम्, साकारामिव = सविग्रहामिव, वीरताम् = शूरताम्, गदाम् = अस्त्रविशेषम्, उद्यम्य = उत्थाप्य, दुष्टदलदलनार्थम् = दुराचारिवर्गनाशार्थम्, उच्छलन्तीमिव = कूर्दतीमिव, केशरिकिशोरमूर्तीमिव = अञ्जनानन्दविग्रहमिव, न जाने = जानामि, कथम् = केन प्रकारेण, वा, कुतो वा, कुतश्चिद्वा, किमिति वा, प्रातरन्धकारे इव = उषसि तम इव, वसन्ते = मधौ, हिम इव = नीहार इव, बोधोदये = ज्ञानोदये, अबोध इव = अज्ञानम् इव, ब्रह्मसाक्षात्कारे = ब्रह्मदर्शने, भ्रम इव = सन्देह इव, झटिति = शीघ्रम्, अपससार =

व्यपगतः, आवयोः = गौरश्यामयोः, शोकः, प्राकाशि = प्रकटीबभूव, च, हृदये = मानसे, यद्, अलं बहुलचिन्ताभिः = चिन्तनैरलम्, कश्चन, पुरुषार्थः = पौरुषः, स्वीक्रियताम् = विधीयताम्, न खलु, बुद्ध्यताम् = ज्ञायताम्, यदावामेव, दुरदृष्ट-वशात् = दुर्भाग्यात्, त्यक्तकुटुम्बौ = परित्यक्तपरिवारौ, वने = विपिने, पर्यटाव: = भ्राम्याव:, इति, किन्तु = परन्तु, कोशलेश्वरतनयौ = दशरथसुतौ, राम-लक्ष्मणावपि = राघवलक्ष्मणावपि, चतुर्दशवर्षाणि यावद्=चतुर्दशसंवत्सरं यावत्, दण्डकारण्ये = वने दण्डकायाम्, भ्रान्तवन्तौ = अभ्राम्यतामिति ।

समासः—आकारेण सहितामिव । दुष्टानां दलस्य दलनार्थं दुष्टदलदल-नार्थम् । केशर्याः किशोरस्य मूर्ति केशरिकिशोरमूर्तिम् । बोधस्योदये बोधोदये। ब्रह्मणः साक्षात्कारे ब्रह्मसाक्षात्कारे । त्यक्तं कुटुम्बं याभ्यां तौ त्यक्तकुटुम्बौ ।

(६४) ततो हनुमत्पूजकेन सर्वमस्मद्वृत्तान्तं पृष्ट्वा ज्ञात्वा च काष्ठ-पट्टिकायां घृतोन्मथित-सिन्दूरेण किमपि यन्त्रमिवोल्लिख्य, चन्दनैः सञ्चर्च्य, कुसुमैराकीर्य, धूपेन धूपयित्वा, किमपि क्षणं ध्यात्वेव च मम हस्ते पूगीफलमेकं दत्त्वा, 'वत्स ! अस्मिन् यन्त्रे कस्मिन्नपि कोष्ठे यथारुचि क्रमुकफलमिदं स्थापय' इत्य-वाचि । तत एकतमे कोष्ठे निहित-क्रमुके मयि मुहूर्तम् अङ्गुलिपर्वसु किमपि गणयित्वेव स मामवादीत्—'वत्स ! कदाऽपि मा स्म गमो गृहं प्रति, यतो मार्गे पर्वततटीषु अरण्यानीषु च बहवः काम्बोजीया यवन-दस्यवो भवतोर्ग्रहणाय विचरन्ति । दस्युभिः क्रियासमभिहारेण चङ्क्रम्यमाणं देशमवलोक्य भवद्ग्राम-वासिनः सर्वेऽपि स्वं स्वमालयं परित्यज्य इतस्ततो गताः ।'

सन्दर्भः—गौरसिंहो मारुतिमन्दिराध्यक्षवार्तालापं वर्णयति श्रीमदम्बिकादत्त-व्यासः शिवराजविजयस्य तृतीये निश्वासे ।

व्याख्या—ततः = कथमावयोः कल्याणं स्यादिति विचारणोत्तरम्, हनुमत्-पूजकेन = मारुतिमन्दिराध्यक्षेण, सर्वमस्मद्वृत्तान्तम्=सकलं गौरसिंहश्यामसिंह-कथानकम्, पृष्ट्वा = आपृच्छ्य, ज्ञात्वा = परिज्ञाय, च, काष्ठपट्टिकायाम् = दारु-फलके, घृतोन्मथितसिन्दूरेण=आज्यमिश्रितसिन्दूरेण, किमति, यन्त्रमिव, उल्लिख्य = विलिख्य, चन्दनैः = मलयजैः, सञ्चर्च्य=चर्चयित्वा, कुसुमैः = पुष्पैः, आकीर्य = पूजयित्वा, धूपेन = अगुरुणा, धूपयित्वा = सुगन्धितं कृत्वा, किमपि, क्षणम् = पलम्, ध्यात्वेव = ध्यानं कृत्वेव, मम = गौरसिंहस्य, हस्ते = करे, पूगीफल-मेकम् = क्रमुकमेकम्, दत्त्वा = समर्प्य, वत्स ! = पुत्र ! अस्मिन् यन्त्रे = श्रेय-स्करसाधने, कस्मिन्नपि, कोष्ठे = कोष्ठके, यथारुचि = स्वेच्छया, क्रमुकफलमिदम्

=पूगीफलमिदम्, स्थापय = निवेशय, इत्यवादि = इत्यभाणि। ततः, एकतमे =एकस्मिन्, कोष्ठे, निहितक्रमुके = स्थापितपूगीफले, मयि = गौरसिंहे, मुहूर्तम् =क्षणम्, अङ्गुलिपर्वसु = करुहग्रन्थिभागेषु, किमपि = किञ्चिदपि, गणयित्वेव =सङ्ख्याय इव, सः = गणकः, माम् = गौरसिंहम्, अवादीत्=अकथयत्—वत्स ! =पुत्र ! कदापि मा स्म गमो गृहं प्रति = कदापि गेहं न गच्छ, यतो, मार्गे = पथि, पर्वततटीषु = गिरितटेषु, अरण्यानीषु = कान्तारेषु च, बहवः = अनेके, काम्बोजीयाः = कम्बोजदेशोद्भवाः यवनदस्यवः=तुरुष्कतस्कराः, भवतोर्ग्रहणाय =युवयोः वशीकरणाय, विचरन्ति = मार्गयन्ति, दस्युभिः = तस्करैः, क्रियासमभिहारेण = पौनःपुन्येन, चङ्क्रम्यमाणम्=भ्रम्यमाणम्, देशम्=स्थानम्, अवलोक्य =विलोक्य, भवद्ग्रामवासिनः, सर्वे = सकलास्त्वद्ग्रामवास्तव्याः, अपि, स्वं स्वम् = निजं निजम्, आलयम् = गेहम्, परित्यज्य = त्यक्त्वा, इतस्ततो गताः = यत्र तत्र पलायिताः ।

(६५) 'अथ भगवन् ! श्रूयते सुदूरमस्मात् स्थानात् कोङ्कणदेशः, मध्ये च विकटा अटव्यः, शतशः शैल-श्रेणयः, त्वरितधारा धुन्यः, पदे पदे च भयानक-भल्लूकानामम्बूकृत-सङ्कुलानाम्, मुस्ता-मूलोत्खननघुर्घुरायित-घोर-घोणानां घोणिनाम्, पङ्क-परीवर्त्तोन्मथित-कासाराणां कासरणाम्, नरमांसं बुभुक्षूणां तरक्षूणाम्, विकट-करटि-कट-विपाटन-पाटव-पूरित-संहननानां सिंहानाम्, नासाग्र-विषाणशाणन-चञ्चल-विहित-गण्डशैल-खण्डानां खड्गिनाम्, दोदुल्यमान-द्विरेफ-दल-पेपीयमान-दानधारा-धुरन्धराणां सिन्धुराणाम्, कृपा-कृपण-कृपाण-च्छिन्न-दीना-ऽध्वनीन-गल-नल-गलत्पीन-धार-शोणित - बिन्दु - वृन्द-रञ्जित-वारबाण-सारसनो-ष्णीषधारण-कलिताऽखर्व-गर्व-बर्बराणां लुण्ठकनिकराणां च सर्वथा साक्षात्कार-सम्भवः। बालावावाम् अविज्ञातोऽध्वा, भोग-समयो दुर्ग्रहाणाम्, अश्वावेव सहायौ, जन-पदशून्यमेतत् प्रान्तरम्, तत् कथं गच्छेव ? कथं धैर्यं धारयेव ? कथं वा कोङ्कणदेशं प्राप्स्याव इति विश्वसेव ?' इति सचिन्तं विनिवेदितवति मयि, स साधुरावयोः पृष्ठे हस्तं विन्यस्य ।

प्रसङ्गः—श्रीमदम्बिकादत्तव्यासविरचितस्य शिवराजविजयस्य तृतीय-निश्वासाद् गृहीतोऽयमंशः । कथनमिदं गौरसिंहस्य ।

व्याख्या—अथ = बाष्पपरिमार्जनोत्तरम्, भगवन् ! = श्रीमन् ! श्रूयते = आकर्ण्यते, सुदूरम् = बहुदूरम्, अस्मात् स्थानात् = वर्तमानस्थानात्, कोङ्कणदेशः =एतन्नामकदेशः, मध्ये = अन्तराले च, विकटा = भयावहा, अटव्यः = महा-

रण्यानि, शतशः = शतसङ्ख्यकाः, शैलश्रेणयः = पर्वतमालाः, त्वरितधाराः = सवेगप्रवाहाः, धुन्यः = नद्यः, पदे पदे च = स्थाने स्थाने च, भयानकभल्लूकानाम् = भीतिकर-ऋक्षाणाम्, अम्बूकृतसङ्कुलानाम् = सनिष्ठीव व्याप्तानाम्, मुस्तामूलोत्खननघुर्घुरायितघोरघोणानाम् = कुरुविन्दमूलोत्पाटनघुर-घुर-शब्दयुत-भयङ्करनासिकानाम्, घोणिनाम् = शूकराणाम्, पङ्कपरीवर्तोन्मथितकासाराणाम् = कीचोल्लोलविलोडितकासाराणाम्, कामराणाम् = महिषाणाम्, नरमांसबुभुक्षूणाम् = मानवमांसखादनेच्छूनाम्, तरक्षूणाम् = मृगादनानाम्, विकटकरटिकटविपाटनपाटवपूरितसंहननानाम् = उद्दामहस्तिगण्डविदारणकौशलपूरिताङ्गानाम्, सिंहानाम् = व्याघ्राणाम्, नासाग्रविषाणशाणनच्छलविहितगण्डशैलखण्डानाम् = घोणाग्रशृङ्गतेजनव्याजकृतगण्डशैलखण्डानाम्, खड्गिनाम् = गण्डकानाम्, दोदुल्यमानद्विरेफलपेपीयमानदानधाराधुरन्धराणाम् = पुनः-पुनः समुत्पतदलिवर्गातिशयास्वाद्यमानमदजलप्रवाहाग्रेसराणाम्, सिन्धुराणाम् = गजानाम्, कृपाकृपणकृपाणच्छिन्नदीनाध्वनीनगलतलगलत्पीनधारशोणितविन्दुवृन्दरञ्जितवारवाणसारसनोष्णीषधारणकलिताखर्वगर्वबर्वराणाम् = दयादरिद्रासिकृत्तदीनपथिककण्ठस्थाननिपतत्स्थूलप्रवाहशोणितपृषद्वर्गरञ्जितकञ्चुकमेखलाशिरस्त्राणधारणाहितविपुलअहङ्कारककर्शानाम्, लुण्ठकनिकराणाम् = तस्करसमूहानाम्, च, सर्वथा = सर्वप्रकारेण, साक्षात्कारसम्भवः = दर्शनसम्भवः। बालौ = वालकौ, आवाम् = गौरश्यामौ, अज्ञातोऽध्वा = न दृष्टो मार्गः, भोगसमयो दुर्ग्रहाणाम् = दुष्टखेचराणाञ्च भोगकालः, अश्वावेव = घोटकावेव, महायकौ = सयात्रौ, जनपदशून्यमेतत् प्रान्तरम् = नरपदरिक्तमेतत् प्रान्तरम्, तत्, कथम् = केन प्रकारेण, गच्छेव = यायाव, कथं, धैर्यम् = धीरत्वम्, धारयेव = ग्रहणीयाव, कथं वा, कोङ्कणदेशम् = एतन्नामकस्थानम्, प्राप्स्याव = गमिष्याव, इति, विश्वसेव = विश्वासं कुर्यास्व, इति सचिन्तम् = चिन्तयान्वितम्, विनिवेदितवति = कथयति, मयि = गौरसिंहे, सः साधुः = मन्दिराध्यक्षः, आवयोः = गौरश्यामयोः, पृष्ठे = पृष्ठप्रदेशे, हस्तम् = करम्, विन्यस्य = स्थापयित्वा। अकथयदित्यग्रिमेण सम्बन्धः।

—- समासः—शैलानां श्रेणयः शैलश्रेणयः। त्वरिता धारा यासां ताः त्वरितधाराः। भयानकानां भल्लूकानाम् अम्बूकृतैः सङ्कुलानाम्। मुस्तामूलोत्खनने घुर्घुरायिता घोरा घोणा येषां, तेषाम्। पङ्कपरीवर्त्तेन उन्मथिता कासारा यैस्तेषाम्। विकटाः करटिनः, तेषां कटस्य विपाटने यत् पाटवं, तेन पूरितं संह-

ननं येषां, तेषाम् । नासाग्रे विषाणस्य शाणनच्छलेन त्रिहिता गण्डशैलानां खण्डा यैस्तेषाम् । दोदुल्यमानानां द्विरेफाणां दलेन पेपीयमानया दानधारया, धुरन्धराणां सिन्धुराणाम् । कृपाकृपणैः कृपाणैः छिन्नेभ्यः दीनानाम् अध्वनीनानां गलतलेभ्यः गलत्पीनधारस्य शोणितस्य बिन्दुवृन्देन रञ्जितानां वारबाणसारसनोष्णीषाणां धारणेन आकलितः अखर्वः गर्वः यैस्ते च ते वर्बराः, तेषाम् । भोगस्य समयः ।

कोषः—'अम्बूकृतं सनिष्ठीवम्', 'कुरुविन्दो मेघनामा मुस्तामुस्तकमस्त्रियाम्', 'कासारः सरसी सरः', लुलायो महिषो वाहद्विषत्कासारसैरिभाः', 'तरक्षुस्तु मृगादनः'-इति सर्वत्राप्यमरः ।

(६६) 'हनूमान् सर्वं साधयिष्यति, मा स्म चिन्ता-सन्तान-वितानैरात्मानं दुःखाकुरुतम् । यथा सरलेनोपायेन कोङ्कणदेशं प्राप्स्यथस्तथा प्रभाते निर्देक्ष्यामि । साम्प्रतमित आगम्यताम्, पीयतामिदमेला-गोस्तनी-केसर-शर्करा-सम्पर्क-सुधा-विस्पर्द्धि महिषी-दुग्धम्, दासा इमे पाद-संवाहनैस्तैल-सम्मर्दैर्व्यंजन-चालनैश्च भवन्तौ विगतक्लमौ विधास्यन्ति । न किमपि भयमधुना वां हनूमतश्चरणयोः शरणमायातयोः । सुखेन सुप्यताम् । असंशयमेव प्रातरेव हनूमत्पूजन-समये सर्वं कार्यं सेत्स्यति' ।

प्रसङ्गः—साधुकथनमिदं गौरश्यामौ प्रति श्रीमदम्बिकादत्तव्यासविरचित-शिवराजविजयस्य तृतीये निश्वासे ।

व्याख्या—हनूमान्=पवनपुत्रः, सर्वम्=सकलम्, साधयिष्यति=विधास्यति, मा स्म, चिन्तासन्तानवितानैः=चिन्तनपरम्पराविस्तारैः, आत्मानम्=स्वम्, दुःखाकुरुतम्=पीडयतम्, यथा=येन, सरलोपायेन=तुच्छप्रयासेन, कोङ्कणदेशम्=निजेच्छितदेशम्, प्राप्स्यथः=गमिष्यथः, तथा=तेन प्रकारेण, प्रभातम् =प्रातः, निर्देक्ष्यामि=वक्ष्यामि, साम्प्रतम्=अधुना, इतः=अत्र, आगम्यताम् =आगच्छताम्, पीयताम्=गृह्यताम्, इदमेलागोस्तनीकेसरशर्करासम्पर्कसुधा-विस्पर्द्धि=चन्द्रबालाद्राक्षाकास्त्रीरजसितासम्मेलनामृततुल्यम्, महिषीदुग्धम्= सैरिभीपयः, दासाः=सेवकाः, इमे=समीपवर्तिनः, पादसंवाहनैः=चरणसेवनैः, तैलसम्मर्दैः=स्नेहलेपनैः, व्यजनचालनैश्च=तालवृन्तसञ्चालनैश्च, भवन्तौ= श्रीमन्तौ, विगतक्लमौ=समाप्तपीडौ, विधास्यन्ति=करिष्यन्ति, न=नहि, किमपि =किञ्चिदपि, भयम्=भीतिः, अधुना=सम्प्रति, वाम्=युवाम्, हनूमतश्च-रणयोः=मारुतिपादयोः, शरणमायातयोः=शरणागतयोः, सुखेन=आनन्देन,

सुप्यताम् = शय्यताम्, असंशयमेव = निश्चितमेव, प्रातरेव = प्रभाते एव, हनूमत्पूजनसमये = मारुतिसमर्चाकाले, सर्वम् = सकलम्, कार्यम् = विधेयम्, सेत्स्यति = सम्पन्नं भविष्यति ।

समासः—चिन्तायाः सन्तानस्य वितानैः चिन्तासन्तानवितानैः । एला, गोस्तनी, केसरं, शर्करा, एतासां सम्पर्केण सुधाविस्पर्द्धि एलागोस्तनीकेसरशर्करासम्पर्कसुधाविस्पर्द्धिः । पादयोः संवाहनैः पादसंवाहनैः । तैलानां सम्मर्दैः तैलसम्मर्दैः । व्यजनस्य चालनैः व्यजनचालनैः । हनूमतः पूजनस्य समये हनुमत्पूजनसमये ।

चतुर्थो निश्वासः

(६७) मासोऽयमाषाढः, अस्ति च सायं समयः, अस्तं जिगमिषुर्भगवान् भास्करः सिन्दूर-द्रव-स्नातानामिव वरुण-दिगवलम्बिनामरुण-वारिवाहानामभ्यन्तरं प्रविष्टः । कलविङ्काश्चाटकैरुतैः परिपूर्णेषु नीडेषु प्रतिनिवर्तन्ते । वनानि प्रतिक्षणमधिकाधिकां श्यामतां कलयन्ति । अथाऽकस्मात् परितो मेघ-माला-पर्वत-श्रेणीव प्रादुरभूत् । क्षणं सूक्ष्मविस्तारा, परतः प्रकटित-शिखरि-शिखर-विडम्बना, अथ दर्शित-दीर्घ-शुण्ड-मण्डित-दिगन्त-दन्तावल-भयानकाकारा, ततः पारस्परिक-संश्लेषविहित-महान्धकारा च समस्तं गगनतलं पर्यच्छदीत् ।

उत्तरम्—सन्दर्भः—श्रीमदम्बिकादत्तव्यासविरचितशिवराजविजयस्य चतुर्थनिश्वासाद् गृहीतोऽयमंशः । गौरपथप्रत्यूहप्रदर्शनधियाऽऽषाढं चित्रयति महाकविः ।

व्याख्या—आषाढः=शुचिः, अयम् = पुरो वर्तमानः मासः, अस्ति = वर्तते, च, सायं समयः = सन्ध्याकालः, अस्तम् = अस्ताचलम्, जिगमिषुः = गन्तुमिच्छुः, भगवान् = महामहिमशाली, भास्करः = सूर्यः, सिन्दूरद्रवस्नातानामिव = नागोद्भवरसकृतस्नानानामिव, वरुणदिगवलम्बिनाम् = पश्चिमाशाऽऽश्रितानाम्, अरुणवारिवाहानाम् = रक्तमेघानाम्, अभ्यन्तरम् = अन्तः, प्रविष्टः = गतः, कलविङ्काः = चटकाः, चाटकैरुतैः = निजापत्यरोदनैः, परिपूर्णेषु = युक्तेषु, नीडेषु = कुलायेषु, प्रतिनिवर्तन्ते = परावर्तन्ते, वनानि = विपिनानि, प्रतिक्षणम् = प्रतिपलम्, अधिकाधिकाम् = परिवर्धमानाम्, श्यामताम् = कृष्णताम्, कलयन्ति = धारयन्ति । अथाऽकस्मात् = सहसा, परितः = सर्वतः, मेघमाला = घनपङ्क्तिः, पर्वतश्रेणीव = गिरिपङ्क्तिरिव, प्रादुरभूत्=समजायत । क्षणम् = पलम्, सूक्ष्मविस्तारा = लघुप्रसारा, परतः=अपरतः, प्रकटितशिखरिशिखरविडम्बना = प्रदर्शितपर्वत-

शिखरविडम्बना, अथ, दर्शितदीर्घशुण्डमण्डितदिगन्तदन्तावलभयानकाकारा = प्रकटितलम्बायमानकरभूषितदिग्गजभयावहाकारा, ततः=तत्पश्चात्, पारस्परिक-संश्लेपविहितमहान्धकारा = इतरेतरमिलनोत्पादितान्धतमसा, च, समस्तम् = सकलम्, गगनतलम् = आकाशमण्डलम्, पर्यच्छदीत् = व्याप्नोत् ।

समासः—सिन्दूरस्य द्रवेण स्नातानामिव सिन्दूरद्रवस्नातानामिव । वरुणस्य दिशम् अवलम्बिनां वरुणदिगवलम्बिनाम् । अरुणानां वारिवाहानाम् अरुणवारि-वाहानाम् । सूक्ष्मः विस्तारः यस्याः सा सूक्ष्मविस्तारा । प्रकटितं शिखरिशिख-राणां विडम्बना यया सा प्रकटितशिखरिशिखरविडम्बना । दर्शितः दीर्घेण शुण्डेन मण्डितस्य दिगन्तदन्तावलस्य भयानकः आकारः यया सा दर्शितदीर्घ-शुण्डमण्डितदिगन्तदन्तावलभयानकाकारा । पारस्परिकेण संश्लेषेण विहितः महान्धकारः यया सा पारस्परिकसंश्लेपविहितमहान्धकारा ।

विशेषः—(१) आषाढक्षं संवलिता पूर्णमासी यस्मिन् मासे सः आषाढः । (२) चाटकैरः—'चटकायाः एरक्' इत्यपत्ये प्रत्ययः । (३) 'दन्ती दन्ता-वलो हस्ती' इत्यमरः ।

(६८) अस्मिन् समये एकः षोडशवर्षदेशीयो गौरो युवा हयेन पर्वतश्रेणी-रुपर्युपरि गच्छति स्म । एष सुघटित-दृढ-शरीरः, श्यामश्यामैर्गुच्छ-गुच्छैः कुञ्चित-कुञ्चितैः कच-कलापैः कमनीय-कपोलपालिः, दूरागमनायास-वशेन सूक्ष्म-मौक्तिक-पटलेनेव स्वेद-बिन्दु-व्रजेन समाच्छादित-ललाट कपोल-नासाग्रोत्तरोष्ठः, प्रसन्न-वद-नाम्भोज-प्रदर्शित-दृढ-सिद्धान्त-महोत्साहः, राजत-सूत्र-शिल्पकृत-बहुल-चाकचक्य-वक्र-हरितोष्णीष-शोभितः, हरितेनैव च कञ्चुकेन प्रकटीकृत-व्यूढगूढचरताकार्यः, कोऽपि शिववीरस्य विश्वासपात्रं सिंहदुर्गात् तस्यैव पत्रमादाय तोरणदुर्गं प्रयाति ।

सन्दर्भः—गौरसिंहस्य तोरणदुर्गं प्रयाणं वर्णयति श्रीमदम्बिकादत्तव्यासः शिवराजविजयस्य चतुर्थे निश्वासेऽत्र ।

व्याख्या—अस्मिन् समये = वार्पुकमेघाच्छन्नसायङ्कालिकसमये, एकः=अन्य-तमः, षोडशवर्षदेशीयः = षोडशवर्षकल्पः, गौरः = गोधूमवर्णः, युवा = युवकः, हयेन = घोटकेन, पर्वतश्रेणीरुपर्युपरि = गिरिशिखरमुपर्युपरि, गच्छति = याति स्म, एषः = अयम्, सुघटितदृढशरीरः = सुसंहितपुष्टाङ्गः, श्यामश्यामैः = अति-शयश्यामैः, गुच्छगुच्छैः = गुच्छबहुलैः, कुञ्चितकुञ्चितैः = ग्रथिलैः, कचकलापैः = केशसमूहैः, कमनीयकपोलपालि = मनोहरगण्डस्थलः, दूरागमनायासवशेन = प्रकृष्टगमनकष्टवशेन, सूक्ष्ममौक्तिकपटलेनेव = लघुमुक्तासमूहेनेव, स्वेदबिन्दुव्रजेन

=घर्मजलकणसमूहेन, समाच्छादितललाटकपोलनासाग्रोत्तरोष्ठः=व्याप्तालिकगण्ड-स्थलनासाग्रोत्तरोष्ठः, प्रसन्नवदनाम्भोजप्रदर्शितदृढसिद्धान्तमहोत्साहः=विकसित-मुखकमलप्रदर्शितदृढकर्तव्यपरायणतामहाहर्षः, राजतसूत्रशिल्पकृतबहुलचाकचक्य-वक्रहरितोष्णीषशोभितः = रौप्यतन्तुशिल्पकृतप्रचुरचाकचक्यवक्रहरिद्वर्णशिरो-वेष्टनः, हरितेनैव=हरिद्वर्णेनैव, च, कञ्चुकेन=अङ्गरक्षकेन, प्रकटीकृत-व्यूढगूढचरताकार्यः=स्पष्टीकृतस्वीकृतगुप्तचरकृत्यः, कोऽपि, शिववीरस्य=शिवाजी इत्याख्यस्य नृपतेः, विश्वासपात्रम्=हृदयाभिन्नम्, सिंहदुर्गात्=एत-न्नामकदुर्गात्, तस्यैव=शिववीरस्यैव, पत्रमादाय=लेखं गृहीत्वा, तोरणदुर्गम्=एतन्नामकदुर्गम्, प्रयाति=गच्छति।

समासः——सुघटितं दृढं शरीरं यस्यासौ सुघटितदृढशरीरः। कचानां कलापैः कचकलापैः। कमनीया कपोलानां पालिः यस्यासौ कमनीयकपोलपालिः। दूरे आगमने यो आयासः, तस्य वशेन दूरागमनाऽऽयासवशेन। स्वेदानां बिन्दोः व्रजेन स्वेदबिन्दुव्रजेन। समाच्छादितं ललाटकपोलनासाग्रोत्तरोष्ठं यस्य सः समाच्छादितललाटकपोलनासाग्रोत्तरोष्ठः। प्रसन्नेन वदनाम्भोजेन प्रदर्शितः दृढः सिद्धान्तमहोत्साहः येन सः प्रसन्नवदनाम्भोजप्रदर्शितदृढसिद्धान्तमहोत्साहः। राजतसूत्रस्य शिल्पेन कृतं बहुलं चाकचक्यं यस्यैवम्भूतं वक्रं हरितम् उष्णीषं, तेन शोभितः राजतसूत्रशिल्पकृतबहुलचाकचक्यवक्रहरितोष्णीषशोभितः। प्रकटीकृतं व्यूढं गूढचरताकार्यं येन सः प्रकटीकृतव्यूढगूढचरताकार्यः।

कोषः—'समूहे पटलं नना', 'घर्मो निदाघः स्वेदः स्यात्' इत्युभयत्राप्यमरः। परिकरालङ्कारश्च।

(६९) अथ किञ्चित् स्रोतस्समुल्लङ्घमानोऽस्य तुरङ्गः कस्यापि दोधूयमान-तरोः शाखया तथाऽभिहतो यथोच्छलन् भूमौ पपात, सादिनं चैकतः समपीपतत्। किन्तु तत्क्षणादेव सादी समुत्थितो वाजिनो वल्गां गृहीत्वा, सचुचुत्कारं ग्रीवां पृष्ठं चाऽऽस्फोटच, अज्ञासीद् यदश्वः स्वेदैः स्नातोऽस्तीति। तच्चक्षुषी विस्फार्य, पार्श्वस्थ पलाशिनं निपुणं निरीक्ष्य, तच्छाखायामेव कानिचिन्निजवस्तून्यासज्य, दक्षिणकर-धृत-रश्मिरश्वं शनैः शनैः परिभ्रमयितुमारेभे। अश्वश्च फेनान् पातयन् कन्धरामुद्धूनयन् हेषा-रवंश्चिर-परिश्रमं प्रकटयन् प्रस्यन्दजल-सिक्त-भूभागः, समुत्सृष्टपुरीषः, शुष्क-स्वेदः, मुहूर्तार्द्धेनैव विस्मृत-परिश्रमः, सगति-स्तम्भं खुराग्रैर्भूमिमुत्खनन्, कर्णावुत्तम्भयन्, लाङ्गूलं लोलयन्, सादिनो दक्षिणदेशे पृष्ठं निकटयन्, पुनरेनं वोढुं परतो धावितुं च समीहां समसूसुचत्।

प्रसङ्गः—श्रीमदम्बिकादत्तव्यासविरचितस्य शिवराजविजयस्य चतुर्थ-श्वासाद् गृहीतेऽस्मिन् खण्डे गौरसिंहघोटकस्य स्वभावान् वर्णयति ।

व्याख्या—अथ = चलनोत्तरम्, किञ्चित्, स्रोतसम्=जलनिर्गमनम्, उल्लङ्घ-न्तः = गच्छन् वारम्, अस्य=गौरसिंहस्य, तुरङ्गः = घोटकः, कस्यापि, दोधूय-मानतरोः = कम्पमानवृक्षस्य, शाखया = स्कन्धेन, तथा, अभिहतः = ताडितः, प्रोच्छलन्=उद्गच्छन्, भूमौ=धरायाम्, पपात=अपपत्, सादिनम् = घोटकारो-हम्, चैकतः = एकस्यां दिशि, समपीपतत् = पातयामास । किन्तु = परन्तु, तत्-क्षणादेव = तत्कालादेव, सादी = अश्वारोही, समुत्थितः = कृतोत्थानः, वाजिनः = घोटकस्य, वल्गाम् = रज्जुम्, गृहीत्वा = समादाय, सचुचुत्कारम् = चु-चु इत्याकारकशब्दयुतम्, ग्रीवाम् = कन्धराम्, पृष्ठम् = पृष्ठभागश्च, आस्फोटय = आस्फाल्य, अज्ञासीद् = अजानात्, यद् अश्वः = घोटकः, स्वेदैः = घर्मबिन्दुभिः, स्नातोऽस्ति = कृतस्नानोऽस्ति, तत् चक्षुषी = घोटकनेत्रे, विस्फार्य = उन्मील्य, पार्श्वस्य = निकटस्य, पलाशिनम् = वृक्षम्, निपुणम् = सुष्ठु, निरीक्ष्य = दृष्ट्वा, तच्छाखायामेव = वृक्षस्कन्धे एव, कानिचित्, निजवस्तूनि = स्ववस्तुजातानि, आसज्य = लम्बयित्वा, दक्षिणकरधृतरश्मिः = वामेतरहस्तगृहीतवल्गः, अश्वम् = घोटकम्, शनैः शनैः = मन्दं मन्दम्, परिभ्रमयितुम् = परिचालयितुम्, आरेभे = समारब्धवान्, अश्वश्च = घोटकश्च, फेनान् = डिण्डीरान्, पातयन् = निःसारयन्, कन्धराम् = ग्रीवाम्, उद्धूनयन् = कम्पयन्, हेषारवैः = घोटक-ध्वनिभिः, चिरपरिश्रमम् = विपुलश्रमम्, प्रकटयन्=प्रकाशयन्, प्रस्यन्दजलसिक्त-भूभागः = च्युतवारिक्लिन्नधराभागः, समुत्सृष्टपुरीषः = त्यक्तपुरीषः, शुष्कस्वेदः = समाप्तघर्मबिन्दुः, मुहूर्तार्द्धेनैव=क्षणार्द्धेनैव, विस्मृतपरिश्रमः = व्यपगतक्लमः, सगतिस्तम्भम् = सचलावरोधम्, खुराग्रैः = पादाक्रान्तैः, भूमिम् = पृथिवीम्, उत्खनन् = उच्छालयन्, कर्णावुत्तम्भयन् = श्रोत्रौ उत्तोलयन्, लाङ्गूलम्=पुच्छम्, लोलयन् = चालयन्, सादिनः = अश्वारोहस्य, दक्षिणदिशि = वामेतराशायाम्, पृष्ठम् = पृष्ठभागम्, निकटयन् = समीपयन्, पुनरेनम् = भूयस्तम्, वोढुम् = वहन-कर्तुम्, पुरतो धावितुम् = अग्रे गन्तुं च, समीहाम् = इच्छाम्, समसूसुचत् = सूचयामास ।

समासः—दोधूयमानस्य तरोः । निजानि वस्तूनि निजवस्तूनि । दक्षिणे करेण धृतः रश्मिः येन सः दक्षिणकरधृतरश्मिः । प्रस्यन्दस्य जलेन सिक्तः भूभागः येन सः प्रस्यन्दजलसिक्तभूभागः ।

कोषः—'पलाशी द्रुद्रुमागमाः', 'लाङ्गूलं पुच्छशैफयोः' इत्युभयत्राप्यमरः।

(७०) तावदकस्मात् पूर्वस्यामतिरक्ताऽतिप्रलम्बाऽतिभयानका सकडकडा-शब्दं सौदामिनी समदेदीप्यत, तच्चमत्कार-चकितं चाश्वमेष यावत् स्थिरयति, तावत् स तडतडाशब्दं पूग-स्थूलैर्बिन्दुभिर्वर्षितुमारब्धः मघवा, परं राम-कार्यार्थं प्रतिष्ठमानेन मारुतिनेव न सह्यते कार्यहानिः शिववीर-चरेण। तत्क्षणमेवाऽसौ पुनः सज्जीभूय समुत्प्लुत्य घोटकपृष्ठमारुरोह। घोटकश्च पुनस्त्वरितगत्या प्रचलितः। यदा यदा विद्युद् विद्योतते; तदा तदा पन्था अवलोक्यते, तदनुसन्धानेनैव वाहोऽयं शिलातलानि परिक्राम्यन् लताप्रतानानि त्यजन् स्रोतांस्युल्लङ्घमानः गर्तांश्च परि-जहदुच्चचाल। तावद् दूरत एवाऽऽलोक्यत तोरण-दुर्ग-दीपः, इतश्च चरस्यैतस्य दृढप्रतिज्ञतां निर्भीकतां सोत्साहतां स्वामिकार्य-साधन-सत्य-सङ्कल्पतां च परीक्ष्येव प्रशशाम वृष्टिः। अम्लबलेन दुग्धमिव च खण्डशोऽभून्मेघमाला; ददृशे च पूर्व-स्यां कलानाथः।

उत्तरम्—प्रसङ्गः—श्रीमदम्बिकादत्तव्यासविरचितशिवराजविजयस्य चतुर्थ-निश्वासाद् गृहीतेऽस्मिन् खण्डे गौरसिंहमार्गे, वृष्टिवर्णनं करोति कविः।

व्याख्या—तावत् = एतस्मिन्नन्तरे, अकस्मात् = सहसा, पूर्वस्याम्=प्राच्याम्, अतिरक्ता = रुधिरवर्णबहुला, अतिप्रलम्बा = वहुलम्बमाना, अतिभयानका = वहुभीतिजनिका, सकडकडाशब्दम् = कडकडाशब्दयुक्तम्, सौदामिनी = चपला, समदेदीप्यत = अत्यन्तं चमत्कारमजीजनत्। तच्चमत्कारचकितम् = तडिच्चाक-चक्यविस्मितम्, चाश्वम् = घोटकञ्च, एषः = गौरसिंहः, यावत्, स्थिरयति = स्थिरी करोति, तावत् = तस्मिन् काले, सतडतडाशब्दम् = तड-तड-शब्दयुक्तम्, पूगस्थूलैः = क्रमुकदीर्घैः, बिन्दुभिः = पृषद्भिः, वर्षितुम्=वर्षा भवितुम्, आरब्धः = समारब्धः, मघवा = पाकशासनः, परम् = किन्तु, रामकार्यार्थम् = राघवोद्यो-गार्थम्, प्रतिष्ठमानेन = गच्छता, मारुतिनेव = हनुमतेव, न, सह्यते = सोढुं शक्यते, कार्यहानिः = उद्योगविनाशः, शिववीरचरेण = शिववीरस्पशेन। तत्-क्षणमेवासौ = तत्कालमेवाऽयम्, पुनः = भूयः, सज्जीभूय = तल्लीनो भूत्वा, समुत्प्लुत्य = कूर्दनं कृत्वा, घोटकपृष्ठमारुरोह = हयपृष्ठभागमारुरोह, घोटकश्च = हयश्च, पुनः=भूयः, त्वरितगत्या = वेगयुक्तगमनेन, प्रचलितः=प्रस्थितः। यदा यदा, विद्युत् विद्योतते = चपला दीव्यते, तदा तदा = तत्र तत्र, पन्थाः = मार्गः, अवलोक्यते = दृश्यते, तदनुसन्धानेनैव = तदन्वेषणेनैव, वाहोऽयम् = एषः सादी, शिलातलानि = पाषाणखण्डानि, परिक्राम्यन् = प्रदक्षिणयन्, लतानाम् = वल्ली-

...म्, प्रतानानि = विस्ताराणि, त्यजन् = मुञ्चन्, स्रोतांसि = जलप्रवाहानि, ...ल्लङ्घमानः = उद्गच्छन्, गर्तांश्च = परिखांश्च, परिजहत् = परित्यजत्, उच्च-...ाल = उज्जगाम। तावत् = तस्मिन् काले, दूरतः = सुदूरात्, एवाऽऽलोक्यत = ...ष्टः, तोरणदुर्गदीपः = एतन्नामकदुर्गदीपकः, इतश्च = अत्र च, चरस्यैतस्य = ...शस्यास्य, दृढप्रतिज्ञताम् = स्थिरनिश्चयताम्, निर्भीकताम् = भयराहित्यम्, ...ोत्साहताम् = उत्साहसम्पन्नताम्, स्वामिकार्यसाधनसत्यसङ्कल्पताम् = शिववीर-...ादेशपालनसत्यदृढतां च, परीक्ष्य = परीक्षणं विधाय, इव, प्रशशाम = शान्ता, ...ष्टिः = वर्षा। अम्लबलेन = अम्लशक्त्या, दुग्धमिव च=पय इव च, खण्डशः= छिन्ना भिन्ना, अभूत् = अभवत्, मेघमाला = घनमाला, ददृशे=दृष्टश्च, पूर्वस्याम् =प्राच्याम्, कलानाथः = यामिनीपतिः।

समासः—कडकडाशब्देन सह सकडकडाशब्दम्। तस्य चमत्कारेण चकितं ...च्चमत्कारचकितम्। तडतडाशब्देन सहितं सतडतडाशब्दम्। रामस्य कार्यार्थं ...ामकार्यार्थम्। घोटकस्य पृष्ठं घोटकपृष्ठम्। लतानां प्रतानानि लताप्रतानानि। ...ोरणदुर्गस्य दीपः तोरणदुर्गदीपः। स्वामिकार्यस्य साधने सत्यसङ्कल्पताम्।

(७१) अथ क्षणेनैव पार्वत-नदी-वेग इव निर्जगाम झञ्झावातोत्पातोऽपि। ...तो नूतन-वारिधारा-क्षालन-प्रकटित-परम-हारित्यान-परस्कोटि-कीर-पटल-परी-...ानामिव समवालोक्यत लोचन-रोचिका शोभा पलाशिनाम्। सादी च चञ्चच्च-...द्रचमत्कारेण द्विगुणितोत्साहः 'मा भूद् द्वार-रोधो मद्गमनात् पूर्वमेव' इति ...त्वर-सत्वरः, झिल्लीरव-मिश्रित-कवच-शिञ्जितः, वार्ष-वारि-व्रज-विधूत-स्वेद-बिन्दु-सन्दोहः, साधुवाद-संवर्द्धित-हेषमाण-हयोत्साहः सपद्येव तोरण-दुर्गयामिक-...ादचार-परिमर्द्दितायां भुवि समाजगाम।

प्रसङ्गः—गौरसिंहस्य तोरणदुर्गद्वारप्राप्तिं वर्णयति कविरत्र श्रीमदम्बिका-दत्तव्यासः शिवराजविजयस्य चतुर्थे निश्वासे।

व्याख्या—अथ, क्षणेनैव = पलेनैव, पार्वतनदीवेग इव = गिरिजपुष्करिणी-प्रवाह इव, निर्जगाम = शशाम, झञ्झावातोत्पातोऽपि = सवृष्टिवातोत्पातोऽपि। ततः = तत्पश्चात्, नूतनवारिधाराक्षालनप्रकटितपरमहारित्यानपरस्कोटिकीर-पटलपरीतानाम्=नवजलप्रवाहधौतस्पष्टपरमहरिद्वर्णतापरस्कोटिशुकसमूहव्याप्ता-नामिव, समवालोक्यत = समदृश्यत, लोचनरोचिका = नयनानन्दिका, शोभा = श्रीः, पलाशिनाम् = वृक्षाणाम्। सादी च=वाहश्च, चञ्चच्चन्द्रचमत्कारेण=शोभा-यमानशशिसौन्दर्येण, द्विगुणितोत्साहः=द्विगुणकृतोत्साहशक्तिः, मा भूद् द्वाररोधः

=द्वानिरोधः न स्यात्, मद्गमनात्=गौरसिंहगमनात्, पूर्वमेव=प्रागेव, इति सत्वरसत्वरः=अतिसत्वरः, झिल्लीरवमिश्रितकवचशिञ्जितः=भृङ्गारीशब्दयुक्त-तनुत्राणध्वनिः, वार्षवारिव्रजविधूतस्वेदबिन्दुमन्दोहः=वृष्टिजजलजालधौतघर्म-पृषत्समुदायः, साधुवादसंवर्धितहेषमाणहयोत्साहः=धन्यवादवृद्धाश्वध्वनिघोट-कोत्साहः, सपद्येव=झटित्येव, तोरणदुर्गयामिकपादचारपरिमर्दितायाम्=तोरण-दुर्गद्वारपालचरणचारमर्दितायाम्, भुवि=धरायाम्, समाजगाम=समाययौ।

समासः—पार्वतनद्याः वेगः पार्वतनदीवेगः। नूतनया वारिधारया क्षालनेन प्रकटितं परमं हारित्यं यैस्तेषां नूतनवारिधाराक्षालनप्रकटितपरमहारित्यानाम्। परस्कोटीनां कीराणां पटलैः परीतानां परस्कोटिकीरपटलपरीतानाम्। चञ्चत् चन्द्रः चमत्कारेण चञ्चच्चन्द्रचमत्कारेण। द्विगुणितः उत्साहः यस्य सः द्विगुणितो-त्साहः। झिल्याः रवेण मिश्रितः कवचशिञ्जितं यस्य सः झिल्लीरवमिश्रित-कवचशिञ्जितः। साधुवादेन संवर्द्धितः हेषमाणस्य हयस्य उत्साहः यस्य सः साधुवादसंवर्द्धितहयोत्साहः। तोरणदुर्गयामिकस्य पादचारेण परिमर्दितायां तोरणदुर्गयामिकपादचारपरिमर्दितायाम्।

(७२) अथ 'को भवान्? कुतो भवान्?' इति यामिकेन पृष्टः, दत्तनिज-परिचयः, द्वारपालेनाऽपि–'साधु! साधु! महता परिश्रमेण समायातोऽसि, उच्चै-र्निःश्वसिति तेऽश्वः, स्विन्नानि तव गात्राणि, आर्द्राणि तव वस्त्राणि, धन्योऽसि, तथाऽपि खेदं नाऽऽवहसि, समये समागतोऽसि, अवेक्षते तवैव पन्थानं दुर्गाधीशः। प्रविश्यताम्, अश्व उन्मुच्यताम्, सत्वरमेव च तेनाऽपि साक्षात्कारो विधीयताम्' इति सादरमालप्यमानो दुर्गं प्रविवेश।

अश्वमुन्मुच्य परस्सहस्र-पतग-पटल-कलकल्लोलित्रस्य सुदूरं विततकाण्ड-प्रकाण्डस्य चैकस्य पनास-वृक्षस्य शाखायामाबध्य अविश्रान्त एव दुर्गाध्यक्ष-समीपमगमत्।

प्रसङ्गः—श्रीमदम्बिकादत्तव्यासविरचितशिवराजविजयस्य चतुर्थे निश्वासे यामिकगौरसिंहालापप्रसङ्गोऽत्र प्रपञ्चितः।

व्याख्या—अथ, को भवान्!=किन्नामा श्रीमान्! कुतः=कस्मात् स्थानात्, भवान्!=श्रीमान्! इति, यामिकेन=प्रहरिणा, पृष्टः=जिज्ञासितः, दत्तनिज-परिचयः=कथितस्वसंस्तवः, द्वारपालेनाऽपि=द्वाःस्थेनापि, साधु साधु=शोभ-नम्, शोभनम्, महता परिश्रमेण=प्रभूतेन क्लेशेन, समायातोऽसि=सम्प्राप्तोऽसि,

उच्चैः = उन्नतैः, निःश्वसिति = प्रश्वसिति, ते = श्रीमतः, अश्वः = घोटकः, स्विन्नानि = स्वेदक्लिन्नानि, तव = भवतः, गात्राणि = शरीराणि, आर्द्राणि = क्लिन्नानि, तव = भवतः, वस्त्राणि = वासांसि, धन्योऽसि = साधुवादार्होऽसि, तथाऽपि = पुनरपि, खेदम् = क्लेशम्, नावहसि = न अवधारयसि, समये = काले, समागतोऽसि = सम्प्राप्तोऽसि, अवेक्षते = पश्यति, तवैव = श्रीमत एव, पन्थानम् = मार्गम्, दुर्गाधीशः = दुर्गपतिः । प्रविश्यताम् = आभ्यन्तरं गम्यताम्, अश्वः = घोटकः, उन्मुच्यताम् = परित्यज्यताम्, सत्वरमेव=शीघ्रमेव च, तेनापि = दुर्गाध्यक्षेणापि, साक्षात्कारः = चक्षुर्मेलः, विधीयताम् = क्रियताम्, इति, सादरम् = सप्रश्रयम्, आलपमानः = वार्तां क्रियमाणः, दुर्गं, प्रविवेश = प्रविष्टो बभूव । अश्वम् = घोटकम्, उन्मुच्य = परित्यज्य, परस्सहस्रपतगपटलकलकलोन्निद्रस्य = सहस्राधिकपक्षिवर्गकलकलोन्निद्रस्य, सुदूरम् = बहुदूरम्, विततकाण्डप्रकाण्डस्य = विस्तृतशाखप्रशाखस्य, चैकस्य, पनसवृक्षस्य = कण्टकितरोः, शाखायाम् = स्कन्धमार्गम्, आवध्य = नियम्य, अविश्रान्त एव = अनपनीतश्रम एव, दुर्गाध्यक्षसमीपम् = दुर्गाधीशपार्श्वम्, अगमत् = जगाम ।

समासः—परस्सहस्राणां पतगानां पटलस्य कलकलेन उन्निद्रस्य परस्सहस्रपतगपटलकलकलोन्निद्रस्य । वितताः काण्डाः प्रकाण्डाश्च यस्य, तस्य विततकाण्डप्रकाण्डस्य । दुर्गाध्यक्षस्य समीपं दुर्गाध्यक्षसमीपम् ।

द्वासुपर्णा

(१) ग्रामात् ग्रामं पर्यटन् विद्यार्थी सुदामा बहुषु वनेषु विचरन् शत-क्रोशयात्रां पद्भ्यां समाप्योज्जयिनीमुपागमत्। तत्र स प्रत्युद्यातेन शीतलमन्द-सुगन्धवायुना निषेवितं स्नेहपरायणमृगाणां समुदाचारैश्च प्रशान्तमाश्रमपदं दूरत एवाभिज्ञातवान्। आश्रमपरिसरेऽतिथीनां कृते तत्र सुखशाद्वलैः आसनम्, रमणीयलतापुष्पवृष्ट्या स्नानम्, नानादिग्देशात् समागतपक्षिणां सूनृताभिश्च स्वागतं सम्पादितम्।

तत्र रमणीयवनभूभागे होमधूमः पताका इवाचार्यवसतिं विज्ञापयति स्म। वन्योपहारैः सुदामाविलम्बमेव नवतामन्वभवत्। तस्मिन् पावनप्रदेशे न केवलं शरीरेण, मनसापि स निर्मलतां जगाम।

सन्दर्भः—अयमनुच्छेदः श्रीरामजी-उपाध्यायेन प्रणीतस्य 'द्वासुपर्णा नामकस्य ग्रन्थस्य पूर्वस्माद् भागादुद्धृतोऽस्ति।

प्रसङ्गः—अस्मिन्ननुच्छेदे लेखको वक्ति यद् विद्यामधिगन्तुं सुदामा शत-क्रोशस्य यात्रां पद्भ्यामेव परिसमाप्योज्जयिन्यास्सविधेऽरण्ये आचार्यस्य सान्दीपनेराश्रमं जगाम, यत्र हरिणानां पुरत आगमनरूपं समुदाचारं, वृक्षाणां पुष्प-वृष्टिं, शीतलं सौगन्ध्यमयं च वायुं निषेव्य सः स्वास्थ्यमनुबभूव। महर्षे-राश्रमे होमधूमो गृहपताकेव शोभते स्म।

व्याख्या—विद्यार्थी = विद्यां लब्धुकामः, सुदामा = एतन्नामको विप्रबटुः, ग्रामाद् ग्रामं पर्यटन् = नैकेषु ग्रामेषु भ्रमणं कुर्वन्, वनेषु = अरण्येषु, विचरन् = विचरणं कुर्वन्, शतक्रोशयात्राम् = शतक्रोशव्यापिनीं यात्राम्, पद्भ्यां समाप्य = पदातिरेवं परिसमाप्य, उज्जयिनीमुपागमत् = उज्जयिनीनाम्न्याः नगर्याः सविधे आजगाम। तत्र = उज्जयिनीनगर्याः सविधे, प्रत्युद्यातेन = पुरतः समागतेन, शीतलमन्दसुगन्धवायुना = शैत्यमान्द्यसौगन्ध्यसमन्वितेनानिलेन, निषेवितम् = संसेवितम्, स्नेहपरायणमृगाणाम् = स्नेहिलानां हरिणानाम्, समुदाचारैश्च = सुव्यवहारैश्च, प्रशान्तम् = शान्तिपूर्णम्, आश्रमपदम् = आश्रमम्, दूरत एव अभिज्ञातवान् = अवगतवान्। आश्रमपरिसरे = आश्रमस्य सविधे, अतिथीनाम् = आगन्तुकानाम्, कृते तत्र = आश्रमे, सुखशाद्वलैः = मृदुतृणैः,

निर्मितम्, आसनमुपवेशनाय, रमणीयलतापुष्पवृष्ट्या = मनोज्ञलतासुमनवृष्ट्या, स्नानम्, नानादिग्देशात् = अनेकदिशाभ्यः, समागतपक्षिणाम् = आगतानां खगानाम्, सूनृताभिश्च = मनोहरकलरवैश्च, स्वागतम् = समादरणम्, सम्पादितम् = सञ्जातम् ।

तत्र = आश्रमपरिसरे, रमणीयवनभूभागे = मनोज्ञारण्यभूमौ, होमधूमः = हवनधूमः, पताका = ध्वजा इव, आचार्यवसतिम् = गुरोः सन्दीपनेः निवासस्थानम्, विज्ञापयति स्म = बोधयति स्म । वन्योपहारैः = अरण्योपहारैः, सुदामा = एतन्नामा वटुः, अविलम्बमेव = शीघ्रमेव, नवतामन्वभवत् = स्वास्थ्यमिवानुबभूव । तस्मिन् पावनप्रदेशे = पवित्रस्थले, न केवलं, शरीरेण = कायेन, मनसाऽपि = अन्तःकरणेनाऽपि, सः = सुदामा, निर्मलतां जगाम = स्वच्छो बभूव ।

(२) आश्रमस्य समीपं मृगैरनुयाताः, वनान्तरादुपावृत्ताः, समित्कुशफलहारिणश्च ब्रह्मचारिणः प्रथमं सुदामानमपश्यन् । तस्य रूपं शीलं वृत्तिं च निरीक्ष्य 'स्ववर्गीयोऽयम्' इति ते विभावयन्ति स्म । ते झटिति एव तस्य कमण्डलुपेटिकादिकं गृहीत्वा तं मुक्तभारं कृत्वा मार्गश्रमं विनोदयितुं द्वारस्थपर्णशालां नीतवन्तः । स्नानाचमनयोरनन्तरं सोऽभ्यागताचारानुरूपं मुनिभोजनं फलमूलादिकं गृहीतवान् ।

सायंकाले सब्रह्मचारिभिः सुदामा सान्दीपनेर्महर्षेः सार्वजनिकप्रवचनकक्षायां यथाविधानं प्रथमं समुपस्थापितः । महर्षेः पुरतो प्रणत एव विनम्रः सुदामा निवेदितवान्—ब्रह्मचर्यमागामिति । महर्षिः पितृभावेनावदत्—को नामासीति ? सुदामाऽस्मि काश्यपगोत्रोत्पन्नो ब्रह्मकामः । आचार्यः तस्य हस्तं गृह्णाति स्म । सोऽभाषत—इन्द्रस्य ब्रह्मचारी असि । अग्निः आचार्यः तव । अहं तवाचार्यः । स सुदामानं ताभ्यां देवताभ्यां परिददाति स्म । स तं भूतेभ्यः, प्रजापतये सवित्रे च परिददाति स्म । पुनरवदत्—एते वै श्रेष्ठे वर्षिष्ठे देवते । एताभ्यामेवैनं श्रेष्ठाभ्यां वर्षिष्ठाभ्यां देवताभ्यां परिददाति स्म । पश्चात् स विद्यार्थिनमद्भ्यः, ओषधीभ्यः, द्यावापृथिवीभ्याम्, विश्वेभ्यो भूतेभ्यश्च परिददाति स्म ।

सन्दर्भः—अयमनुच्छेदः अनेकेषां ग्रन्थानां प्रणेतुः श्रीरामजी-उपाध्यायस्य 'द्वासुपर्णा' इति गद्यकाव्यस्य पूर्वार्द्धात् सङ्गृहीतो विद्यते ।

प्रसङ्गः—अस्मिन्ननुच्छेदे गद्यकारो वर्णयति यद् वनान्तरात् प्रत्यावर्तमाना ब्रह्मचारिणो यदा तत्रोपविष्टं सुदामानमवलोकयामासुः, तदा तं बहुधा सत्कृत्य

आश्रमद्वारिस्थितां पर्णशालामानयामासुः। स्नानादिकृत्यं समाप्य स्वस्थः सुदामा मुन्यशनं तत्र गृहाण। सायाह्ने सुदामा आचार्यस्य सार्वजनिककक्षायां सब्रह्मचारिभिः प्राविशत् यत्राचार्यः सान्दीपनिः तं सविधि संस्कृत्य छात्रत्वेनानुजग्राह इति।

व्याख्या—आश्रमस्य समीपं=सन्निकटं, मृगैः=हरिणैः, अनुयाताः=अनुगताः, वनान्तरात्=अपरस्माद् वनात्, उपावृत्ताः=प्रत्यागताः, समित्कुशफलहारिणश्च=समिधादर्भफलानयन्तः, ब्रह्मचारिणः=विद्यार्थिनः, प्रथमम्=सर्वप्रथमम्, सुदामानम्=सुदामानामकं विद्यार्थिनम्, अपश्यन्=पश्यन्ति स्म। तस्य=सुदाम्नः, रूपम्=वर्णम्, शीलम्=आचरणम्, वृत्तिम्=व्यवहारं च, निरीक्ष्य=विलोक्य, स्ववर्गीयोऽयम्=निजवर्ग्योऽयम्, इति=अनेन प्रकारेण, ते=ब्रह्मचारिणः, विभावयन्ति स्म=विचारयामासुः। ते=ब्रह्मचारिणः, झटिति=शीघ्रमेव, तस्य=सुदाम्नः, कमण्डलुपेटिकादिकम्=जलपात्रमञ्जूषादिकम्, गृहीत्वा=आदाय, तम्=सुदामानम्, मुक्तभारम्=भारेण रहितम्, कृत्वा=सम्पाद्य, मार्गश्रमम्=अध्वजन्यं खेदम्, विनोदयितुम्=अपाकर्तुम्, द्वारस्थपर्णशालाम्=द्वारिविद्यमानं पर्णकुटीरम्, नीतवन्तः=आनयामासुः। स्नानाचमनयोरनन्तरम्=मज्जनजलपानानन्तरम्, सः=सुदामा, अभ्यागतानुरूपम्=अतिथिस्वरूपानुकूलम्, मुनिभोजनम्=मुन्यशनम्, फलमूलादिकम्, गृहीतवान्=स्वीकृतवान्।

सायंकाले=सायाह्ने, सब्रह्मचारिभिः=सहचारिभिः, सुदामा, सान्दीपनेः =तस्याश्रमस्याचार्यस्य महर्षेः, सार्वजनिकप्रवचनकक्षायाम्, यथाविधानम्=विधिनियमानुसारम्, प्रथमम्=सर्वप्रथमम्, समुपस्थापितः=उपस्थितो बभूव। महर्षेः=आचार्यस्य सान्दीपनेः, पुरतः=अग्रे, प्रणतः=प्रणामं कुर्वन् एव, विनम्रः=विनयावनतः, सुदामा निवेदितवान्=प्रावोचत्—ब्रह्मचर्यमागामिति =ब्रह्मचर्यपालनकर्तुंकामोऽहमित्यर्थः। महर्षिः=सान्दीपनिः, पितृभावेन=पितुःस्नेहपूर्णनान्तःकरणेन, अवदत्=प्रावोचत्। 'को नामासीति'=ते नाम किमिति। ब्रह्मकामः=विद्याध्ययनकामनान्वितः, काश्यपगोत्रोत्पन्नः=काश्यपान्वये समुद्भूतः, सुदामाऽस्मि=सुदामानामकोऽस्मि। आचार्यः=सान्दीपनिः, तस्य=सुदाम्नः, हस्तम्=करम्, गृह्णाति स्म। सोऽभाषत=आचार्योऽवादीत्। इन्द्रस्य ब्रह्मचारी असि—इन्द्रस्य=देवराजस्य, ब्रह्मचारी असि=छात्रोऽसि। तव=सुदाम्नः, आचार्यः=गुरुः, अग्निः=अनलोऽस्तीति शेषः। अहम्=सान्दीपनिः, तव=

सुदाम्नः, आचार्यः = गुरुः । सः = आचार्यः, सुदामानम् = एतन्नामकं छात्रम्, ताभ्याम् = उपर्युक्ताभ्याम् इन्द्राग्नीभ्याम्, देवताभ्याम्, परिददाति स्म=प्रादात् । सः = आचार्यः, तम् = सुदामानम्, भूतेभ्यः, प्रजापतये = ब्रह्मणे, सवित्रे = सूर्याय च, परिददाति स्म = प्रादात् । आचार्यः, पुनः = उपर्युक्ताभ्यो देवताभ्यः समर्पणानन्तरम्, अवदत् = अवादीत्, यत्—एते = उपर्युक्ते, वै = निश्चयेन, श्रेष्ठे, वर्षिष्ठे, देवते = देवौ स्तः । एताभ्याम् = उपर्युक्ताभ्याम् इन्द्राग्नीभ्यामेव, श्रेष्ठाभ्याम् वर्षिष्ठाभ्याम्, देवताभ्याम् = देवाभ्याम्, परिददाति स्म = प्रादात् । पश्चात् = तदनन्तरम्, सः = आचार्यः, विद्यार्थिनम् = छात्रं सुदामानम्, अद्भ्यः = जलेभ्यः, ओषधीभ्यः, द्यावापृथिवीभ्याम् = द्युलोकपृथिवीलोकाधिष्ठातृदेवताभ्याम्, विश्वेभ्यः = सर्वेभ्यः, भूतेभ्यश्च, परिददाति स्म = प्रादात् ।

(३) आचार्यः पुनरभाषत—'ब्रह्मचारी असि । अपोऽशानेत्यमृतं वा । कर्म कुरु । वीर्यं वै कर्म । वीर्यं कुरु । समिधमाधेहि । समित्स्वात्मानं तेजसा ब्रह्मवर्चसेन । मा सुषुप्थाः । मा मृथाः । तदेनमुभयतोऽमृतेन परिगृह्णाति स्म । अथैनं सावित्रीमन्वाह ।' अनेन विधिना सुदाम्नो ज्ञानशरीरस्य जननाय संवर्धनाय च सान्दीपनेः पितृत्वं समुपकल्पितम् ।

सन्दर्भः—पूर्ववत् ।

प्रसङ्गः—अस्मिन्ननुच्छेदे गद्यकारो वर्णयति यत्—सुदाम्नः संस्कारं सम्यक् सम्पाद्य महर्षिः सान्दीपनिः सुदाम्ने गायत्रीमुपदिदेश इति ।

व्याख्या—आचार्यः=सान्दीपनिः, पुनः=देवताभ्यः प्रदानानन्तरम्, अवदत्= उपदेशरूपेण प्रावोचत्—'ब्रह्मचारी असि, त्वमिति शेषः । आपोऽशान=आचमनं कुरु इत्यर्थः । अमृतं वा = जलमेवामृतम् । कर्म कुरु—कर्मणाम् = स्ववर्णाश्रमानुसारेणानुष्ठानम्, कुरु = सम्पादयेत्यर्थः । वै = निश्चयेन, कर्म = कर्मणामनुष्ठानम्, वीर्यम् = बलम् । वीर्यं कुरु = बलकर्मानुष्ठानानुरूपं बलं सम्पादयेत्यर्थः । समिधामाधेहि = समिदानयनं कुरु इत्यर्थः । तेजसा = ओजसा, ब्रह्मवर्चसेन = ब्रह्मचर्येण, समित्सु, आत्मानम् = सन्निधापयेत्यर्थः । मा सुषुप्थाः = प्रमादवशात् दिने शयनं मा कृथाः इत्यर्थः । मा मृथाः=मा मरणं कार्षीः इत्यर्थः । तदेनम् = अनेन प्रकारेण, एनम् = छात्रं सुदामानम्, उभयतः = उभयप्रकारेण, अमृतेन, परिगृह्णाति स्म = परिग्रहणमकार्षीत् । अथ = तदनन्तरम्, एनम् = छात्रं सुदामानम्, सावित्रीम् = गायत्रीम्, अन्वाह = उपदिदेश । अनेन विधिना =

अनेन प्रकारेण, सुदाम्नः, ज्ञानशरीरस्य, जननाय = उत्पादनाय, संवर्धनाय = वृद्धिं कर्तुं च, सान्दीपनेः = आचार्यस्य, पितृत्वं समुपकल्पितम् ।

(४) तस्मिन्नेव दिने मथुरातः कृष्णबलरामौ सान्दीपनेः संस्थाने समागतौ । तौ उभौ क्षत्रकामौ ब्रह्मकामौ च बभूवतुः । तयोरुपनयनं महर्षिणा सुदाम्नः अनन्तरं कृतम् । आचार्यो नवान् ब्रह्मचारिणः समादिष्टवान्—'यूयमेकस्मिन् दिने समुपनीताः, सब्रह्मचारिणः । युष्माभिः सदैव सह वर्तितव्यं सर्वेषु नियोजनीयेषु । युष्मासु सुदाम्नो ज्येष्ठत्वं विहितं मया, तस्य ब्रह्मकामत्वात्' इति ।

सन्दर्भः—पूर्ववत् ।

प्रसङ्गः—यस्मिन् दिने सुदाम्न उपनयनं व्याधात् आचार्यः, तस्मिन्नेव दिने मथुरातो वसुदेवदेवक्योः पुत्रौ श्रीकृष्णबलरामौ सान्दीपनेः आश्रमे समागच्छताम् । आचार्यः तयोरपि उपनयनं विधाय सर्वानादिशत्, यत् यूयं सर्वे सब्रह्मचारिणः सर्वेषु कर्मसु युष्माभिः सहैव वर्तितव्यम् । युष्मासु श्रेष्ठोऽस्त्ययं सुदामा इति ।

व्याख्या—यस्मिन् दिने आचार्यः सुदाम्ने सावित्रीमुपादिशत्, तस्मिन्नेव दिने = अहनि, मथुरातः = मथुरानामकात् नगरात्, कृष्णबलरामौ = एतन्नामकौ देवकीवसुदेवयोः पुत्रौ, सान्दीपनेः = उज्जयिन्याः आचार्यस्य, संस्थाने = गुरुकुले, समागतौ = आगतवन्तौ । तौ = पूर्वोक्तौ, उभौ = श्रीकृष्णबलरामौ, क्षत्रकामौ = बलकामौ ब्रह्मकामौ च, बभूवतुः = अभूताम् । तयोरुपनयनम् = श्रीकृष्णबलरामयोरुपनयनसंस्कारम्, महर्षिणा = सान्दीपनिना आचार्येण, सुदाम्नः = सुदामानामकस्य, अनन्तरम् = पश्चात्, कृतम् = सम्पादितम् । आचार्यः = सान्दीपनिः, नवान् = नूतनान्, ब्रह्मचारिणः = विद्यार्थिनः, समादिष्टवान् = आदिदेश, यूयम् = भवन्तः, एकस्मिन् दिने = समाने अहनि, समुपनीताः = कृतोपनयनसंस्काराः, सब्रह्मचारिणः स्थेति शेषः । युष्माभिः = भवद्भिः, सदैव = सर्वदा, सह = साकम्, वर्तितव्यम् = स्थातव्यम्, व्यवहरणीयं वा, सर्वेषु = समस्तेषु, नियोजनीयेषु = अनुष्ठेयकर्मसु । युष्मासु = भवत्सु, सुदाम्नः = एतन्नामकस्य विद्यार्थिनः, ज्येष्ठत्वम् = श्रेष्ठत्वम्, मया = भवतामाचार्येण, विहितम् = सम्पादितम्, तस्य = सुदाम्नः, ब्रह्मकामत्वात् = ब्रह्मैकप्राप्तिलक्ष्यत्वात्, इति ।

(५) आचार्यः प्रवचनं प्रारब्धवान्—ओ३म् सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्वि नावधीतमस्तु। मा विद्विषावहै।

सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम्। उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत।

सन्दर्भः—पूर्ववत्।

प्रसङ्गः—आचार्यः सान्दीपनिः श्रीकृष्णबलरामयोः सुदाम्नश्चोपनयनं विधाय, साकमेव सर्वदा वर्तितुं तानादिश्य तेभ्यः सहवर्तित्वपरं श्रेष्ठजनैः ज्ञानादानपरं च प्रवचनमकार्षीदिति।

व्याख्या—आचार्यः = सान्दीपनिः, प्रवचनम् = स्वोपदेशम्, प्रारब्धवान् = प्रारम्भयामास। ओम् = ओमिति ब्रह्मणो नाम। तस्य सर्वेषां शुभकर्मणामादावुच्चारणं कर्तव्यमिति शास्त्रवशादत्र प्रवचनादौ ओमिति व्याहरणं गुरोः। सह नाववतु = हे परमात्मन्! आवयोः शिष्याचार्ययोः सहैव रक्षणं कुरु। सह नौ भुनक्तु = आवयोः शिष्याचार्ययोः साकमेव भोजनं कर्तुं प्रवर्तय। सह वीर्यं करवावहै = साकमेव आवां बलं सम्पादयेव। तेजस्विनावधीतमस्तु = आवयोः अधीतं = कृताध्ययनं शास्त्रं, तेजस्वि = तेजस्सम्पन्नं भवेत्, मा विद्विषावहै = आवयोः कदापि विद्वेषो मा भूदिति।

सङ्गच्छध्यम् = साकमेव गच्छत, संवदध्वम् = सहैव समानमेव वदत। वः = युष्माकम्, मनांसि = चेतांसि, जानताम् = ज्ञानसम्पन्नानि भूयासुः। उत्तिष्ठत=उद्युङ्क्ताः भवत। जाग्रत = जागृता भवत। वरान् = श्रेष्ठान् तत्त्वज्ञान् पुरुषान्, प्राप्य = लब्ध्वा, निबोधत = तत्त्वज्ञानस्य सम्पादनं कुरुत इति।

(६) कथं व्यवहर्तव्यम्? 'ईश्वरः सर्वत्र सदैव वर्तते' इति मनसि कृत्वा सर्वेषां चराचराणां कल्याणं विधातव्यम्। स भगवान् सर्वेषां पिता। भगवान् सर्वेषामात्मा एव। कस्यचित् प्राणिनोऽनादरस्तु भगवतोऽनादर एव। सर्वैः प्राणिभिः सह तादात्म्यमनुभवनीयम्। युष्माकं मनसि कदापि सफलत्वे हर्षः, विफलत्वे विषादो वा मा भवतु। कामना हि सर्वगुणापहारिणी। सकामस्य मनोबलम्, इन्द्रियबलम्, तेजः, सत्यं च सर्वाणि विनश्यन्ति। शतहस्त समाहर सहस्रहस्त सङ्किर। केवलाघो भवति केवलादी। लोककल्याणवृत्तिर्हि भगवतः श्रेष्ठाराधना। सत्यमेव जयते।

सन्दर्भः—पूर्ववत्।

प्रसङ्गः—अस्मिन्ननुच्छेदे आचार्यः सान्दीपनिः स्वच्छात्रान् सर्वत्र सर्वकालेषु परमात्मनो व्याप्तिमुपदेशः, लोककल्याणभावनया व्यवहरणस्यैव परमात्मनः सर्वोत्तमोपसनारूपेणोपदिशति ।

व्याख्या—कथम् = केन प्रकारेण, व्यवहर्तव्यम् = व्यवहारः करणीयः, इत्यस्मिन् विषये प्रावोचदाचार्यः—ईश्वरः = परमेश्वरः, सर्वत्र = सर्वेषु स्थलेषु, सर्वदा = सर्वेषु कालेषु च वर्तते, इति=अनेन प्रकारेण, मनसि=चेतसि, कृत्वा = निश्चित्य, सर्वेषाम् = सकलानाम्, चराचराणाम् = स्थावरजङ्गमानां जीवानाम्, कल्याणम् = उपकारम्, विधातव्यम्=सम्पादनीयम् । सः = सर्वदेशकालव्यापकः, भगवान् = परमात्मा, सर्वेषाम् = सकलानां जीवानाम्, पिता = संरक्षको वर्तते । भगवान् = परमात्मा, सर्वेषाम् = सकलानां जीवानाम्, आत्मैव = अन्तरात्मा विद्यते कस्यचित् = एकस्यापि, प्राणिनः = जीवस्य, अनादरः = अवमानना तु, भगवतः = परमात्मनः, अनादर एव = अवमाननैव, भवतीति शेषः । सर्वैः = सम्पूर्णैः, प्राणिभिः = जीवैः, सह = साकम्, तादात्म्यम् = अभेदसम्बन्धरूपमैक्यम्, अनुभवनीयम् = अनुभवकरणीयम् । युष्माकम् = भवताम्, मनसि = हृदये, कदापि = कस्मिंश्चिदपि काले, सफलत्वे=साफल्याधिगमे, हर्षः = प्रमोदः, विफलत्वे = वैफल्ये, विषादः = अवसादो वा, मा भवेत् = नहि सञ्जायते । कामना हि = अभिकाङ्क्षैव, सर्वगुणापहारिणी = सकलगुणहारकर्त्री विद्यते । सकामस्य = कामकामिनः पुरुषस्य, मनोबलम् = दार्ढ्यम् । इन्द्रियबलम् = इन्द्रियाणां शक्तिः, तेजः, सत्यम् = सत्यवादिता च, सर्वाणि = अखिलानीमानि तत्त्वानि, विनश्यन्ति = नाशमुपयान्ति, शतहस्त समाहर, सहस्रहस्त सङ्किर = सङ्ग्रहापेक्षया वितरणकर्मणि अत्यधिकमौदार्यं वर्तितव्यम् । केवलादी = यः एकाकी भुङ्क्ते, सः केवलाघी = केवलपापकर्ता भवति । लोककल्याणवृत्तिः = जगतः समेषां जनानां कल्याणस्य कामनापूर्वकाचरणमेव, भगवतः=परमात्मनः, श्रेष्ठाराधना = सर्वोत्तमोपासना वर्तते ।

(७) ब्राह्ममुहूर्ते उत्थाय इमे विद्यार्थिनो गुरोः सविधे सन्ध्याविधिं सम्पादितवन्तः । तथा हि—'ओ३म् भूः, भुवः, स्वः । तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥' यथाकालं महर्षिणास्य मन्त्रस्य व्याख्या कृता—'विद्यार्थिनः ! न केवलं स्वग्रामः, जनपदः, देशो वा स्वकीय इति मन्तव्यम्, अपि तु सर्वोऽयं भूलोको युष्माकं भोगाय, ज्ञानाय रक्षणाय च वर्तते, युष्मत् संरक्षणम्, संवर्धनं चार्हति । तद्यथा पूर्वैः अनूचानैः समर्थितम्—वसुधैव

कुटुम्बकमिति। भुव एव वायुलोकः। सोऽपि भूलोकवत् युष्माकं स्वकीय एव वर्तते। सूर्यादिग्रहनक्षत्रैर्मण्डितः स्वर्लोकोऽपि युष्माकमानन्दाय विद्यते। एतेषां सर्वेषां लोकानां कल्याणं विदधतो यूयं तेभ्यो लोकेभ्यः परमानन्दस्य अभ्युदयस्य च प्राप्तिं कुरुत' इति मे मनीषा। अयं मे सन्देशः। एष विधिर्युष्माकं श्रेयसे।

सन्दर्भः—पूर्ववत्।

प्रसङ्गः—अस्मिन्ननुच्छेदे आचार्यः सान्दीपनिः स्वच्छात्रेभ्यः सुदामा-श्रीकृष्णबलरामेभ्यः सन्ध्योपासनानन्तरं गायत्रीमन्त्रस्य लोकव्यवहारोपयोगिनीं व्याख्यां चकार इति वक्ति लेखकः।

व्याख्या—ब्राह्ममुहूर्ते=महति प्रत्यूषे, उत्थाय=निद्रां परित्यज्य, इमे=सुदामा श्रीकृष्णः बलरामश्च, विद्यार्थिनः=छात्राः, गुरोः=आचार्यस्य, सविधे=सन्निकटे, सन्ध्याविधिम्=सन्ध्योपासनम्, सम्पादितवन्तः=अकार्षुः। तथाहि=तद्यथा—ओम्=इति सर्वेषाम् मन्त्राणामादौ अन्ते चोच्चारणीयत्वेन विहितं ब्रह्मणो नाम, भूः=भूर्लोकः, भुवः=भुवर्लोकः, स्वः=स्वर्लोकः, इमास्तिस्रो व्याहृतयः गायत्रीमन्त्रस्यादावुच्चार्यमाणाः। सवितुः देवस्य=सूर्यदेवस्य, तत्=शास्त्रेषु सर्वान्तर्यामितया प्रसिद्धं, भर्गः=तेजस्स्वरूपं परमात्मानं, धीमहि=ध्यायेमहि, यः=परमात्मा, नः=अस्माकम्, धियः=बुद्धेरित्यर्थः, प्रचोदयात्=प्रेरणं कुर्यात्। इति गायत्रीमन्त्रस्य, महर्षिणा=सान्दीपनिना, यथाकालम्=समयानुसारम्, व्याख्या कृता=सम्पादिता। विद्यार्थिनः=भोः छात्राः, न=नहि, केवलम्=मात्रम्, स्वग्रामः=स्वनगरम्, जनपदः=मण्डलम्, देशो वा=राष्ट्रं वा, स्वकीयः=नैजः, इति=अनेन प्रकारेण, मन्तव्यम्=अवगन्तव्यम्, अपितु, अयं सर्वः=सम्पूर्णः, भूलोकः=पृथिवीलोकः, युष्माकम्=भवताम्, भोगाय=उपभोगाय, ज्ञानाय=बोधाय, रक्षणाय च वर्तते। च=किञ्च, अखिलोऽयं लोकः, युष्मत्=भवद्भ्यः, संरक्षणम्, संवर्धनम्=वृद्धिं च, अर्हति। तद्यथा=तदित्थम्, पूर्वैः=प्राचीनैः, अनूचानैः=वैदिकैः, समर्थितम्=प्रतिपादितम्। वसुधैव=अखिला पृथिव्येव, कुटुम्बकम्=अस्माकं परिवारो वर्तते। भुव एव वायुलोकः=वायुलोक एव भुवः शब्देनाभिधीयते इत्यर्थः। सोऽपि=वायुलोकोऽपि, भूलोकवत्=पृथिवीलोकवत्, युष्माकम्=भवताम्, स्वकीयः=नैजो वर्तते। सूर्यादिग्रहनक्षत्रैः—सूर्यादिभिः ग्रहैः, नक्षत्रैः=तारकैश्च, मण्डितः=समलङ्कृतः, स्वर्लोकोऽपि=देवलोकोऽपि, युष्माकम्=भवताम्, आनन्दाय

=प्रमोदानुभवाय, वर्तते। एतेषाम् = उपर्युक्तानाम्, सर्वेषाम् = अखिलानाम्, लोकानाम्, कल्याणम् = मङ्गलम्, विदधतः = कुर्वतः, यूयम् = भवन्तः, तेभ्यः = उपर्युक्तेभ्यः लोकेभ्यः, परमानन्दस्य = सर्वोत्कृष्टानन्दस्य, अभ्युदयस्य = कल्याणस्य, च, प्राप्तिम् = उपलब्धिम्, कुरुत=सम्पादयत। इति मनीषा। अयम् = एषः, एव मे = मम, सन्देशः, एषः = अयमेव, विधिः = विधानः, युष्माकम्, श्रेयसे = कल्याणाय वर्तते।

(८) सान्दीपनेः आश्रमे विद्यार्थिनां दैनन्दिनं कृत्यं तेषां सम्यक् विकासाय नियोजितम्। तद्यथा—प्रतिदिनं विद्यार्थिनः स्वकुटीरस्य समीपस्थक्षेत्रभागे शाकानां पुष्पफलदानां लतानां वृक्षकाणां च संवर्धनं कृतवन्तः। आलवालानां सेचनकाले जलपानाय समागताः सस्नेहं परितर्पिताश्च पशु-पक्षिणः तेषां नेत्राभितृप्तये बभूवुः। तैः विद्यार्थिभिः सजीवानां पादपानां पशु-पक्षिणां च स्वभावालोचनं तत्र कृतम्। तान् प्रति सहानुभूतिर्दयाभावना च सर्वेषां संवर्धनस्य काम्यया समुत्पन्ना। न केवलं स्वकीयावासस्य स्वच्छीकरणं तैः सम्पादितम्, अपि तु मार्गादीनां निर्मलत्वं सुगमत्वं च विहितम्। प्रातःकाले ज्येष्ठविद्यार्थिनामभिवन्दनं तपोवृद्धानां महर्षीणां पादस्पर्शनं च तैः कृतम्। गुरुगृहस्यावश्यकसामग्रीणां समित्काष्ठजलादीनामाहरणमपि कर्तव्यमासीत्। एतेषु सर्वेषु कृत्येषु सामर्थ्यशालिनौ अपि कृष्णबलरामौ सुदाम्नो नायकत्वे प्रहृष्टमनसौ साह्यविधायिनौ बभूवतुः।

सन्दर्भः—पूर्ववत्।

प्रसङ्गः—अस्मिन्ननुच्छेदे लेखको वक्ति, यत् सुदाम्नैव साकं श्रीकृष्णबलरामौ संस्कृत्याचार्यः तान् तेषु तेषु कार्येषु नियोजयामास। ते पादपानां लतानां च सेचनम्, स्वावासस्य मार्गस्य च स्वच्छीकरणम्, स्ववर्षीयसां सब्रह्मचारिणां तपस्विनाञ्च पादवन्दनं गुरोर्गृहस्य चावश्यकं कर्म विदधुः।

व्याख्या—सान्दीपनेः = आचार्यस्य, आश्रमे = गुरुकुले, विद्यार्थिनाम् = छात्राणाम्, दैनन्दिनम् = आह्निकम्, कृत्यम् = अनुष्ठानम्, तेषाम् = उपर्युक्तानां त्रयाणाम्, छात्राणाम्, सम्यक् = पूर्णरूपेण, विकासाय = वृद्धये, नियोजितम् = अयोजितम्। तद्यथा = तथाहि, प्रतिदिनम् = अनुदिनम्, विद्यार्थिनः = छात्राः, स्वकुटीरस्य = स्वपर्णशालायाः, समीपस्थक्षेत्रभागे = सन्निकटस्थकेदारप्रान्ते, शाकानाम्, पुष्पफलदानां = कुसुमफलप्रदात्रीणाम्, लतानाम् = गुल्मानाम्, वृक्षकाणाम् = लघुपादपानां च। संवर्धनम् = सम्यग्रूपेणावलोकनम्, कृतवन्तः =

प्रकार्युः । आलवालानाम् = वृक्षमूले कृतखातानाम्, सेचनकाले = सेचनस्य समये, जलपानाय = जलं पातुम्, समागताः = आगताः, सस्नेहम् = प्रेमपूर्वकम्, परितर्पिताश्च = पूर्णरूपेण सन्तोषिताश्च, पशुपक्षिणश्च, तेषाम् = उपर्युक्तच्छात्राणाम्, नेत्राभितृप्तये = दर्शनजन्यानन्दावाप्तये, बभूवुः = अभूवन् । तैः = उपर्युक्तैः त्रिभिः, विद्यार्थिभिः = छात्रैः, सजीवानाम् = जीवितानाम्, पादपानाम् = वृक्षाणाम्, पशुपक्षिणाम् = मृगखगानाञ्च, स्वभावालोचनम् = स्वभावस्य पर्यालोचनम्, तत्र = आश्रमपदे, कृतम् । च = पुनः । तान् = छात्रान् प्रति, सर्वेषाम् = जनानाम्, सहानुभूतिः, दयाभावना = कृपाभावना, संवर्द्धनस्य = संवृद्धेः, काम्यया = कामनया, समुत्पन्ना = समुपजाता । तैः = छात्रैः, केवलम् = मात्रम्, स्वकीयावासस्य = निजनिवासस्थलस्य, स्वच्छीकरणम् = नैर्मल्यम्, न = नहि, सम्पादितम्, अपितु = किन्तु, तैः = छात्रैः, मार्गादीनामपि, निर्मलत्वम् = स्वच्छीकरणम्, सुभगत्वम् = निष्कण्टकीकरणमपि, विहितम् = सम्पादितम् । च = किञ्च, तैः = छात्रैः, प्रातःकाले = प्रत्युषसि, ज्येष्ठविद्यार्थिनाम् = श्रेष्ठानां छात्राणाम्, अभिवन्दनम् = नमस्करणम्, तपोवृद्धानाम्=तपस्विनाम्, महर्षीणाम् = महताम् ऋषीणाम्, पादस्पर्शनम् = चरणस्पर्शनञ्च, तैः = छात्रैः, कृतम् । गुरुगृहस्य = आचार्यसान्दीपनिगृहस्य, आवश्यकसामग्रीणाम्, समित्काष्ठजलादीनाम् = समिधाकाष्ठपानीयादीनाम्, आहरणम् = आनयनम्, अपि कर्तव्यम् = करणीयम्, आसीत् । एतेषु = उपर्युक्तेषु, सर्वेषु = सकलेषु, कृत्येषु = कर्मसु, सामर्थ्यशालिनौ = सामर्थ्ययुक्तावपि, कृष्णबलरामौ = देवकीवसुदेवपुत्रौ, सुदाम्नः = विप्रवटोः, नायकत्वे = निर्देशने, प्रहृष्टमनसौ = प्रसन्नमानसौ, साह्यविधायिनौ = साहाय्यकारिणौ, बभूवतुः = अभूताम् ।

(९) यथापर्वावमिमे त्रयो विद्यार्थिनः शिप्रायास्तटे गोचारणार्थं गतवन्तः । तत्र सुललामवृक्षलतादीनां पुष्पसमृद्धौ प्रफुल्लमनसस्ते आत्मानुगमनेन गोप्रसावने तत्परा बभूवुः । तथा हि—वनमाला गुम्फित्वा ते गवामलङ्करणं कृतवन्तः । 'कस्य गौः सर्वाधिकं समलङ्कृता दृश्यते' इति स्पर्धा आसीत् । प्रायशो वनमाली कृष्णोऽस्यां स्पर्धायां प्रथमो बभूव । तृणानामास्वादवद्भिः कवलैर्गवां सर्वाधिकसम्भरणे सुदामाऽद्वितीयोऽभवत् । बलरामः कण्डूयनैर्दंशनिवारणैश्च गवां सर्वोत्तमां सेवामकरोत् । तेषां व्रतमासीत्—यदा गौश्चलति, तदा चलितव्यम् । यदा सा तिष्ठति, तदा स्थातव्यम् । यदा सा जलं पिबति, तदा जलं पातव्यमिति ।

एकदा गोचारणाय गन्तुकामास्ते महर्षिपत्न्या समादिष्टाः---इन्धनमानेतव्यमिति। तस्मिन् दिने अपराह्णे सर्वासां गवां रक्षणार्थं बलरामो नियुक्तः। कृष्णः सुदामा च शिप्रायाः परं पारमिन्धनचयनार्थं गतवन्तौ।

सन्दर्भः—पूर्ववत्।

प्रसङ्गः—अस्मिन्ननुच्छेदे लेखको वर्णयति यत्—सुदामश्रीकृष्णबलरामाः नैकधा गोः सेवामकार्षुः। गवां सेवां कुर्वाणास्ते त्रयो गोषु तास्ताः क्रियाः कुर्वत्सु तासां सर्वथाऽनुसरणमकार्षुरिति।

व्याख्या---इमे त्रयः = सुदामश्रीकृष्णबलरामाः, विद्यार्थिनः-छात्राः, यथापर्यायम् = क्रमानुरोधेन, शिप्रायाः=शिप्रानाम्न्याः नद्यास्तटे=कूले, गोचारणार्थम् = गोचारणं कर्म सम्पादयितुम्, गतवन्तः = अगुः। तत्र = शिप्रायाः तटे, सुललामवृक्षलतादीनाम्=अत्यन्तमनोज्ञपादपगुल्मादीनाम्, पुष्पसमृद्धौ = पुष्पाणां समवाये, प्रफुल्लमनसः = प्रसन्नान्तःकरणाः, ते = त्रयश्छात्राः, आत्मानुगमनेन =स्वेनानुगमनकर्मणा, गोप्रसादने = गवां प्रसन्नकरणे, तत्पराः = सन्नद्धाः, बभूवुः = अभूवन्। तथाहि = तद्यथा, वनमाला = वनपुष्पैः कृता माला, गुम्फित्वा गुम्फनं कृत्वा, ते = त्रयश्छात्राः, गवाम् अलङ्करणं कृतवन्तः = सम्पादितवन्तः। अस्मासु कस्य = छात्रस्य, गौः, सर्वाधिकम् = सर्वापेक्षया अधिकम्। समलङ्कृता = सुशोभमाना, दृश्यते = अवलोक्यते, इति = अनेन प्रकारेण, स्पर्धा आसीत्। अस्यां स्पर्धायाम् = गवामलङ्करणरूपायां स्पर्धायाम्, प्रायशः = प्रायेण, वनमाली = वनमालाधारणकर्ता, कृष्णः = श्रीकृष्णः, प्रायशः = प्रायेण, प्रथमः = सर्वातिशायी, बभूव=अभूत्। तृणानाम् = घासानाम्, आस्वादवद्भिः = आस्वादयुक्तैः, कवलैः = ग्रासैः, गवाम्, सर्वाधिकम् = स्वेतरसमस्तापेक्षयाधिकम्, सम्भरणे = पालनकर्मणि, सुदामा, अद्वितीयः = श्रेष्ठः। अभवत् = अभूत्। बलरामः = श्रीकृष्णाग्रजः, कण्डूयनैः = खर्जुकर्मभिः, दंशनिवारणैः = मक्षिकापनोदनकर्मभिः, गवां सर्वोत्तमाम् = सर्वापेक्षया श्लाघनीयाम्, सेवाम् = सपर्याम्, अकरोत् = सम्पादयामास। तेषाम् = त्रयाणाम्, व्रतम् = नियमः, आसीत्—यदा = यस्मिन् समये, गौः चलति = व्रजति, तदा = तस्मिन् समये, चलितव्यम् = गन्तव्यम्। यदा = यस्मिन् समये, सा = गौः, तिष्ठति = स्थिरा भवति, तदा = तस्मिन् समये, स्थातव्यम्। यदा = यस्मिन् काले, सा = गौः, जलं पिबति = जलपानं करोति, तदा = तस्मिन् समये, पातव्यम् = जलपानं करणीयमिति।

(१०) प्रचुरमात्रायामिन्धनस्य सञ्चयं कृत्वा यदा तौ प्रत्यावर्तितुं समुद्यतौ, तदा घोरवृष्टिर्बभूव । तत्र विद्युल्लतिकानां पतनेन शुष्का वृक्षा दग्धाः । झञ्झावातैर्बहवो वृक्षा धराशायिनो बभूवुः । तद्भयङ्करं विध्वंसमालोच्य पतद्वृक्षेभ्य आत्मरक्षणार्थं कृष्णसुदामानौ क्वचित् महावृक्षतलं समाश्रितवन्तौ । पतितानां वृक्षाणां शाखाभिः इतस्ततो मार्गावरोधः समजायत । महता प्रयासेनापि वनात् तयोर्निर्गमनं न सम्भावितम् ।

सर्वा गावो बलरामरक्षिता अपि झञ्झावातैः खिन्ना वृष्टिभिः उद्वेजिताश्च आश्रमं प्रति धावन्ति स्म । बलरामोऽपि कृष्णसुदाम्नोः प्रतीक्षामकृत्वैव आश्रमपदमाजगाम ।

सन्दर्भः—पूर्ववत् ।

प्रसङ्गः—गुरुपत्न्या इन्धनानयनायादिष्टे श्रीकृष्णबलरामसुदामसु, बलरामोपरि गवां संरक्षणभारं कृत्वा गत्वा शिप्रायाः परंपारं वने पुष्कलमिन्धनसञ्चयं कृत्वा यदा निर्वर्तितुमुद्यतौ सञ्जातौ तदा महावृष्टिः प्रारब्धाऽभूत्, वृक्षाः पतिता अभूवन्, बलरामोऽपि गोभिस्सह आश्रममाजगाम । कृत्वाऽपि बहुप्रयासं श्रीकृष्णसुदामानौ वनान्निर्गन्तुमक्षमौ कस्यचन महावृक्षस्याधोभागं सेवितवन्तौ ।

व्याख्या—प्रचुरमात्रायाम् = पुष्कलमात्रायाम्, इन्धनस्य = समिधः, सञ्चयं कृत्वा = एकत्रीकरं कृत्वा, यदा = यस्मिन् समये, तौ = श्रीकृष्ण सुदामानौ, प्रत्यावर्तितुम् = प्रत्यागन्तुम्, समुद्यतौ=उद्युक्तौ अभूताम्, तदा = तस्मिन् काले, घोरवृष्टिः = अत्यधिका वृष्टिः, बभूव । तत्र=तस्मिन् समये, विद्युल्लतिकानाम् = चपलानाम्, पतनेन = पातेन, शुष्काः=नीरसाः, वृक्षाः = पादपाः, दग्धाः = ज्वलिता अभूवन् । झञ्झावातैः=वर्षामिश्रिततीव्रवायुभिः, बहवः = अनेके, वृक्षाः पादपाः, धराशायिनः=उत्खातिताः, बभूवुः=अभूवन् । तत्=सञ्जातम्, भयङ्करम् = भयप्रदम्, विध्वंसम् = विनाशम्, आलोच्य = विचार्य, पतद्वृक्षेभ्यः = पतमानपादपेभ्यः, आत्मरक्षणार्थम् = स्वजीवनरक्षायै, कृष्णसुदामानौ, क्वचित् = कस्मिंश्चित् स्थाने, महावृक्षतलम्=विशालवृक्षस्याधोभागम्, समाश्रितवन्तौ= सेवितवन्तौ । पतितानाम् = उत्पाटितानाम्, वृक्षाणाम् = पादपानाम्, शाखाभिः, इतस्ततः = यत्र तत्र, मार्गावरोधः = पथरोधः, समजायत = अभूत् । महता = अत्यधिकेन, प्रयासेनापि = कृतेन प्रयत्नेनापि, वनात् = अरण्यात्, तयोः = श्रीकृष्णसुदाम्नोः, निर्गमनम् = निस्सरणम्, न सम्भावितम्—नहि सम्भवोऽभूत् । सर्वाः = सम्पूर्णाः, गावः, बलरामरक्षिताः = बलरामेण सुरक्षिता अपि, झञ्झावातैः = वृष्टिमिश्रतीव्रवायुभिः, खिन्नाः = दुःखिताः, वृष्टिभिः = वर्षाभिश्च,

उद्वेजिताः = व्याकुलिताः, च आश्रमं प्रति = आश्रमाभिमुखं धावन्ति स्म। बलरामोऽपि = श्रीकृष्णाऽग्रजोऽपि, कृष्णसुदाम्नोः, प्रतीक्षाम् = आगमनकालानुपालनम्, अकृत्वैव = विनैव कृत्वा, आश्रमपदमाजगाम = आश्रममगात्।

(११) निशागमे कृष्णसुदाम्नोः अनागमनात् गुरोः सान्दीपनेर्मनसि महती चिन्ता सञ्जाता। 'कुत्र गतौ मम पुत्रकौ' इति बलरामं पृष्ट्वा स गोचारणस्य वनोद्देशं समाज्ञाय बलरामेण ब्रह्मचारिभिश्च सह तयोः अन्वेषणाय रात्रावेवाश्रमात् निर्गतवान्। ते शिप्रायाः परं पारं गन्तुकामा अपि वृष्ट्या जलौघस्यापूरणात् नदीमवतर्तुमसमर्था बभूवुः। नद्यास्तटे तिष्ठन्तः सर्वे सर्वरात्रं तारस्वरेण कृष्णसुदाम्नोर्नामग्राहमाह्वानं कृतवन्तः। किन्तु दूरं गतौ तौ विद्यार्थिनौ कथमपि सहाध्यायिनां ध्वानपरिधौ न समागतौ। महर्षिः अनिशं जाप्रदेव तस्मिन् वनोद्देशे योगविधिना मैत्रीभावस्य सम्प्रसारं कृत्वा हिंस्रजन्तुभिः तयोर्निर्हाणत्वं व्यधात्। योगबलेन तयोः कुशलत्वं विदधतापि चिन्ताकुलेन मुनिना तत्रैव तमस्विनी व्यतियापिता।

सन्दर्भः—पूर्ववत्।

प्रसङ्गः—यदा रात्र्यागमनेऽपि सुदामश्रीकृष्णौ आश्रमे नागतवन्तौ तदा आचार्यः चिन्तितो बभूव। बलरामेण श्रीकृष्णस्य गमनप्रदेशं ज्ञात्वा छात्रैश्च साकं शिप्रातटे गत्वा जलपूरान्वितां नदीं तर्तुमक्षमः, बहुधा सुदामश्रीकृष्णयोः ध्यानं कृत्वा ज्ञात्वा च योगबलेन तौ सुरक्षितौ। आचार्यो योगबलेन सर्वत्र मैत्रीं प्रसारयामास, रात्रिं चातिवाहयामास अरण्ये शिप्रायास्तटे व्याकुलितेन मनसा।

व्याख्या—निशागमे = रात्र्यागमे, कृष्णसुदाम्नोः, अनागमनात् = आगमनाभावात्, गुरोः = आचार्यस्य, सान्दीपनेः, मनसि = चित्ते, महती = अत्यधिका, चिन्ता = व्याकुलता, सञ्जाता = अभूत्। मम = सान्दीपनेः, पुत्रकौ = पुत्रीकृतौ सुदामश्रीकृष्णौ, कुत्र = क्व, गतौ = गतवन्तौ, इति = अनेन प्रकारेण, बलरामं, पृष्ट्वा, सः = आचार्यः सान्दीपनिः, गोचारणस्य, वनोद्देशम् = वनप्रदेशं, समाज्ञाय = ज्ञात्वा, बलरामेण = बलभद्रेण, ब्रह्मचारिभिश्च = अन्यैश्छात्रैश्च, सह तयोः = सुदामश्रीकृष्णयोः, अन्वेषणाय = अन्वेषणं कर्तुम्, रात्रावेव = निशायामेव, आश्रमात् = आश्रमपदात्, निर्गतवान् = निर्गतोऽभूत्। ते = आचार्यः, बलरामः ब्रह्मचारिणश्च, शिप्रायाः = एतन्नाम्न्याः नद्याः, परंपारम् = अपरं तटं, गन्तुकामा अपि = यातुकामा अपि, वृष्ट्या = वर्षया, जलौघस्य = जलसमूहस्य, आपूरणात् = परिपूरणात् नदीम् = शिप्रानाम्नीम्, अवतर्तुम् = पारं कर्तुम्,

असमर्थाः = अक्षमाः, बभूवुः = अभूवन् । नद्याः = शिप्रायाः, तटे = कूले, तिष्ठन्तः = अवस्थिताः, सर्वे = सुदामश्रीकृष्णौ गवेषणं क्रियमाणाः, तारस्वरेण = दीर्घरवेण, कृष्णसुदाम्नोः, नामग्राहम् = नामग्रहणपूर्वकम्, आह्वानं कृतवन्तः = आह्वयन्ति स्म । किन्तु = परन्तु, दूरंगतौ, तौ विद्यार्थिनौ = श्रीकृष्णसुदामानौ, कथमपि = केनापि प्रकारेण, सहाध्यायिनाम् = सहैवाध्ययनकारिणाम्, ध्वान-परिधौ = आह्वापरिधौ, न समागतौ = नह्यगच्छताम् । महर्षिः = सान्दीपनिः, अनिशम्=सततम्, जाग्रदेव = निद्रां नहि लभमानः, तस्मिन् वनोद्देशे = वनप्रदेशे, योगविधिना = योगमार्गेण, मैत्रीभावस्य = मित्रतायाः, सम्प्रसारम्=सम्यग्रूपेण प्रसारं कृत्वा, हिंस्रजन्तुभिः = घातुकैः जीवैः, तयोः = सुदामश्रीकृष्णयोः, निर्हाणत्वम् = क्षतिरहितत्वम्, व्यधात् = अकार्षीत् । योगबलेन = योगसामर्थ्येन, तयोः = श्रीकृष्णसुदाम्नोः, कुशलत्वम् = कुशलताम्, विदधताऽपि = सम्पादयता-ऽप्याचार्येण, चिन्ताकुलेन = चिन्तासमाकुलितेन, मुनिना = सान्दीपनिना, तत्र = अरण्ये, शिप्रायास्तटे एव, तमस्विनी = रात्रिः, व्यतियापिता = अतिवाहिता ।

(१२) मार्गमीहमानौ कृष्णसुदामानौ विफलीभूय कस्यचित् सुशरणस्य वनस्पतेः अङ्के निलयं कृतवन्तौ । तस्यां त्रियामायां महावृक्षस्य अधस्तात् बहवो वनजन्तवो हिंसका अपि परस्परं स्निह्यन्तो विचेरुः । तत्र वनराजा अपि हरिणैः सह चिक्रीडुः, मतङ्गजा वृक्षलतादीनघ्नन्त एव फलभोजिनो बभूवुः । 'निद्रो-त्सुकानां पक्षिणां शयने बाधा न भवेत्' इति विचारयन्त इव गोमायवः क्रोष्टु-कामा अपि मौनमभजन्त । तत्सर्वमिदं सान्दीपनेः प्रभावादिति निःसन्देहम् ।

सन्दर्भः—पूर्ववत् ।

प्रसङ्गः—गुरोः पत्न्या आदेशेनेन्धनमानेतुं शिप्रायाः परं पारं गतौ सुदाम-श्रीकृष्णौ वृष्ट्या बाधितौ यदा रात्रौ मार्गं नालभताम्, तदा कस्यचिन्महा-वृक्षस्याधस्तात् रात्रौ तिष्ठेते स्म । सुदामश्रीकृष्णाभ्यां चिन्तित आचार्यः स्वयोग-महिम्नाऽरण्ये जीवानां परस्परं मैत्रीं प्रसारयामास इति वर्णयत्यत्र लेखकः ।

व्याख्या—मार्गम्=पन्थानम्, ईहमानौ = अभिकाङ्क्षमाणौ, कृष्णसुदामानौ, विफलीभूय = वैफल्यमेत्य, कस्यचित् = एकस्य, सुशरणस्य = सम्यग्रूपेण शरण-तया ग्राह्यस्य, वनस्पतेः = वृक्षस्य, अङ्के = क्रोडे, निलयम् = गृहम्, कृतवन्तौ । तस्याम्, त्रियामायाम् = रात्र्याम्, महावृक्षस्य, अधस्तात् = अधस्तले, बहवः = अनेके, हिंसकाः = घातुकाः, अपि, वनजन्तवः = वनप्राणिनः, परस्परम्=मिथः, स्निह्यन्तः = स्नेहं कुर्वन्तः, विचेरुः = विचरणमकार्षुः । तत्र = वृक्षस्याधस्तात्,

वनराजा=सिंहा अपि, हरिणैः=मृगैः, सह, चिक्रीडुः=क्रीडनमकार्षुः। मतङ्गजाः=हस्तिनः, वृक्षलतादीन्=पादपगुल्मादीन्, अघ्नन्तः=अविनाशयन्तः, एव, फलभोजिनः=फलग्राहिणः, वभूवुः=अभूवन्। निद्रोत्सुकानाम्=स्वपितुमुद्यतानाम्, पक्षिणाम्=खगानाम्, शयने=निद्रायाम्, बाधा=व्यवधानम्, न=नहि, भवेत्=जायेत, इति=अनेन प्रकारेण, विचारयन्तः=विचारणां कुर्वन्तः, इव, गोमायवः=शृगालाः, क्रोष्टुकामा अपि=ध्वनिं कर्तुमिच्छन्तोऽपि, मौनमभजन्त=मौनमाकलयामासुः। तत्=यत् किञ्चिदपि तत्र संवृत्तं तत्, सर्वम्=अखिलम्, सान्दीपनेः=मुनेराचार्यस्य, प्रभावात्=योगप्रभावात्, इति=इत्यस्मिन् विषये, निःसन्देहम्=नास्ति सन्देहः।

(१३) 'भगवते कृष्णाय यः कश्चित् किञ्चिदपि ददाति, तस्य दारिद्र्यं तेन भगवता झटिति दूरीक्रियते' इति कृष्णमधिकृत्य एका प्रसिद्धा अनुश्रुतिः आसीत्। तद्यथा—विषमपि ददती पूतनाऽमरपदं प्रापिता। सुदामा पुनः विचारितवान्—यदि कृष्णाय भोजनमहं ददामि, तर्हि क्षिप्रमेव ब्राह्मणोचिता दरिद्रता मां परित्यक्ष्यति। तन्न श्रेयस्करम्। जात्वहं समृद्धिं नाकाङ्क्षामि। किं न समर्थितं पूर्वसूरिभिः—

'अनर्थो ब्राह्मणस्यैष यद्वित्तनिचयो महान्'।

तत्कथमहं कृष्णाय भोजनं दत्त्वा फलतः वित्तनिचयं लब्ध्वा स्वयं स्वकीयमनर्थं करिष्यामि ? अथवा—

'आर्जवे वर्त्तमानस्य ब्राह्मण्यमभिजायते'।

सन्दर्भः—पूर्ववत्।

प्रसङ्गः—वने रात्रौ श्रीकृष्णेन साकं निवसन्नपि सुदामा विचारयति यद् ब्राह्मणोऽहमस्मि। ब्राह्मणत्वसंरक्षणाय वित्तनिचयात् सुदूरेण भाव्यम्। यद्यहं स्वभोजनं श्रीकृष्णाय दास्यामि तदा नूनमहं धनिको भविष्यामि। धनिकस्य पुरुषस्य ब्राह्मणत्वसुरक्षा असम्भाविनीति वक्ति लेखकः।

व्याख्या—भगवते कृष्णाय=षडैश्वर्यसम्पन्नाय श्रीकृष्णाय, यः कश्चिदपि=कोऽपि, किञ्चिदपि=स्वल्पमपि, ददाति, तस्य=पुरुषस्य, दारिद्र्यम्=निर्धनता, तेन भगवता=श्रीकृष्णेन, झटिति=शीघ्रमेव, दूरीक्रियते=अपाक्रियते, इति=एतस्मादेव कारणात्, श्रीकृष्णमधिकृत्य=भगवतः श्रीकृष्णस्य विषये, एका, प्रसिद्धा=प्रख्याता, अनुश्रुतिः=जनश्रुतिः, आसीत्। तद्यथा=तथाहि—विषमपि=गरलमपि, ददती=प्रदानं कुर्वती, पूतना=एतन्नाम्नी काचिद्राक्षसी, अमरपदम्=परमपदम्, प्रापिता=लभिता। सुदामा, पुनरपि=भूयोऽपि, विचारितवान्

=विचारं कृतवान् । यदि=चेत्, अहम्=सुदामा, कृष्णाय, भोजनं ददामि=प्रयच्छामि, तर्हि=तदा, क्षिप्रमेव=शीघ्रमेव, माम्=सुदामानम्, ब्राह्मणोचिता=ब्राह्मणोपकारिणी, दरिद्रता=दारिद्र्यम्, परित्यक्ष्यति । तत्=दारिद्र्यस्य वियोजनम्, श्रेयस्करम्=कल्याणप्रदम्. न=नहि वर्तते । अहम्=सुदामा, न जातु=नहि कदापि, समृद्धिम्=धनसम्पत्तिगोष्कल्यम्, काङ्क्षामि=अभिलषामि । किम्, पूर्वसूरिभिः=प्राक्तनाचार्यैः, न=नहि, समर्थितम्=समर्थनं कृतम् ? एषः=अयम्, ब्राह्मणस्य=विप्रस्य, अनर्थः=अकल्याणकरम्, यत् महान्=विपुलः, वित्तनिचयः=सम्पत्तेः सङ्ग्रहः, तस्मिन् भवतीति शेषः । तत्=तस्मात्, अहम्=सुदामा, कृष्णाय=श्रीकृष्णाय, भोजनं दत्त्वा=प्रदाय, फलतः=फलरूपेण, वित्तनिचयम्=सम्पत्तिसङ्ग्रहं, लब्ध्वा=प्राप्य, स्वकीयम्=आत्मनः, अनर्थम्=क्षतिं, कथम्=कस्माद् हेतोः, करिष्यामि=सम्पादयिष्यामि ? अथवा—आर्जवे=छलकपटादिरहितपथि, वर्तमानस्य=विद्यमानस्य, ब्राह्मण्यम्=ब्राह्मणत्वम्, अभिजायते=वर्द्धते ।

(१४) इदमार्जवं तु दरिद्राणामेव सहजातम् । धनिनामार्जवं कुतः ? तर्हि समृद्धो भूत्वा आर्जवं परित्यज्य कथं स्वयं ब्राह्मण्यात् विमुखो भविष्यामि ? ब्राह्मणोऽस्मि जन्मना ब्रह्मकामः । इह जीवने ब्रह्मसंस्थः सन् जीवन्मुक्तो भवितुमिच्छामि । तत्कथं लब्धमनोरथो भविष्यामि यदि कृष्णेन समृद्धीकृतो भवेयम् । श्रुतं हि मया—'तपसा चीयते ब्रह्म ।' तपः कदापि समृद्धिशालिभिः न साध्यम् । महान् वितर्को मे मनसि वर्तते । कृष्णो मम मित्रं सहाध्यायी लघुभ्राता अस्ति । तस्मै भोजनमदत्त्वा स्वयं खादितुमपि न समर्थः । तर्हि भवतु नामोपवासः आवयोरुभयोः स्वास्थ्यसौष्ठवाय । अयं कोऽपि लाभः । कृष्णो मम प्रवृत्ति जानन्नपि मित्रत्वेन मां धनिकं कर्तुं वाञ्छति । तस्यानुग्रहोऽयं न स्पृहणीयः । 'न हि कश्चिद् दरिद्रो धनिकादवरः' इति मे मतिः । दरिद्रः श्रेष्ठतरं भोगसुखं लभते । तद्यथा—

'प्रायेण श्रीमतां लोके भोक्तुं शक्तिर्न विद्यते ।
काष्ठान्यपि हि जीर्यन्ते दरिद्राणां च सर्वशः ॥'

सन्दर्भः—पूर्ववत् ।

प्रसङ्गः—अस्मिन्ननुच्छेदे सुदामा विचारयति यद् मम दारिद्र्यं मे ब्राह्मण्यानुकूलं वर्तते । मित्रत्वादेव श्रीकृष्णो मां धनिनं चिकीर्षति । किन्तु नाहं तत् स्वीकरिष्यामि । अत एव रात्रौ भोजनमकृत्वैवाहं तिष्ठेयम्, किन्तु श्रीकृष्णाय भोजनं दत्वा समृद्धिं तदर्थं नहि स्वीकरिष्यामि । लोके समृद्धिशालिनां तु

भोगस्य शक्तिरपि नहि भवति। निर्धनानामुदरे तु काष्ठमपि ससुखं जीर्णं भवतीति।

व्याख्या—इदम् = मयि सुदाम्नि विद्यमानम्, आर्जवम् = कपटराहित्यम्, तु, दरिद्राणामेव = निर्धनानामेव, सहजातम् = सहैवोत्पन्नम्। धनिनाम् = समृद्धानाम्, आर्जवम् = ऋजुता, कुतः ? तर्हि = तदा, समृद्धः = धनिकः, भूत्वा = सम्पद्य, आर्जवम् = ऋजुता, च परित्यज्य = विहाय, कथम् = कस्माद् हेतोः, स्वयम् = निष्कारणम्, ब्राह्मण्यात् = ब्राह्मणस्य स्वाभाविकात् धर्मात्, विमुखः = पराङ्मुखः, भविष्यामि = सम्पत्स्ये ? अहं जन्मना = जन्मतः, ब्राह्मणः अस्मि, ब्रह्मकामः = ब्रह्मप्राप्तेरिच्छावानस्मि। इह = अस्मिन्, जीवने = जीवितकाले, ब्रह्मसंस्थः = ब्रह्मनिष्ठः सन्, जीवन्मुक्तः = संसारात् मुक्तः, भवितुमिच्छामि = बुभूपुरस्मि। तत् = तस्मात्, यदि = चेत्, कृष्णेन = भगवता श्रीकृष्णेन, समृद्धीकृतः = धनिकत्वं सम्पादितः, भवेयम्, तर्हि लब्धमनोरथः = प्राप्तकामः, कथम् = केन प्रकारेण, भविष्यामि = सम्पत्स्ये। मया = सुदाम्ना, श्रुतं हि = कर्णगोचरीकृतम्, वर्तते यत्—तपसा = तपश्चर्यया; ब्रह्म = परमात्मा, चीयते = प्राप्यते, तपः = तपश्चर्या, समृद्धिशालिभिः = धनिकैः, कदापि = कस्यामप्यवस्थायाम्, साध्यम् = प्राप्यम्, न भवति। मे = मम, मनसि = चित्ते, महान् = अत्यधिकः, वितर्कः वर्तते।

कृष्णः = श्रीकृष्णः, मम = सुदाम्नः, मित्रम् = सखा, सहाध्यायी = सहैवाध्ययनकर्ता, लघुभ्राता = अनुजश्च वर्तते। तस्मै = श्रीकृष्णाय, भोजनम् = खाद्यपदार्थम्, अदत्वा = नहि दत्वा, स्वयम् = आत्मनाऽपि, खादितुम् = भोक्तुम्, न = नहि, समर्थः = सक्षमोऽस्मि। तर्हि = तदा, भवतु नाम = सञ्जायतामेव, उपवासः = अनशनम्, आवयोः = सुदामश्रीकृष्णयोः, उभयोः = द्वयोः, स्वास्थ्यसौष्ठवाय = नैरुज्यातिशय्यलाभाय। अयम् = उपवासरूपः, कोऽपि = महान्, लाभः वर्तते। कृष्णः, मम = सुदाम्नः, प्रवृत्तिम् = रुचिम्, जानन्नपि = अवगच्छन्नपि, मित्रत्वेन = सखात्वात्, माम् = सुदामानम्, धनिकम् = समृद्धम्, कर्तुं वाञ्छति = चिकीर्षति। तस्य = श्रीकृष्णस्य, अयम् = एषः, अनुग्रहः = दया, न = नहि, स्पृहणीयः = समादरणीयः। कश्चित् = कोऽपि, दरिद्रः = निर्धनः, धनिकात् = समृद्धपुरुषात्, अवरः = हीनः, नहि = नास्ति, इति = इत्थम्, मे = मम सुदाम्नः, मतिः = मनीषा। दरिद्रः = पुरुषः, श्रेष्ठतरम् = प्रशस्यतरम्, भोगसुखम् = विषयोपभोगजन्यम्, आनन्दम् लभते = प्राप्नोति। तद्यथा—

प्रायेण = प्रायशः, लोके = जगति, श्रीमताम् = ऐश्वर्यशालिनाम्, भोक्तुम्

=भोगं कर्तुम्, शक्तिः=सामर्थ्यम्, न=नहि, विद्यते । च=किञ्च, दरिद्राणाम्=निर्धनानाम्, सर्वशः=पूर्णरूपेण, काष्ठान्यपि, उदरेषु जीर्यन्ते=जीर्णीकृतानि भवन्ति इति ।

(१५) तस्मिन्नरण्येऽपि सान्दीपनेः प्रभावेण नाभवत् काचित् बाधा । कृष्णसुदामानौ ऋषेः प्रभावेण सर्वत्र सुखमयानि दृश्यानि साक्षात्कृतवन्तौ । योगप्रभावाद् बुभुक्षाया बाधाऽपि दूरीकृता महर्षिणा । तथा हि—यस्य वृक्षस्याङ्के तौ निलयं चक्रतुस्तस्य शाखा-प्रशाखासु बहुविधानि सुस्वादूनि सुगन्धीनि च फलानि अकस्मात् प्रादुर्भूतानि । रात्रौ फलभोजनं श्रेयस्करमिति वृक्षस्य फल-समृद्धि दृष्ट्वा प्रहृष्टमनसौ कृष्णसुदामानौ देवेभ्यः फलानि समर्प्य स्वयमपि आपरितोषं भोजनं कृतवन्तौ । सर्वथा निश्चिन्तौ एव तौ सुखशायिनौ बभूवतुः ।

सन्दर्भः—पूर्ववत् ।

प्रसङ्गः—अस्मिन्ननुच्छेदे लेखको वक्ति यत्—सुदामा स्वब्राह्मण्यरक्षणाय श्रीकृष्णाय भोजनमदत्वोपवासं कर्तुमिच्छति स्म । ऋषेः प्रभावेण सुदामश्रीकृष्णौ मनोज्ञानि दृश्यानि अपश्यताम् । तदैव तस्मिन् वृक्षे अकस्मात् मनोज्ञानि बहूनि फलान्याविर्बभूवुः । श्रीकृष्णसुदामानौ फलाहारं कृत्वा रात्रौ ससुखं शयाते स्म ।

व्याख्या—तस्मिन्नरण्येऽपि=यस्मिन्नरण्ये श्रीकृष्णसुदामानावास्तां तस्मिन्नपि, सान्दीपनेः=आचार्यस्य, प्रभावेण=महिम्ना, काचित्=एकापि, बाधा=व्याहतिः, नाभवत्=नह्यजायत । कृष्णसुदामानौ, ऋषेः सान्दीपनेः, प्रभावेण=महिम्ना, सर्वत्र=सर्वेषु स्थलेषु, सुखमयानि=आनन्दपरिपूर्णानि, दृश्यानि=द्रष्टव्यानि वस्तूनि, साक्षात्कृतवन्तौ=अवलोकितवन्तौ । योगप्रभावात्=योगस्य महिम्ना, बुभुक्षायाः=भोक्तुमिच्छायाः, बाधाऽपि=कष्टमपि, दूरीकृता=अपाकृता, महर्षिणा=आचार्येण सान्दीपनिना, तथाहि=तद्यथा, यस्य वृक्षस्य=पादपस्य, अङ्के=क्रोडे, तौ=सुदामश्रीकृष्णौ, निलयम्=वसतिं, चक्रतुः=कृतवन्तौ, तस्य=वृक्षस्य, शाखाप्रशाखासु, बहुविधानि=नानाप्रकारकाणि, सुस्वादूनि=मधुरस्वादयुक्तानि, सुगन्धीनि=सौगन्ध्यमयानि, च फलानि, अकस्मात्=सहसा, प्रादुर्भूतानि=उत्पन्नानि । रात्रौ=विभावर्याम्, फलभोजनम्=फलाहारः, श्रेयस्करमिति=कल्याणकरमिति, वृक्षस्य=पादपस्य, फल-समृद्धिम्=फलस्य समृद्धिम्, दृष्ट्वा=विलोक्य, प्रहृष्टमनसौ=प्रसन्नान्तःकरणौ, कृष्णसुदामानौ, देवेभ्यः=देवताभ्यः, फलानि, समर्प्य=अर्पयित्वा, स्वयमपि=आत्मनाऽपि, आपरितोषम्=सन्तुष्टिं यावत्, भोजनम्=आहार-

ग्रहणम्, कृतवन्तौ। सर्वथा = पूर्णरूपेण, निश्चिन्तौ = चिन्तारहितौ, एव, तौ = कृष्णसुदामानौ, सुखशायिनौ = सुखपूर्वकं शयनकर्तारौ, बभूवतुः = अभूताम्।

(१६) अपरेद्युर्दिनमणेः अभ्युदयेन नैशं तिमिरं विनिवृत्तम्। सर्वं तत्र वन्यमपि ललामं बभूव। रात्रिकाले शिप्रा स्वजलौघमुज्जयिन्या उपायनरूपेण सरित्पतिं प्रति प्राहिणोत्। सा तटिनी प्रत्यूषे पुनः सुतरा बभूव। महर्षिः शिप्रायाः परं पारं गत्वा शीघ्रमेव शिष्ययोः समागमं कृतवान्। तयोः सम्प्राप्त्या गुरुर्निरुत्सुकोऽभवत्। आचार्येण प्रोक्तम्—

अहो हे पुत्रका यूयमस्मदर्थेऽतिदुःखिताः।
आत्मा वै प्राणिनां प्रेष्ठस्तमनादृत्य मत्पराः॥
एतदेव हि सच्छिष्यैः कर्तव्यं गुरुनिष्कृतम्।
यद्वै विशुद्धभावेन सर्वार्थात्मार्पणं गुरौ॥
तुष्टोऽहं भो द्विजश्रेष्ठाः सत्याः सन्तु मनोरथाः।
छन्दांस्ययातयामानि भवन्त्विह परत्र च॥

सान्दीपनिस्तयोः शिरसि वरदहस्तं निधाय पुनराशीर्वादं ददौ—'नित्यमेव युष्माकं लोककल्याणवृत्तयः संवर्धन्ताम्' इति। वनोद्देशादाश्रमाभिमुखं ते सर्वे प्रतिनिवृत्ताः।

सन्दर्भः—पूर्ववत्।

प्रसङ्गः—गुरुपत्न्या आज्ञया इन्धनार्थं गतौ सुदामश्रीकृष्णौ घोरवृष्ट्या बाधितौ प्रत्यावर्तितुमक्षमौ बभूवतुः। महर्षिः सान्दीपनिरपि तयोरन्वेषणार्थं वने जगाम, परन्तु तयोरन्वेषणे सक्षमो नाऽभूत्। द्वितीयदिने महर्षिः शिप्रां तीर्त्वा तौ समागम्य प्रहृष्टः सन् तौ बहुभिराशीर्वचोभिः संयोजयामास। इति वर्णयत्यत्र लेखकः।

व्याख्या—अपरेद्युः = द्वितीयद्विवसे, दिनमणेः = सूर्यस्य, अभ्युदयेन = उदयेन, नैशम् = रात्रीयम्, तिमिरम् = अन्धकारः, विनिवृत्तम् = विनष्टम्। सर्वम् = अखिलम्, तत्र = वने, वन्यमपि = वनजन्यमपि, ललामम् = मनोज्ञम्, बभूव = अभूत्। रात्रिकाले = रात्रेः समये, शिप्रा = नदी, स्वजलौघम् = स्वजलसमूहम्, उज्जयिन्याः, उपायनरूपेण = उपहाररूपेण, सरित्पतिम् = समुद्रम्, प्रति, प्राहिणोत् = प्रेषितवती। सा = उपर्युक्ता शिप्रानाम्नी, तटिनी = नदी, प्रत्यूषे = प्रातःकाले, पुनः = भूयः, सुतरा = सुखपूर्वकं ततुं योग्या, बभूव = अभूत्। महर्षिः = सान्दीपनिः, शिप्रायाः = नद्याः, परं पारम् = अपरं तटम्, गत्वा = प्राप्य, शीघ्रमेव, शिष्ययोः = सुदामश्रीकृष्णयोः, समागमम्, कृतवान्

=अकार्षीत् । तयोः = सुदामश्रीकृष्णयोः, सम्प्राप्त्या = उपलब्ध्या, गुरुः = सान्दीपनिः, निरुत्सुकः = उत्कण्ठारहितः, अभवत् = अभूत्, आचार्येण = सान्दीपनिना, प्रोक्तम् = अभिहितम् ।

अहो = इत्युत्कण्ठायामव्ययम्, हे पुत्रकाः = मम वत्साः ! यूयम् = भवन्तः, अस्मदर्थे = मह्यम्, अतिदुःखिताः=अत्यधिकं लब्धकष्टाः । वै=निश्चयेन, प्राणिनाम् = जीवानाम्, प्रेष्ठः=प्रियतमः, आत्मा भवति, तम् = आत्मानम्, अनादृत्य = अनादरं कृत्वा, मत्पराः = मम सेवापरायणाः, यूयं स्थ । सच्छिष्यौ = शिष्यवरेण्यौ, एतदेव = युष्माभिः क्रियमाणमेव, गुरुनिष्कृतम् = गुरोरुपकाररूपेण कर्म, कर्तव्यम् = सम्पादनीयम् । यत् वै = निश्चितरूपेण, विशुद्धभावेन = निष्कपटभावेन, गुरौ = आचार्ये, सर्वार्थात्मार्पणरूपं वर्तते । भो द्विजश्रेष्ठाः = द्विजोत्तमाः ! अहम् = सान्दीपनिः, तुष्टः=सन्तुष्टः अस्मि, युष्माकम्, मनोरथाः = कामनाः, सत्याः = सफलाः, सन्तु = भवन्तु । च = किञ्च, इह = अस्मिन् लोके, परत्र = परस्मिश्च लोके, युष्माकम्, छन्दांसि = वेदाः, अयातयामानि = सततं बुद्धिस्थानि भवन्तु ।

सान्दीपनिः = आचार्यः, तयोः = सुदामश्रीकृष्णयोः, शिरसि = मस्तके, वरदहस्तम् = वरप्रदं हस्तम्, निधाय = कृत्वा, पुनः = ततः, आशीर्वादम् = आशीर्वचः, ददौ = प्रादात् । युष्माकम् = भवताम्, लोककल्याणवृत्तयः = जगत्-कल्याणकारिण्यः प्रवृत्तयः, नित्यमेव = प्रतिदिनमेव, संवर्धन्ताम् = प्रवदन्ताम्, इति = अनेन प्रकारेण, ते = उपर्युक्ताः, वनोद्देशात् = वनप्रदेशात्, सर्वे = समे जनाः, प्रतिनिवृत्ताः = प्रत्यागताः अभूवन् ।

(१७) शनैः शनैः कृष्णबलरामौ सुदामा च वेद-वेदाङ्गपुराणेतिहास-दर्शन-धर्मशास्त्रादिषु चतुर्दशविद्यासु निष्णाता बभूवुः । चतुष्षष्टिकलानां प्रमुखासु ते यथारुचि प्रावीण्यं प्राप्तवन्तः । अपरञ्च कृष्णस्तु राजनीतौ, धनुर्वेदे रथचर्यायां च वैशारद्यं लब्धवान् । बलरामः आ हिमालयात् समुद्रपर्यन्तं तीर्थानां नदीपर्वतानां च स्थितिं, माहात्म्यमुपयोगितां च भौगोलिकदृष्ट्या सविवेचनं शिक्षितवान् । सुदाम्ना तु प्रयोजनापेक्षया परा विद्या सविशेषमधीता ।

सन्दर्भः—पूर्ववत् ।

प्रसङ्गः—अस्मिन्ननुच्छेदे लेखको वक्ति यत् श्रीकृष्णबलरामसुदामानो यथारुचि तासु तासु विद्यासु प्रावीण्यमधिजग्मुः । तासां तासां कलानां ज्ञानं ते नैजं सम्पादितवन्तः । बलरामो भौगोलिकदृष्ट्या नदीनां पर्वतानां ज्ञानम्, सुदामा च पराविद्यायाः ज्ञानं सम्पादितवान् ।

व्याख्या—शनैः शनैः=कालक्रमानुसारेण, कृष्णबलरामौ=वसुदेवदेवकीपुत्रौ, सुदामा च, वेदवेदाङ्गपुराणेतिहासदर्शनधर्मशास्त्रादिषु=चतुर्षु वेदेषु, शिक्षाकल्प-ज्योतिर्व्याकरणमीमांसान्यायविस्तरेषु चतुर्दशविद्यासु, निष्णाताः=पारङ्गताः, बभूवुः=अभवन्। चतुष्षष्टिकलानां च, प्रमुखासु=प्रधानासु कलासु, ते=त्रयः श्रीकृष्णबलरामसुदामानः, यथारुचि=रुच्यनुसारम्, प्रावीण्यम्=विचक्षणता, प्राप्तवन्तः=अध्यगामुः, अपरञ्च=किञ्च, कृष्णस्तु, राजनीतौ=राजनीति-शास्त्रे, धनुर्वेदे=शस्त्रसञ्चालनकर्मसु, च=किञ्च, रथचर्यायाम्=रथ-सञ्चारणकर्मणि, वैशारद्यम्=निपुणताम्, लब्धवान्=प्राप्तवान्। बलरामः=बलभद्रः, आ हिमालयात्=हिमालयपर्वतादारभ्य, समुद्रपर्यन्तम्=अब्धि यावत्, तीर्थानाम्=पवित्रस्थलानाम्, नदीपर्वतानाम्=स्रोतस्विनीनां नगानां च, स्थितिम्=अवस्थितिम्, माहात्म्यम्=महत्त्वम्, उपयोगिताञ्च, भौगोलिक-दृष्ट्या सविवेचनम्=विवेचनपूर्वकम्, शिक्षितवान्=अध्यगात्। सुदाम्ना तु, प्रयोजनानपेक्षया=प्रयोजननिरपेक्षत्वात्, पराविद्या=परब्रह्मबोधिका मोक्ष-विद्या, सविशेषम्=विशेषरूपेण, अधीता=अध्ययनं कृताऽभूत्।

(१८) विद्यासु पारङ्गताः ते गुरुणा समावर्तनाय समादिष्टाः। सुदामा तु समावर्तनकामो नासीत्। 'आश्रमजीवनमेव वरेण्यतमम्' इति तेन मनसि कृतम्। स गुरवे निवेदितवान्—नाहं समावर्तनायोत्सहे प्रभो! नाहमैन्द्रियक-भोगविलासप्रपञ्चेषु स्वल्पमपि भागं स्वजीवनस्य व्यर्थीकर्त्तुमिच्छामि। आध्या-त्मिकानन्दस्य तुलनायां क्व तिष्ठन्ति ग्राम्यसुखानि? प्रकृतेः सुखं तुच्छमेव, प्राकृतजनोचितं भवति तत्। ब्रह्मनिष्ठानां परमानन्दोऽनुपमेयोऽसीमश्च वर्तते। अपरं च—लौकिकसुखानां ब्रह्मानन्देन सह सामञ्जस्यं नास्ति। किं न गुरुदेवेन प्रबोधितम्—एतेन तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थाय भिक्षाचर्यं चरन्तीति।

सन्दर्भः—पूर्ववत्।

प्रसङ्गः—अस्मिन् अनुच्छेदे लेखको वर्णयति यत् तेषां श्रीकृष्णबलराम-सुदाम्नाम् अध्ययने निर्वृत्ते तेषां समावर्तनायादिष्टवान्। सुदामा तु नैजं समावर्तनं नैच्छत्, स आजीवनम् आश्रमजीवनमेव व्यतीतं कर्तुम् आचार्याय निवेदितवान् इति।

व्याख्या—विद्यासु=स्वाभिलषितासु, पारङ्गताः=प्रावीण्यमधिगताः, ते=श्रीकृष्णबलरामसुदामानः, समावर्तनाय=समावर्तनसंस्काराय, गुरुणा=सान्दी-पनिना, समादिष्टाः=आदेशिताः। तेषु त्रिषु सुदामा तु, समावर्तनकामः

नासीत्=नैजं समावर्तनसंस्कारं नैच्छत्। आश्रमजीवनम्=आजीवनम् आश्रम एव निवासकरणम्, वरेण्यतमम्=स्पृहणीयतमम्, इति=अनेन प्रकारेण, तेन=सुदाम्ना, मनसि=स्वचेतसि, कृतम्=निश्चितं कृतम्। सः=सुदामा, गुरवे=आचार्याय, निवेदितवान्=न्यवेदीत्। प्रभो=हे आचार्य! अहम्=सुदामा, समावर्तनाय=समावर्तनसंस्काराय, न हि, उत्सहे=उत्साहं कुर्वे। न, अहम्=सुदामा, ऐन्द्रियकेषु=इन्द्रियभोग्येषु, भोगविलासप्रपञ्चेषु=भोगानां विलासानाम्, प्रपञ्चेषु=समूहेषु, स्वल्पमपि=अत्यल्पमपि, स्वजीवनस्य=निजजीवनस्य, भागम्=अंशम्, व्यर्थीकर्तुम्=व्यर्थयितुम्, इच्छामि=ईहे। आध्यात्मिकानन्दस्य=आत्मज्ञानजन्यानन्दस्य तुलनायाम्, ग्राम्यसुखानि=विषयोपभोगजन्यसुखानि, क्व तिष्ठन्ति=कुत्र स्थास्यन्ति? प्रकृतेः सुखम्=प्रकृतिजन्यं सुखम्, तुच्छमेव=अत्यल्पमेव। तत्=सुखम्, प्राकृतजनोचितम्=ग्राम्यजनोपभोगायैव उचितम्, भवति=जायते। ब्रह्मनिष्ठानाम्=ब्रह्मपरायणानाम्, परमानन्दः=सर्वोत्तमानन्दः, अनुपमेयः=अतुलनीयः, असीमः=निस्सीमश्च वर्तते। अपरञ्च=किञ्च, लौकिकसुखानाम्=लोके भुज्यमानानां सुखानाम्, ब्रह्मानन्देन सह=ब्रह्मप्राप्तिजन्येनानन्देन सह, सामञ्जस्यम्=समन्वयम्, नास्ति। किम्, गुरुदेवेन=श्रीमता आचार्येण, न=नहि, प्रबोधितम्=शिक्षितम्—एतेन=ब्रह्मज्ञानेन, तम्=परमात्मानम्, विदित्वा=विशेषतो ज्ञात्वा, ब्राह्मणाः=ब्रह्मज्ञानिनः, पुत्रैषणायाश्च=पुत्रावाप्तिकामनायाः, वित्तैषणायाश्च=धनावाप्तिकामनायाः, लोकैषणायाश्च=यशःप्राप्तेः कामनायाश्च, व्युत्थाय=उपरि उत्थाय, भिक्षाचर्यम्=भिक्षाटनम्, चरन्ति=कुर्वन्ति। इति।

(१९) सुदाम्नोऽभिप्रायं विदित्वा सान्दीपनिः प्रोवाच—शोभनमिदं नैष्ठिकब्रह्मचर्यपदं पुरा महर्षिभिः सुप्रतिष्ठितं च वर्तते। तथापि भारतीयगृहस्थानामधुना सदाचारविमुखीं जीवन-वृत्तिं पर्यालोचयामि। 'तव ज्ञानस्य शक्तेश्च सदुपयोगो गृहस्थाश्रमिणामभ्युदयनिःश्रेयस-पथप्रदर्शनाय भवतु' इत्यहं प्रशस्यं मन्ये। नहि नैष्ठिकब्रह्मचारी गृहस्थानां मध्ये गच्छेदिति मे मतम्। गृहस्थानां कृते तस्योपयोगो गौणरीत्यैव भवेत्। गृहस्थः सन् त्वं ब्रह्मपरायणसन्तानोत्पादनेन देशस्य शाश्वतकल्याणपरम्परां विधातुं समर्थोऽसि।

सन्दर्भः—पूर्ववत्।

प्रसङ्गः—अस्मिन् अनुच्छेदे लेखको वक्ति यत् सुदाम्नः आजीवनं ब्रह्मचर्यपालनेच्छां ज्ञात्वा सान्दीपनिः समुपदिदेश यत् त्वया ज्ञानीसन्तानोत्पादनेन द्वारा देशोपकारः कर्तव्यः। एतदर्थं त्वया गार्हस्थ्यं स्वीकर्तव्यमिति।

व्याख्या—सुदाम्नः, अभिप्रायम्=हार्दं भावम्, विदित्वा=ज्ञात्वा, सान्दीपनिः=आचार्यः, प्रोवाच=अवोचत् । इदम्=त्वया काम्यमानम्, नैष्ठिकब्रह्मचर्यपदम्=आजीवनं ब्रह्मचर्यपालनाख्यं कर्म, शोभनम्=अतीव मनोज्ञम्, पुरा=पूर्वेषु कालेषु, महर्षिभिः सुप्रतिष्ठितम्=सम्यग्रूपेण प्रतिष्ठापितमपि वर्तते । तथापि=अथापि, भारतीयगृहस्थानाम्=भारतीयानां, गृहस्थानाम्, अधुना=साम्प्रतम्, सदाचारविमुखम्=शास्त्रोपदिष्टाचारपराङ्मुखीम्, जीवन-वृत्तिम्=जीवनस्य प्रवृत्तिम्, पर्यालोचयामि=पर्यालोचनं करोमि । तव=सुदाम्नः, ज्ञानस्य=बोधस्य, शक्तेश्च, सदुपयोगः=सम्यग्रूपेण उपयोगः, गृहस्थाश्रमिणाम्=गार्हस्थ्यश्रमे निवसताम्, अभ्युदयनिःश्रेयसपथप्रदर्शनाय=कल्याणमोक्षयोः मार्गप्रदर्शनाय, भवतु=भवेत्, इति=इत्थनेन रूपेण, अहम्=सान्दीपनिः, प्रशस्यम्=प्रशंसनीयम्, मन्ये=अवधारयामि । नैष्ठिकब्रह्मचारी=आजीवनं ब्रह्मचर्यपालनपरायणः पुरुषः, गृहस्थानाम्=गार्हस्थ्याश्रमिणाम्, मध्ये नहि, गच्छेत्=इयात्, इति=इत्याकारिका, मे=मम, मतिः=मनीषा । गृहस्थानां कृते=गृहस्थेभ्यः, तस्य=नैष्ठिकब्रह्मचारिणः, उपयोगः, गौणरीत्यैव=गौणरूपेणैव, भवेत्=स्यात् । त्वम्=सुदामा, गृहस्थः सन्=गृहस्थाश्रमे तिष्ठन् सन्, ब्रह्मपरायणसन्तानोत्पादनेन=ब्रह्मज्ञानिसन्तानोत्पादनद्वारा, देशस्य=राष्ट्रस्य, शाश्वतकल्याणपरम्पराम्=अविच्छिन्नकल्याणसन्तानम्, विधातुम्=कर्तुम् । समर्थोऽसि=क्षमोऽसि ।

(२०) गुरोः सन्देशं श्रुत्वा सुदामा स्वजीवनस्याभिनवोत्कर्षक्रमं लक्षितवान् । स प्रसन्नमनसा समावर्तनायोद्यतो बभूव । समावर्तनस्नानं कृत्वा ते स्नातकाः समपद्यन्त । तस्मिन्नवसरे ते ब्रह्मतेजसातीव रोचमाना एव सम्प्रकाशिता बभूवुः । ते गुरुमभिवन्दितवन्तः—त्वं हि नः पिता, त्वमस्मान् विद्यायाः परं पारं तारयसीति । इमे त्रयः स्नातकाः शोभनाभिः मालाभिराचार्यमलङ्कृतवन्तः ।

सन्दर्भ.—पूर्ववत् ।

प्रसङ्गः—यद्यपि सुदामा नैष्ठिकब्रह्मचारी भवितुमैहत तथापि आचार्यस्य गार्हस्थ्ये प्रविश्य देशोपकारं कर्तुम् आदेशं श्रुत्वा, आचार्यस्यादेशं शिरोधार्यं कृत्वा समावर्तनायोद्यतो बभूव इति वक्तव्यत्रानुच्छेदे द्वासुपर्णाग्रन्थस्य लेखकः ।

व्याख्या—गुरोः=आचार्यस्य सान्दीपनेः, सन्देशम्=उपदेशम्, श्रुत्वा=श्रवणं कृत्वा, सुदामा, स्वजीवनस्य=स्वकीयस्य जीवनस्य, अभिनवोत्कर्षक्रमम्=नवीनविकासपरम्पराम्, लक्षितवान्=लक्ष्यीचकार । सः=सुदामा, प्रसन्नमनसा

=प्रसन्नेनान्तःकरणेन, समावर्तनाय=समावर्तनसंस्कारसम्पादनाय, उद्यतः= उद्युक्तः, बभूव=अभूत्। समावर्तनस्नानम्=समावर्तनसंस्कारसम्पादनायोपयोगीस्नानम्, कृत्वा=सम्पाद्य, ते=त्रयः श्रीकृष्णबलरामसुदामानः, स्नातकाः =अधिगतविद्याः, समपद्यन्त=अभूवन्। तस्मिन्नवसरे=समये, ते=श्रीकृष्णबलरामसुदामानः; ब्रह्मतेजसा=ब्रह्मवर्चसेन, अतीव=अत्यन्तम्, रोचमानाः =सुशोभमानाः, एव, सम्प्रकाशिताः=सम्यग्रूपेण प्रकाशमानाः, बभूवुः= अभूवन्। ते=श्रीकृष्णबलरामसुदामानः, गुरुम्=आचार्यं सान्दीपनिम्, अभिवन्दितवन्तः=अभिवादनमकार्षुः। हि=निश्चयेन, त्वम्=भवान् आचार्य एव, नः=अस्माकम्, पिता=रक्षकः। त्वम्=आचार्यः एव, अस्मान्=त्रीन् छात्रान्, विद्यायाः परं पारं तारयसि=विद्यासमुद्रस्यापरं तटं प्रापयसि इति। इमे त्रयः=श्रीकृष्णबलरामसुदामानः, स्नातकाः=लब्धविद्याः, शोभनाभिः= मनोज्ञाभिः, मालाभिः=स्रग्भिः, आचार्यम्=सान्दीपनिम्, अलङ्कृतवन्तः।

(२१) सान्दीपनिः समावर्तन-प्रवचनं कृतवान्—सत्यं वद। धर्मं चर। स्वाध्यायात् मा प्रमदः। आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्। देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। यान्यनवद्यानि कर्माणि, तानि सेवितव्यानि। नो इतराणि। यान्यस्माकं सुचरितानि, तानि त्वयोपास्यानि। नो इतराणि। ""एष आदेशः। एष उपदेशः। एषा वेदोपनिषत्। एतदनुशासनम्। एवमुपासितव्यम्।

सन्दर्भः—पूर्ववत्।

प्रसङ्गः—अस्मिन् अनुच्छेदे 'द्वा सुपर्णा' ग्रन्थस्य लेखकः श्रीरामजी-उपाध्यायः स्नातकेभ्यो महर्षिणा सान्दीपनिना क्रियमाणं समावर्तनप्रवचनं वर्णयति।

व्याख्या—सान्दीपनिः=उज्जयिनीगुरुकुलस्याचार्यः, समावर्तनप्रवचनम् =समावर्तनसंस्कारसम्पादनकाले क्रियमाणं विशिष्टं प्रवचनम्, कृतवान्= अकार्षीत्। सत्यं वद=मृषाभाषणं मा कृथाः इत्यर्थः। धर्मं चर=धर्मस्य पालनं कर्तव्यम्, स्वाध्यायात्=वेदाध्ययनात्, मा=नहि, प्रमदः=प्रमादः, करणीयः। आचार्याय=विद्याध्यापनकर्त्रे, प्रियम्=अभीष्टम्, धनम्= सम्पत्तिम्, आहृत्य=प्रदाय, प्रजातन्तुम्=सन्तानपरम्पराम्, मा=नहि, व्यवच्छेत्सीः=व्यवच्छिन्नां कुरु। सत्यात्=सत्यभाषणात्, न=नहि, प्रमदितव्यम्=प्रमादः करणीयः। धर्मात्=धर्माचरणात्; न=नहि, प्रमदितव्यम्=

प्रमादः करणीयः । कुशलात् = सौख्यात्, न = नहि, प्रमदितव्यम् = प्रमादः करणीयः । भूत्यै = कल्याणाय, न = नहि, प्रमदितव्यम् = प्रमादः कर्तव्यः । स्वाध्यायप्रवचनाभ्याम् = वेदाध्ययनात् तस्य प्रवचनकरणाच्च, न = नहि, प्रमदितव्यम् = प्रमादः करणीयः । देवपितृकार्याभ्यां = देवाराधनपित्राराधनोपयोगिकार्याभ्याम्, न = नहि, प्रमदितव्यम् । मातृदेवः = माता देवता यस्य तथाविधः त्वं भव । पितृदेवो भव = पिता देवता यस्य सः तथाविधः त्वं भव । आचार्यदेवः = आचार्यं देवतुल्यं सम्मानय, यानि, अनवद्यानि = दोषरहितानि कर्माणि, तानि = कर्माणि, त्वया = सुदाम्ना, सेवितव्यानि = अनुष्ठातव्यानि, इतराणि = अनवद्यव्यतिरिक्तानि तु कर्माणि, नो = नहि, सेवितव्यानि, यानि, अस्माकम् = आचार्याणाम्, सुचरितानि = सुष्ठ्वाचरणानि, तानि = आचरणानि, त्वया = सुदाम्ना, उपास्यानि = अनुष्ठातव्यानि, नो इतराणि = न तु तद्व्यतिरिक्तानि आचरणानि । एषः = अयम्, आदेशः = ममाज्ञा, एषः = अयमेव, उपदेशः, एषा = इयमेव, वेदोपनिषत् = ज्ञानस्य सारांशः । एतत् = इदमेव, ममानुशासनम् = ममाज्ञा, एवम् = अनेनैव प्रकारेण, उपासितव्यम् = उपासना कर्तव्या ।

(२२) सुदामानं सम्बोध्य सान्दीपनिर्विशेषतरं प्रोक्तवान्—'शुश्रूषवे ब्राह्मणाय ब्रह्म सदा देयम् । अयं वेदो विस्तार्यताम् । शिष्याः सुकरणीये एव नियोगे नियोज्याः । नित्यमेव वेदाध्ययनं त्वया करणीयम् । तव प्रयत्नेन सर्वे दुर्गाणि तरन्तु सर्वे भद्राणि पश्यन्तु च । कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान् विदधदात्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्याहिंसन् सर्वभूतानि त्वं खलु एवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसम्पद्यसे । न पुनरावर्तनाय ।'

सन्दर्भः—पूर्ववत् ।

प्रसङ्गः—अस्मिन् अनुच्छेदे द्वासुपर्णाग्रन्थस्य लेखको वक्ति यत् सुदामानं समावर्तनसंस्कारेण संस्कृत्य आचार्यो जीवने अनुष्ठेयं च गार्हस्थ्यानुकूलमुपदिश्य, आचार्यत्वाय तस्मै उपादिशत् यत्, उदासीनाय पुरुषाय विद्या न हि प्रदेया । आजीवनं त्वया वेदाध्ययनं कर्तव्यम् । शुचिदेशे एव वेदाध्यापनं कर्तव्यम्, न तु यत्र कुत्रचित् । एवम् आजीवनं कर्माणि कुर्वन् पुरुषः ब्रह्मलोकमभिसम्पद्यते ।

व्याख्या—सुदामानम्, उपर्युक्तप्रकारेण, सम्बोध्य = बोधयित्वा, सान्दीपनिः = आचार्यः, विशेषतरम् = विशेषरूपेण, प्रोक्तवान् = प्रावोचत्—शुश्रूषवे = श्रोतुमिच्छुकाय, ब्राह्मणाय, ब्रह्म = ज्ञानम्, सदा = सर्वदा, देयम् = प्रदेयम् । अयम् = एषः, वेदः = ऋग्यजुस्सामाथर्वाख्यः, विस्तार्यताम् = विस्तृतिमेतु । शिष्याः = छात्राः, सुकरणीये = सम्यग्रूपेण करणीये एव, नियोगे = कर्मणि,

नियोज्याः = नियोक्तव्याः । त्वया = सुदाम्ना, नित्यमेव = सर्वदैव, वेदाध्ययनम् = वेदानामध्ययनम्, करणीयम् । तव = सुदाम्नः, प्रयत्नेन = प्रयासेन, सर्वे = जनाः, दुर्गाणि = अतिकठिनानि कर्माणि, तरन्तु = पारं यान्तु, च = किञ्च, सर्वे = जनाः, भद्राणि = कल्याणानि, पश्यन्तु = लभन्ताम् । कुटुम्बे = परिवारे, शुचौ = पवित्रे, देशे = स्थाने, स्वाध्यायम् = वेदम्, अधीयानः = अध्ययनं कुर्वाणः जनान्, धार्मिकान् = धर्मपरायणान्, विदधत् = कुर्वन्, आत्मनि, सर्वेन्द्रियाणि = सर्वाणि करणानि, सम्प्रतिष्ठाप्य = संस्थाप्य, सर्वभूतानि = निखिलजीवान्, अहिंसनः = नहि सन्तापयन्, त्वम् = सुदामा, खलु=निश्चयेन, एवम् = अनेन प्रकारेण, वर्तयन् = सर्वाणि कर्माणि कुर्वन्, यावदायुषम् = आजीवनम्, ब्रह्मलोकम् = परमात्मलोकम्, अभिसम्पद्यसे = प्राप्स्यसि, न पुनरावर्तनाय = येन त्वमस्मिँल्लोके नागच्छेः ।

(२३) 'अद्य समावर्तन-दिवसः सान्दीपनेः स्नातकानाम्' इति प्रतिवर्षानुसारं तेषामभिनन्दनाय उज्जयिनीवासिभिर्महोत्सवस्यायोजनं महाकालमन्दिरस्य प्राङ्गणे समारब्धम् । सान्दीपनेः आश्रमादारभ्य उज्जयिनीपर्यन्तं मार्गः सविशेषं समवतंसितः । उज्जयिन्यां सर्वत्र विचित्रवर्णैः तोरणैर्ध्वजच्छायैश्च राजपथानां मनोज्ञता सम्पादिता । समृद्धानां निर्धनानां वा सर्वेषां प्रतिगृहं स्वागतदीपा उपस्थापिताः । आबालवृद्धं जनानां हृदये स्नातकानां दर्शनार्थं पराकाङ्क्षा संववृधे ।

सन्दर्भः—पूर्ववत् ।

प्रसङ्गः—अस्मिन् अनुच्छेदे 'द्वा सुपर्णा' ग्रन्थस्य लेखको वक्ति यत् श्रीकृष्णबलरामसुदाम्नां समावर्तनदिवसे समागते तेषामभिनन्दनं कर्तुम् उज्जयिन्याः सर्वे जनाः स्वागतदीपानकल्पयन् प्रारब्धश्च महोत्सवं महाकालस्य मन्दिरे, उज्जयिन्याः सर्वे मार्गाः सविशेषं समलङ्कृताः । सर्वे जनाः स्नातकानां दर्शनाकाङ्क्षा सञ्जाता ।

व्याख्या—अद्य समावर्तनदिवसः = समावर्तनसंस्कारस्य दिनं वर्तते, सान्दीपनेः = आचार्यस्य, स्नातकानाम् = अधीतविद्यानां छात्राणाम्, इति = एतस्मादेव कारणात्, प्रतिवर्षानुसारम् = प्रतिवर्षानुसारेण, तेषाम् = स्नातकानाम्, अभिनन्दनाय = स्वागतं व्याहर्तुम्, उज्जयिनीवासिभिः = उज्जयिन्याः निवासिभिः, महोत्सवस्य आयोजनम् = महोत्सवसम्माननूसूत्र प्रारम्भणम्, महाकालमन्दिरस्य, प्राङ्गणे = अङ्गे, समारब्धम् = प्रारब्धम् । सान्दीपनेः =

आचार्यस्य, आश्रमात् = आश्रमपदात्, उज्जयिनीनगरपर्यन्तम् । मार्गः = पन्थाः, सविशेषम् = विशेषरूपेण, समवतंसितः = समलङ्कृतः । उज्जयिन्याम् = उज्जयिनीनगर्याम्, सर्वत्र = सर्वेषु स्थलेषु, विचित्रवर्णैः = नानावर्णकैः, तोरणैः, ध्वजच्छायैश्च = पताकानां छायाभिश्च, राजपथानाम् = राजमार्गाणाम्, मनोज्ञता = सौन्दर्यम्, सम्पादिता = कृता । समृद्धानाम् = धनिकानाम्, वा = अथवा, निर्धनानाम् = दरिद्राणाम्, सर्वेषाम् = सकलानां जनानाम्, प्रतिगृहम् = प्रतिवेश्म, स्वागतदीपाः = समादरप्रदीपाः, उपस्थापिताः = उपकल्पिताः । आबालवृद्धम् = सकलानाम्, जनानाम् = मनुष्याणाम्, हृदये = अन्तःकरणे, स्नातकानाम् = अधीतविद्यानां श्रीकृष्णबलरामसुदाम्नाम्, दर्शनार्थम् = अवलोकनार्थम्, पराकाङ्क्षा = अत्यधिकाभिलाषा, संववृधे = वर्द्धिताऽभूत् ।

(२४) आचार्यैः सह स्नातकानां यात्रा राजपथे समारब्धा । तत्र दर्शनोत्सुकजनानां सम्मर्दो बभूव । सर्वाणि कार्याणि परित्यज्यापि पुरसुन्दर्यः कृष्णप्रमुखाणां स्नातकानां दर्शनार्थं सौधानामालोकनमार्गेषु निश्चलमात्मानं सन्निवेशयामासुः । उज्जयिनी तु महोच्चैः चलध्वजैरेव तेषामालोकनार्थं समुत्सुकेव परिस्फुरितवती ।

साङ्गवेदविद्याविषु पारङ्गतः उज्जयिनीपतिर्महर्षेः सान्दीपनेः अन्तेवासी आसीत् । स प्रतिवर्षं समावर्तन-दिवसे स्वयं स्नातकानामाचार्याणां च सम्मानं कृत्वात्मानं बहुमन्यत । 'स्नातकानां यात्राविदूरं समागता' इति विज्ञाय तेषामर्चनार्थं हिरण्मयपात्रेऽर्घ्यं निधाय स नगरद्वारं प्रत्युज्जगाम । प्रणत एव स तेषां सर्वेषामाचार्याणां स्नातकानां च पूजां स्वहस्तेन विधिवत् सम्पादितवान् ।

सन्दर्भः—पूर्ववत् ।

प्रसङ्गः—अस्मिन् अनुच्छेदे 'द्वा सुपर्णा' ग्रन्थस्य लेखको वक्ति यत्—अधीतविद्यानां श्रीकृष्णबलरामसुदाम्नाम् आचार्येण साकं समावर्तनसंस्कारमहोत्सवस्य यात्रा प्रारब्धाऽभूत् । दर्शनोत्सुकानां जनानां राजमार्गे सम्मर्दो बभूव । महर्षेः सान्दीपनेः शिष्यः उज्जयिन्याः महीपतिः तेषां स्नातकानां स्वाचार्यस्य समर्चा सविधि विहितवान् ।

व्याख्या—आचार्यैः सह स्नातकानाम्=श्रीकृष्णबलरामसुदाम्नाम्, यात्रा = महोत्सवयात्रा, राजपथे = राजमार्गे, समारब्धा = प्रारब्धाऽभूत् । तत्र = राजमार्गे, दर्शनोत्सुकजनानाम् = दर्शनायोत्कण्ठितानां जनानाम्, सम्मर्दः बभूव = अभूत् । सर्वाणि = निखिलानि, कार्याणि = कर्माणि, परित्यज्यापि=सन्त्यज्यापि,

पुरसुन्दर्यः = नगरस्त्रियः, कृष्णप्रमुखानाम् = कृष्णप्रधानानाम्, स्नातकानाम् = अधीतविद्यानाम्, दर्शनार्थम् = अवलोकनार्थम्, सौधानाम् = भवनानाम्, आलोकनमार्गेषु = दर्शनपथेषु, निश्चलम् = निश्चेष्टम्, आत्मानम् = स्वम्, सन्निवेशयामासुः = स्थापयामासुः। उज्जयिनी = नगरी तु, महोच्चैः = अत्युच्चैः, चलध्वजैरेव = चञ्चलपताकैः एव, तेषाम् = स्नातकानाम्, आलोकनार्थम् = दर्शनार्थम्, समुत्सुकेव = समुत्कण्ठिते, परिस्फुरितवती = प्रचकाशे।

साङ्गवेदविद्यादिषु = सकलेषु शास्त्रेषु, पारङ्गतः = निष्णातः, उज्जयिनीपतिः = उज्जयिन्या अधिपतिः, महर्षेः सान्दीपनेः = आचार्यस्य, अन्तेवासी = छात्रः, आसीत्। सः = उज्जयिनीपतिः, प्रतिवर्षम् = प्रत्येकसंवत्सरम्, समावर्तनसंस्कारस्य दिने, स्वयम् = आत्मना, स्नातकानाम् = अधीतविद्यानां छात्राणाम्, आचार्याणाम्=गुरूणां च, सम्मानम्=समादरणम्, कृत्वा = संविधाय, आत्मानम् = स्वम्, बहु = अत्यधिकम्, अमन्यत = मन्यतेस्म। स्नातकानाम् = अधीतविद्यानां छात्राणाम्, यात्रा अविदूरम् = सन्निकटम्, समागता = आगतवती। इति = अनेन प्रकारेण, विज्ञाय = ज्ञात्वा, तेषाम्=स्नातकानाम् आचार्याणाञ्च, अर्चनार्थम्=पूजनार्थम्, हिरण्मयपात्रे = स्वर्णरचिते पात्रे, अर्घ्यम्, निधाय = संस्थाप्य, सः = राजा, नगरद्वारम्, प्रत्युज्जगाम = प्रत्यागतवान्। प्रणत एव = अतिविनत एव, सः = राजा, तेषाम् = उपर्युक्तानाम्, सर्वेषाम् = सकलानाम्, आचार्याणाम् = गुरूणाम्, स्नातकानाम् = अधीतविद्यानां छात्राणां च, पूजाम् = समर्चाम्, स्वहस्तेन = निजपाणिना, विधिवत् = विधिपूर्वकम्, सम्पादितवान् = कृतवान्।

(२५) सान्दीपनेः प्रभावात् समुन्नताः समुत्साहिताश्चासङ्ख्येया नागरिका महाकालमन्दिराजिर-सभायां समागताः। महर्षेः संवासेन नगरस्य गौरवं मन्यमाना दीनाः समृद्धिशालिनश्च सर्वे सङ्ख्यानसीमातिगं धनमाश्रम-संवर्धनार्थोपहृतवन्तः। नागरिकप्रमुखाश्च माल्यादिभिर्भोजनोपायनैश्च स्नातकानां सम्मानं कृतवन्तः। सान्दीपनिः महाकालेश्वरस्य महिमानमधिकृत्य नागरिकाणां स्नातकानां च पुर उपन्यासं विदधे। सर्वे स्नातका महाकालमर्चितवन्तः। उज्जयिन्या वैभवं प्रथमवारमेव दृष्ट्वा प्रायशः स्नातका भारतवसुन्धराया वैभवेन भृशं व्यस्मयन्त।

सन्दर्भः—पूर्ववत्।

प्रसङ्गः—अस्मिन् अनुच्छेदे 'द्वासुपर्णा' ग्रन्थस्य लेखको वक्ति यत् महर्षेः सान्दीपनेः प्रभावेण प्रभावितो नगरस्य समे जनाः महाकालमन्दिरस्य प्राङ्गणे समायोजिते सुदामाश्रीकृष्णबलरामाणां समावर्तनमहोत्सवे समागतवन्तः बहूनि वस्तूनि प्रादुः। स्नातकाश्च महाकालमर्चितवन्तः दृष्ट्वा च उज्जयिन्या वैभवं व्यस्मयन्त।

व्याख्या—सान्दीपनेः=आचार्यस्य, प्रभावात्=महिम्नः, समुन्नताः=अत्युन्नताः, समुत्साहिताश्च=अत्यन्तोत्साहयुक्ताश्च, असङ्ख्येयाः=असङ्ख्याः, नागरिकाः=पौरजनाः, महाकालमन्दिराजिरसभायाम्=महाकालमन्दिरप्राङ्गणपरिषदि, समागताः=आगतवन्तः। महर्षेः=सान्दीपनेः, संवासेन=सहवासेन, नगरस्य=उज्जयिनीनगर्याः, गौरवम्=महत्त्वम्, मन्यमानाः=उररीकुर्वन्तः, दीनाः=निर्धनाः पुरुषाः, समृद्धिशालिनश्च=धनिकाश्च, सर्वे=जनाः, सङ्ख्यानसीमातिगम्=निस्सीमम्, धनम्=सम्पत्तिम्, आश्रमसंवर्धनाय=आश्रमस्याभ्युन्नतये, उपहृतवन्तः=आनीतवन्तः। नागरिकप्रमुखाश्च=नागरिकप्रधानाश्च जनाः, माल्यादिभिः=स्रगादिभिः। भोजनोपायनैश्च=भोजनोपहारैश्च, स्नातकानाम्=अधीतविद्यानां छात्राणाम्, सम्मानम्=समादरणम्, कृतवन्तः=सम्पादितवन्तः। सान्दीपनिः=आचार्यः, महाकालेश्वरस्य=भगवतः शङ्करस्य, महिमानम्=ऐश्वर्यम्, अधिकृत्य=विषयीकृत्य, नागरिकाणाम्=पौराणाम्, स्नातकानाम्=अधीतविद्यानां छात्राणां च, पुरः=समक्षम्, उपन्यासम्=उपक्रमम्, विदधे=कृतवान्।

सर्वे=सकलाः, स्नातकाः=अधीतविद्याः जनाः, महाकालम्=भगवन्तं शङ्करम्, अर्चितवन्तः=पूजितवन्तः। उज्जयिन्याः=नगर्याः, वैभवम्=ऐश्वर्यम्, प्रथमवारमेव=प्रप्रथमम्, दृष्ट्वा=अवलोक्य, प्रायशः=प्रायेण, स्नातकाः, भारतवसुन्धरायाः=भारतभूमेः, वैभवेन=ऐश्वर्येण, भृशम्=अत्यधिकम्, व्यस्मयन्त=आश्चर्यचकिता अभूवन्।

अनुवाद

(१) प्रश्नः—निम्नाङ्कितानां वाक्यानां संस्कृतेऽनुवादं कुरुत ।
(सं० सं० वि० १९८५)

१. मुझे घर जाना चाहिए = मया गृहं गन्तव्यम् ।
२. तुम कब फल खाओगे ? = त्वं कदा फलं भोक्ष्यसे ?
३. भारत एक महान् देश है = भारतः एको महान् देशः ।
४. वर्षाकाल में मोर नाचते हैं = वर्षाकाले मयूराः नृत्यन्ति ।
५. छात्र विद्यालय आते हैं = छात्राः विद्यालयम् आगच्छन्ति ।
६. राम के साथ मोहन भी गया = रामेण सह मोहनोऽपि गतवान् ।
७. चरित्रबल से सफलता मिलती है = चरित्रबलेन सफलता लभ्यते ।
८. घर के चारों ओर लताएँ हैं = गृहं परितः लताः सन्ति ।
९. माता-पिता की सेवा करो = मातापित्रोः सेवां कुरु ।
१०. जब तक पढोगे तब तक स्वतन्त्र रहोगे = यावत्कालं पठिष्यसि तावत्-कालं स्वतन्त्रो भविष्यसि ।

(२) प्रश्नः—निम्नाङ्कितानि वाक्यानि संस्कृतेऽनुद्यताम् ।
(सं० सं० वि० वि० १९८७)

१. छात्र ब्राह्म मुहूर्त में जागकर पढ़ते हैं = छात्राः ब्राह्मे मुहूर्ते उत्थाय पठन्ति ।
२. सदा सच बोलो = सर्वदा सत्यं वद ।
३. हमारा विद्यालय नगर में है = अस्माकं विद्यालयो नगरे वर्तते ।
४. चैत्र-नवरात्र से वर्ष आरम्भ होता है = चैत्रनवरात्रात् वर्षारम्भो भवति ।
५. देवदत्त दौड़ते हुए घोड़े से गिरता है = देवदत्तः धावतः अश्वात् पतति ।
६. पिता पुत्र के साथ जाता है = पिता पुत्रेण सह याति ।
७. वाराणसी में तीन विश्वविद्यालय हैं = वाराणस्यां त्रयो विश्वविद्यालयाः सन्ति ।
८. संस्कृत पढ़ना आवश्यक है = संस्कृताध्ययनमावश्यकमस्ति ।
९. भारत धर्मप्रधान देश है = भारतो धर्मप्रधानो देशोऽस्ति ।

१०. प्राणायाम करने से स्वास्थ्य अनुकूल रहता है = प्राणायामेन स्वास्थ्यमनुकूलं भवति ।

(३) प्रश्नः—निम्नाङ्किताना वाक्यानां संस्कृतेऽनुवादं कुरुत ।
(सं० सं० वि० वि० १९८८)

१. लड़के मैदान में खेलते हैं = बालकाः क्रीडास्थले क्रीडन्ति ।

२. सत्य ही ईश्वर है = सत्य एव ईश्वरः ।

३. भाग्य से धन मिलता है = भाग्येन धनं लभ्यते ।

४. परिश्रम से विद्या प्राप्त होती है = परिश्रमेण विद्या प्राप्यते ।

५. गुरु को नमस्कार करके पाठ पढ़ना चाहिए = गुरुं नमस्कृत्य पाठारम्भः करणीयः ।

६. वृक्ष से पत्ते गिरते हैं = वृक्षात् पत्राणि पतन्ति ।

७. वह दुष्ट किस दिशा में भाग गया ?=सो दुष्टः कस्यां दिशायां पलायितः ?

८. पूज्य महर्षि गौतम जी कहाँ हैं ? = पूज्यो महर्षिः गौतमः कुत्रास्ति ?

९. मैं एक मास बाद काशी जाऊँगा=अहम् मासानन्तरं काशीं गमिष्यामि ।

१०. भारत कृषिप्रधान देश है = भारतः कृषिप्रधानो देशोऽस्ति ।

(४) प्रश्नः—निम्नाङ्किताना वाक्यानां संस्कृतेऽनुवादं कुरुत ।

१. राम घर जाता है = रामो गृहं याति ।

२. मोहन निबन्ध लिखता है = मोहनो निबन्धं लिखति ।

३. सीता गीत गाती है = सीता गीतं गायति ।

४. वह बाण से मृग को मारता है = सो बाणेन मृगं हन्ति ।

५. दुष्यन्त शकुन्तला को प्रेम से देखता है = दुष्यन्तः शकुन्तलां प्रेम्णा पश्यति ।

६. अनुसूया प्रियंवदा से स्नेह करती है = अनुसूया प्रियंवदायै स्निह्यति ।

७. राक्षस देवताओं से द्रोह करते हैं = राक्षसा देवेभ्यो द्रुह्यन्ति ।

८. वह श्वसुर से लज्जा करती है = सा श्वशुराज्जिह्रेति ।

९. पापी पाप करता है = पापी पापं करोति ।

१०. भारत धर्मप्राण देश है = भारतो धर्मप्राणो देशः ।

११. दिलीप अयोध्या के राजा थे = दिलीपः अयोध्यायाः राजा आसीत् ।

१२. सुदक्षिणा दिलीप की पत्नी का नाम था = सुदक्षिणा दिलीपस्य पत्न्याः नाम आसीत् ।
१३. राम और श्याम पढ़ते हैं = रामश्यामौ पठतः ।
१४. मोहन, सोहन और रमेश हँसते हैं = मोहन-सोहन-रमेशाः हसन्ति ।
१५. वह चोर से डरता है = सः स्तेनाद् बिभेति ।
१६. लाल फूल विकसित हुए हैं = रक्तानि पुष्पाणि विकसितानि सन्ति ।
१७. काली गाय खेत में चरती है = कृष्णा-गौः क्षेत्रे चरति ।
१८. उजला घोड़ा दौड़ता है = श्वेतः अश्वो धावति ।
१९. गायों में काली गाय बहुत दूध देती है = गोषु कृष्णा-गौः बहुक्षीरवती ।

निबन्ध

(१) प्रश्नः—निम्नाङ्कितेषु कमपि विषयमेकमाश्रित्य स्वसंस्कृतेन निबन्धं लिखत ।

१. व्यायामः, २. विद्यार्थिजीवनम्, ३. समाचारपत्रम्, ४. दीपमालिका, ५. होलिकोत्सवः, ६. वाराणसी, ७. म...योगः, ८. श्रीरामजन्मभूमिविवादः, ९. संस्कृतभाषा, १०. मम प्रियतमो ग्रन्थः, ११. गङ्गानदी, १२. संस्कृतविश्वविद्यालयः, १३. मम विद्यालयः ।

(१) व्यायामः

स्वजीवनस्य सर्वेषां कार्याणां सुचारुरूपेण सञ्चालनाय जीवनस्वास्थ्यम् अत्यन्तावश्यकं विद्यते । विना स्वास्थ्यं जीवनस्य किमपि कार्यं सेद्धुं नार्हति । स्वास्थ्यसंवर्द्धनस्य साधनेषु व्यायामो महतीं भूमिकां निर्वहति । व्यायामेन द्वारा नैकविधाः रुजः अपाकृता भवन्ति । शरीरं सुदृढं भवति । अशितं पीतञ्चान्नपानादिकं परिपक्वतां याति । येन शरीरे रक्तसञ्चारोऽपि सम्यग्रूपेण भवति ।

इदं प्रायेणोच्यते समीक्षकैः यत्—'स्वस्थ एव शरीरे स्वस्थं मस्तिष्कं निवसति, येन मनुष्यो बौद्धिकानि कार्याण्यपि सम्यक्तया सम्पादयितुं सक्षमो भवति । शरीरस्य स्वास्थ्यञ्च व्यायामेन प्रतिबद्धम् । अत एव बौद्धिकानामपि कार्याणां सम्यक्तया निर्वर्तनाय व्यायाम आवश्यको भवति ।

व्यायामोऽयं सामान्यतया द्वेधा विभक्तुं शक्यते—दीर्घो व्यायामः सामान्यो व्यायामश्च । दीर्घा... व्यायामाः बलिष्ठत्वमल्लत्वादिजनकाः भवन्ति, किन्तु सामान्यस्य व्यायामस्य सामान्यरूपेण स्वास्थ्यसंरक्षणपूर्वकं शरीरे नैरुज्यतापादनमेव परमं प्रयोजनम् । दीर्घेषु व्यायामेषु कुश्ती इत्यादिकानि कर्माणि सन्ति, एतेन शरीरं सुदृढं भवति, जनाः मल्लाः सन्तो विख्यातेः परां काष्ठां चुम्बन्ति । परन्तु सामान्यव्यायामे तु प्रातःकालिकं भ्रमणम्, यौगिकाः व्यायामादिकाश्च सन्ति । एभिः कर्मभिः शरीरं स्वस्थं तु भवति, परञ्चेभिः कर्मभिः मल्लत्वादिकं तु असम्भवं वर्तते । यौगिकान् व्यायामान् कृत्वा मनुष्यः अहोरात्रमुत्साहमनुभवति । एतेषां शरीरस्वास्थ्यप्रयोजकानां व्यायामानामनुष्ठानविधिः

दूरदर्शनेनापि प्रसार्यंते, तेन च व्यायामं चिकीर्षतां कर्म सुकरं भवति। जनाः गृहेषूपविश्यैव व्यायामानुष्ठानप्रक्रियां सरलतया अवगच्छन्ति।

व्यायामं चिकीर्षद्भिः प्रतिदिनं व्यायामं कर्तव्यम्। दिनस्यैकस्यापि व्यवधानं महतेऽनभ्यासाय जायते। अत एव व्यायामानुष्ठाने सावधानेन भाव्यम्।

(२) विद्यार्थिजीवनम्

मानवजीवनं सामान्यतया चतुर्षु विभागेषु विभक्तो वर्तते प्राचीनैः मनीषिभिः। ब्रह्मचर्यकालः, गार्हस्थ्यकालः, वानप्रस्थकालः संन्यासकालश्च। इमे एव भारतीयैः मनीषिभिः चत्वारो विभागाः कृताः। अस्मिन् विभागे प्रथमो विभागः ब्रह्मचर्यकालो विद्यते। अस्मिन् काले मनुष्यः ब्रह्मचर्यपालन-पूर्वकं, विद्याया अध्ययनं करोति। गृहस्थाश्रमे मनुष्यः दारग्रहणं कृत्वा वेदविहितानां कर्मणामनुष्ठानं करोति। वानप्रस्थाश्रमी तु पत्नी-पुत्रान् परित्यज्य वनेषु भगवतः स्मरणं कुर्वन्ति। संन्यासं स्वीकृत्य जनः सर्वेषां सकामानां कर्मणामनुष्ठानं परित्यज्य भगवदेकप्रीत्यर्थं सर्वाणि कर्माणि कुर्वन् नित्यकर्मणामनुष्ठानं निर्वहन्ति।

आसीत् कश्चनापि कालविशेषः यदा समे बालकाः यज्ञोपवीतसंस्कारानन्तर-मनिवार्यतया गुरोराश्रमेषु गत्वा विद्याया अध्ययनं कुर्वन्ति स्म। अत एव प्राह श्रुतिः—'अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयेत्।' इति। तथा चाह भगवान् मनुः—

'श्रावण्यां प्रौष्ठपद्यां वा उपाकृत्य यथाविधिः।
युक्तश्छन्दांस्यधीयीत मासान् विप्रोऽर्द्धपञ्चमान्॥' इति।

ब्रह्मचर्याश्रमे विद्याध्ययनोपयोगिनां नियमानां पालनमावश्यकमासीत्। राजपुत्राः दरिद्रपुत्राश्च समे गुरोः आश्रमं समानरूपेण सेवनमकार्षुः। राज्ञो पुत्रः श्रीकृष्णो दरिद्रब्राह्मणस्य पुत्रः सुदामा च गुरोः सान्दीपनस्याश्रमम् असेवन्त।

परञ्च साम्प्रतिके भारते इयमाश्रमव्यवस्था विच्छिन्नप्राया जाता। न क्वापि दृश्यन्ते आचार्याणामाश्रमाः। साम्प्रतं विद्यालयानाम् महाविद्यालयानां विश्वविद्यालयानां परम्परा दृश्यते। सर्वत्र सर्वकारीया व्यवस्था प्रचलति। अध्यापकाः सर्वकारेण द्वारा नियुक्ता भवन्ति। सर्वकारेण द्वारा दीयमानेन वेतनेन द्वारा जीवनं यापयन्ति। छात्राः विद्यालयेषु प्राथमिकेषु, माध्यमिकेषु विद्यालयेषु तथा महाविद्यालयेषु च प्रवेशं प्राप्य आधुनिकानां प्राचीनानां च विषयाणां शिक्षां लभन्ते।

विद्यार्थिजीवनं मानवजीवनस्यातीव महत्त्वपूर्णं जीवनं भवति। सततं सावधानतया समनोयोगं विद्याया अध्ययनमेवास्या जीवनकालस्य चरमं लक्ष्यं भवति। केनापि समीक्षकेणाभिहितमपि—

'क्षणशः कणशश्चैव विद्यामर्थं च चिन्तयेत्।
क्षणस्त्यागे कुतो विद्या कणस्त्यागे कुतो धनम् ॥'

अस्मिन् काले सम्यक्तया विद्याया अध्ययनं कृत्वा मनुष्यो विद्वान् भवति, लभते चातुलाम् आजीवनं सुखप्रदां ख्यातिम्। विद्वान् मनुष्यः सर्वत्रैव समादृतो भवति। केनचनाभिहितम्—

'विद्वत्वं च नृपत्वं च नैव तुल्ये कदाचन।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ॥'

परञ्चेदं वैदुष्यं तेनैव लब्धुं शक्यते यः सावधानतया विद्याया अध्ययनं करोति। अत एव विद्यार्थिजीवनं जीवनस्य स्वर्णकालो भवतीति सुतरां वक्तुं शक्यते। अत एवास्मिन् काले मनुष्यो सावधानेन भाव्यम्।

(३) समाचारपत्रम्

वर्तमाने विवादबहुले वैज्ञानिके युगे समाचारपत्राणां भूमिका कियती महत्त्वमयी विद्यते इति तु सामान्यतया वक्तुं न शक्यते। यद्यपि सन्ति प्रचार-साधनानि बहूनि—आकाशवाणी-दूरदर्शनादीनि, परञ्च समाचारपत्रं तु तानि सर्वाणि प्रचारसाधनानि अतिशेरते। यतो हि आकाशवाण्या वा दूरदर्शनेन तेषां समेषां घटनानां सङ्कलनं सर्वथा असम्भवो वर्तते या या घटनाः तत्र तत्र सर्वत्र सङ्घटिता भवन्ति। तासां सर्वासां घटनानां सङ्कलनं तु समाचार-पत्रस्यैव माध्यमेन सम्भवो वर्तते। समाचारपत्रेण द्वारा मनुष्यः तासां सर्वासां घटनानां विवरणं विस्तरेणाधिगन्तुं समर्थो भवति।

समाचारपत्रस्येदमप्येकं प्रयोजनं वर्तते यत् समये समये सञ्जातानां घटनानां समीक्षणमपि तेन क्रियते, ताः घटनाः सर्वकारेण कृता भवेयुः अथवा समाजेन द्वारा कृताः भवेयुः, पत्रकारास्तु तटस्था भवन्ति। निष्पक्षपातेनैव घटनानां समीक्षणं प्रकाशनं वा समाचारपत्राणामेकम् महत्त्वपूर्णं दायित्वं भवति। समाचारपत्राणां माध्यमेन बहूनां विषयाणां समाधानं सुतरां सरलतयैव सम्पद्यते। समाचारपत्राणां माध्यमेन अनेके महान्तो विद्वांसो स्वीयानां विचाराणां प्रकाशनं कृत्वा लोकान् स्वविचारेण अवगतान् कारयन्ति। अनेन

माध्यमेन लोकाः वर्तमानघटनाचक्रेण अवगताः भवन्ति । प्रजातन्त्रे तु समाचारपत्रम् एकं सशक्तं साधनमास्ते प्रचारस्य ।

समाचारपत्रेषु केवलं घटनानामेव विवरणं नह्युपलभ्यते अपितु सामाजिकानाम्, आध्यात्मिकानां सांस्कृतिकानामपि विषयकाणां निबन्धानामुपलब्धिर्भवति । समये समये वर्तमानसाहित्ये समुपलभ्यमानप्रवृत्तेः प्रकाशिकानां लघुकथानाम्, बृहत्कथानामपि दर्शनं समाचारपत्राणाम् माध्यमेन सञ्जायते । विविधविषयाणां विज्ञापनादिकस्यापि विज्ञप्तिः समाचारमाध्यमेन सम्भवति । अत एव समाचारपत्रं वर्तमानकालिकीस्वावश्यकतासु प्रधानतमा वर्तते ।

समाचारपत्राणि साम्प्रतं बहुप्रकारकाणि प्रकाशितानि भवन्ति । दैनिकानि समाचारपत्राणि, साप्ताहिकानि समाचारपत्राणि पाक्षिकानि च समाचारपत्राणि । किञ्च साम्प्रतं नास्ति काचनापि प्रख्याता भाषा विश्वस्य यस्यां दैनिकं समाचारपत्रं साप्ताहिकं वा समाचारपत्रं नो भवेत् प्रकाशितम् । एतदेव नही बह्वयः उपभाषा अपि वर्तन्ते यासु दैनिकानामपि समाचारपत्राणां प्रकाशनं भवति, का कथा साप्ताहिकानां पाक्षिकाणां समाचारपत्राणाम् । समाचारपत्राणाम् एतादृब्धः प्रचार एव साम्प्रतिके विश्वे समाचारपत्राणाम् अनिवार्यावश्यकतामुद्घोषयति ।

(४) दीपमालिका

भारतवर्षीयेषु बहुषूत्सवेषु दीपमालिका नामक उत्सवः अन्यतमं स्थानं बिभर्ति । अस्योत्सवस्य दीपावलीति अपरं नाम । यदा चतुर्षु मासेषु भवति समाप्तिः वर्षायाः, भारतीया वसुन्धरा नवीनेन सस्येन च भवति परिपूर्णा, धान्यानि नवान्नैः परिपूर्णानि च भवन्ति क्षेत्रेषु कृषकाः महान्तम् मोदमनुभवन्ति यदा स्वान्तःसु तदैवायं दीपमालिकायाः समुत्सवः सम्मान्यते जनैः ।

दीपमालिकोत्सवः कार्तिकमासस्य अमावस्याया रात्रौ सम्मान्यते । जनाः नवीनानि वस्त्राणि सन्धार्य स्वानि गृहाणि च नैकधा समलङ्कृत्य सायाह्नि भगवत्याः लक्ष्म्याः पूजनं कृत्वा गृहेषु दीपं प्रज्ज्वाल्य प्रकाशं कुर्वन्ति । अयं दीपमालिकोत्सवः पौराणिकाख्यानेष्वप्याश्रितो वर्तते ।

विष्णुपुराणस्यैका कथा वर्तते यत् कदाचित् महर्षिर्दुर्वासा वनेषु भ्रमणमकार्षीत् । तदात्वे सः काञ्चित् विहायसा गच्छन्त्या अप्सरसो मालायाः सौगन्ध्यातिशयमनुबभूव । तदा सः ताम् अप्सरसमाहूय तस्या तां मालामयाचत । अप्सरसो मालां तां सन्धार्य महर्षिर्वनेषु बहुकालं भ्रमति स्म

मालायाः सौगन्ध्यसुखमनुभवन्। भ्रमन् सः कदाचित् ऐरावतेन यान्तमिन्द्रं पथि ददर्श। प्रणमत इन्द्रस्य कल्याणाय महर्षिः तां मालां प्रसादरूपेण प्रादात्। इन्द्रश्च तां मालां शिरसा प्रणम्य ऐरावतस्य शिरसि निदधे। ऐरावतोऽपि गजस्वभावतया तां मालां शिरसोऽवतार्य पदेन भूमौ सम्ममर्द। तद् दृष्ट्वा महर्षिः क्रोधेनेन्द्रं शशाप यद् देवानां राज्यात् त्वमचिरं भ्रष्टो भविष्यसि। लक्ष्मीश्चापि पातालं यास्यति। देवा दरिद्राः सन्तो नानाविधानि दुःखान्यनुभविष्यन्ति। भयभीत इन्द्रो महर्षिं बहुधा प्रसादयामास, यद्यपि तथापि महर्षिः नैजं नैष्ठूर्यं नहि तत्याज। ऋषेः शापप्रभावेण दैत्या विजयिनो बभूवुः। देवा राज्याद् भ्रष्टा अभूवन्। तदनन्तरं देवानां दुःखानि विलोक्य भगवान् लक्ष्मीं पुनरानयनाय क्षीरोदधिमन्थनस्य विचारं प्रकटयामास। दैत्याः देवाश्च संभूय समुद्रमन्थनमकार्षुः। तेन हि लक्ष्मीः प्रकटिता बभूव। लक्ष्मीः यदा कृपापूर्वकमवलोकयामास तदैवाखिलं जगत् सौख्यमयमभूत्।

सञ्जातायां लक्ष्म्याम् मोमोदमानाः देवाः भगवत्याः लक्ष्म्याः पूजनं श्रीसूक्तेनाकार्षुः। प्रदीपान् प्रज्ज्वाल्य विश्वं प्रकाशयामासुः। भगवत्याः लक्ष्म्याः तदेव पूजनं संस्मृत्य देवाः प्रतिवर्षं धनस्याधिष्ठातृदेवतायाः लक्ष्म्याः पूजनं कृत्वा प्रदीपान् प्रज्ज्वाल्यन्ति। दीपमालिकोत्सवं सर्वे जनाः सम्मानयन्ति। सर्वे जनाः लोके लक्ष्म्याः कृपां काङ्क्षयन्ति। नास्ति कश्चन नास्तिकोऽपि लोके यः लक्ष्म्याः कृपां नो काङ्क्षेत, अत एवायमुत्सवो जनसामान्यस्य वर्तते न तु कस्यचन वर्गविशेषस्य, न वा कस्यचन वर्णविशेषस्य। अस्मिन् महोत्सवे जनाः नानाविधानि मिष्ठान्नानि स्वकीयेषु जनेषु वितरन्ति। सर्वे जनाः सौहार्द्रपूर्वकं सर्वैः सह सम्मिलन्ति। अत एवायमुत्सवः जनेषु सौहार्द्रं द्रढयति।

(५) होलिकोत्सवः

होलिकोत्सवो भारतवर्षस्य देशव्यापकेषु नैकेषु उत्सवेषु मुख्य उत्सवो वर्तते। अस्मिन् उत्सवे सर्वे जनाः आनन्दातिशयमनुभवन्ति। अयमुत्सवः प्रमोदातिशयस्यैवोत्सवो वर्तते। यदा शिशिरस्य समाप्तिर्भवति, ऋतुराजस्यागमनं भवति। गृहस्थानां गृहाणि नवीनैरन्नैः परिपूर्णानि भवन्ति। वातावरणमखिलं सौगन्ध्यप्रधानैः कुसुमैरन्वितं भवति तदैव भवत्ययं होलिकोत्सवः। होलिकोत्सवो नाम वसन्तागमनस्य पूर्वसन्ध्यातः प्रारभ्य प्रथमदिनव्यापकः सम्मान्यमान उत्सवविशेषः। वस्तुतः यदा भारतीयवत्सरस्य समाप्तिर्भवति, नवीनस्य वत्सरस्य च प्रारम्भो भवति तदायमुत्सवः सम्मान्यते। फाल्गुनमासस्य

पूर्णिमायां रात्रौ होलिकायाः प्रदाहो भवति। पुनः प्रातःकाले चैत्रकृष्णप्रतिपदि वसन्तोत्सवः सम्मान्यतः। होलिकोत्सवस्यैवापरं नाम वसन्तोत्सवः।

वसन्तोत्सवे सर्वे जनाः सम्भूय हासपरिहासमयानि गीतानि गायन्ति। नानाविधानां सुगन्धियुक्तानां रागरञ्जितानां जलानां परस्परं प्रक्षेपं प्रकुर्वन्ति, साकमेवोपविश्य नानाविधानां पक्वान्नानाम् मिष्टान्नमयानां भोजनं कुर्वन्ति। सर्वे परस्परं प्रेम्णा आलिङ्गनं कुर्वन्ति। मनस्सु विद्यमानामपि द्वेषभावनां विस्मृत्य स्निह्यन्ति जनान्। अत एवायमुत्सवः सौहार्द्रसुदृढीकरणस्यातीव महत्त्वपूर्णं साधनं वर्तते।

अयमुत्सवः अन्यायोपरि न्यायस्य, अधर्मोपरि धर्मस्य च विजयरूपेण समाजे सम्मान्यते। होलिकोत्सवविषये इयमाख्यायिका विख्याता वर्तते यत्—

आसीत् कदाचित् कश्चन हिरण्यकशिपुनामको राक्षसविशेषो भगवता विष्णुना सह वैरबद्धत्वात् सः स्वकीये राज्ये भगवन्नामग्रहणविषयकं निषेधाज्ञा घोषयामास। भगवन्नामसङ्कीर्तनं धार्मिककृत्यानुष्ठानञ्च तस्य राज्यस्य दण्डनीयेषु अपराधेष्वास्ताम्। परन्तु भाग्यवशाद् हिरण्यकशिपोरेव पुत्रः प्रह्लादो महान् भगवद्भक्तो बभूव। हिरण्यकशिपुना बहुधा निषिद्धोऽपि सो यदा स्वभगवद्-भक्तेर्नहि विरराम तदा हिरण्यकशिपुः तस्य मारणमेव निश्चितवान्। तदर्थं सो बहूनुपायानुष्ठितवान्, परन्तु भगवद्भक्तेरतुलप्रभावात् तस्य सर्वे उपाया विफला अभूवन्। अन्ततः प्रह्लादस्य मारणाय हिरण्यकशिपोर्भगिनी अग्नेर्लब्ध-वरा, प्रह्लादमङ्के निधाय अग्नौ प्रविवेश। तथापि भगवद्भक्तिप्रभावात् साऽपि प्रज्ज्वलिता बभूव प्रह्लादश्च सुरक्षितोऽभूत्। भगवद्भक्तेः प्रभावमेवेमं संस्मृत्य भारतीयाः भक्तस्य प्रह्लादस्य सम्मानरूपेण प्रतिवर्षं होलिकायाः प्रदाहं कृत्वा उदिते च भगवति भास्वति वसन्तोत्सवं सम्मानयन्ति।

होलिकोत्सवस्य उत्सवप्रकारः प्रायः भारतवर्षस्य तेषु तेषु प्रदेशेषु भिन्नो भिन्नो वर्तते, परन्तु आनन्दानुभवं तु सर्वत्र जनाः समानरूपेणास्मिन् महोत्सवे-ऽनुभवन्ति।

(६) वाराणसी

भारतवर्षस्य नगरेषु वाराणसी अत्यन्ता प्राचीना वर्तते। भगवत्या भागीरथ्या पुलिनेष्ववस्थिता वाराणसी नगरी स्वधार्मिकतायै विश्वस्मिन् विश्वे विख्याता विद्यते। शङ्करोपासका नगरीमिमां भगवतो विश्वनाथस्य राजधानी स्वीकुर्वन्ति। अत्रैव भगवान् विश्वेश्वरः द्वादशज्योतिर्लिङ्गेष्वनन्यतमो विराजते-

तमाम्। अत्रैव भगवान् शङ्करो वाराणस्यां मृतान् सर्वान् जनान् मुक्तिं वितरति। वाराणसी संस्कृतविद्यायाः केन्द्रमपि कथ्यते। आसीत् कश्चन कालविशेषो यदा वाराणस्यामनेके संस्कृतभाषाया महान्तो विद्वांस अभूवन्। वाराणस्या एव शिवकुमारशास्त्रिणः शङ्करस्य अपरावताररूपेण प्रख्यातो बभूव। अस्य व्याकरणविषयकान् विचारान् श्रुत्वा प्रतिपक्षिणः कान्दिशीका अभूवन्। अत्रैव बालगङ्गाधरशास्त्रिणः निखिलशास्त्रनिष्णाता महान्तो विद्वांस अभूवन्। वाराणस्या एव दामोदरशास्त्रिणः, तात्याशास्त्रिणः, राजराजेश्वरशास्त्रिद्राविड-महोदयप्रभृतयो वाराणस्या एव विभूतय अभूवन्। साम्प्रतिका अपि मैथिल-मर्दनस्योपाधिना प्रख्यातो हरिहरकृपालुद्विवेदीमहोदयाः, पूर्णचन्द्राचार्यमहोदयाः, श्रीरघुनाथशर्माणः, श्रीसभापति उपाध्यायमहोदयाः, श्रीमहाशयजी प्रभृतयो महान्तो विद्वांसः काशीस्था एव विभूतय आसन्।

वाराणस्यां त्रयो विश्वविद्यालयाः सन्ति—काशीहिन्दूविश्वविद्यालयः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः काशीविद्यापीठश्च। एतदतिरिक्तं वाराणस्यां नैकानि दर्शनीयानि मन्दिराणि सन्ति। यथा—काशीविश्वनाथमन्दिरम्, अन्नपूर्णाविश्वनाथमन्दिरम्, मानसमन्दिरम्, दुर्गामन्दिरम्, कालभैरवमन्दिरम्, सङ्कटमोचनहनुमानमन्दिरम्, भारतमातामन्दिरञ्च। काश्यां गङ्गातटस्य घट्टेषु दशाश्वमेधघट्टः, अस्सीघट्टः, मणिकर्णिकाघट्टः, हरिश्चन्द्रघट्टः राजघट्टश्च दर्शनीयानि घट्टानि सन्ति।

वाराणस्यां गङ्गायाः सौन्दर्यमतिमनोहरं वर्तते। अर्द्धचन्द्राकारमिवाभात्यत्र गङ्गानदी।

पुराणेषु वाराणस्या महिमा अतिविशदतया वर्णितो वर्तते। स्कन्द-पुराणस्य एको बृहत्तमः खण्डः काशीखण्डस्यैव नाम्ना प्रख्यातोऽस्ति। नास्ति किमपि पुराणं यत्र काश्याः वर्णनं नोपलभ्यते। उपनिषत्स्वपि काशीराजस्य वर्णनं समुपलभ्यते। अत एव वाराणसी भारतवर्षीयनगरीषु गौरवमयं स्थानं बिभर्ति।

(७) मण्डलायोगः

मण्डलायोगो भारतीयसंविधानविषयक एक आयोगो वर्तते। अस्यानुसारेण दलितजातेर्दलितजनजातेश्च कृते सेवासु वरीयता प्रदीयते। भारतस्य संविधान-निर्माता अम्बेडकरनामकः कश्चित् दलितजातीयो बभूव। स्वतन्त्रभारतीय-संविधाननिर्माणसमये तेन लिखितं यत् भारते निवसमानेभ्यो दलितजातीयेभ्यः

दलितजनजातीयेभ्यश्च जनेभ्यः सेवाकार्येषु तावत्कालपर्यन्तं वरीयते दातव्या वर्तते यावत्कालपर्यन्तं तज्जातीयका अपि जनाः तेनैव प्रकारेण सम्पन्ना नो भवन्ति, येन प्रकारेण सम्पन्ना सवर्णजातीयकाः सन्ति। स एवायोगः मण्डलायोगशब्देनाभिधीयते।

मण्डलायोगमेव दृष्टिपथे निधाय सेवाकार्येषु पञ्चदशप्रतिशतमारक्षणं दलितजातीयानां दलितजनजातीयानाञ्च कृते तैः तैः राजनीतिज्ञैर्निर्धारितम्। परन्तु १९८९ ईसवीये वर्षे यदा चयनकर्मणि विजयं प्राप्य जनतादलस्य केन्द्रे सर्वकारोऽभूत्, यदा हि विश्वनाथप्रतापसिंहो भारतवर्षस्य प्रधानमन्त्री बभूव तदा सः मण्डलायोगं मनसि निधाय, तस्यानुसारेण सप्तविंशतिप्रतिशतं दलित-जातीय-दलितजनजातीयेभ्यः आरक्षणं निर्धारितवान्। अस्यारक्षणनिर्धारणस्यातीव दुष्प्रभावोऽभूत् भारतीये जनजीवने। अनेके नवयुवका आत्मदाहसदृशानि कर्माणि अस्य मण्डलायोगकार्यान्वयनस्य विरोधे अकार्षुः। अनेके युवानः विषमास्वाद्य मृतिं गतवन्तः। परन्तु सर्वकारः एतासु समासु प्रतिक्रियासु विचारं विना कृत्वैव मण्डलायोगस्य कार्यान्वयनं स्वीचक्रुः। एतस्यैव प्रधान-रूपेण फलमासीत् विश्वनाथप्रतापसिंहस्य सर्वकारस्य पतनस्य। अगाच्च चन्द्र-शेखरसिंहस्य कांग्रेस-आई-दलेन समर्थितः सर्वकारः। अनेनैव प्रकारेण उत्तरप्रदेशे यदा यदा मण्डलायोगस्य संस्तुतिः कार्यान्विताऽभूत् तदाऽपि जनानाम् महान् विरोधोऽभूत्। कांग्रेस-आई-दलस्य साहाय्येनैवोत्तरप्रदेशोऽपि मुलायमसिंहस्य सर्वकारोऽपि सुरक्षितोऽभूत्।

यद्यपि मण्डलायोगस्य संस्तुतिः समीचीना वर्तते तथापि तस्यां संस्तुतौ एको महान् दोषो विद्यते। सोऽयमायोगः जातिमाश्रित्य सेवाकर्मसु आरक्षणस्य संस्तुतिं करोति। यदि तत्र आर्थिकदृष्ट्या दुर्बलानामेव जनानां सेवाकर्मसु आरक्षणं स्यात् तदा तु तस्य केनापि विरोधो न कृतो भवेत्। अत एव आरक्षणो हि आर्थिकदृष्ट्या दुर्बलानामेव कर्तव्यम्, न तु कस्याञ्चन जातिविशेषस्यैव जनानाम्। यदि एतादृशं परिवर्तनं मण्डलायोगस्य संस्तुतौ कृतं स्यात् तदा तु सा सर्वजनग्राह्या सम्भवेत्।

(८) श्रीरामजन्मभूमिविवादः

भारतवर्षस्य राजनीतौ समुत्पन्नासु समस्यासु रामजन्मभूमिविषयको विवादो नैजीं महत्त्वमयीं भूमिकां निर्वहति। उत्तरप्रदेशस्यायोध्यायां राम-जन्मभूमिनामकं मन्दिरमस्ति बहुचर्चितम्। अनेन मन्दिरेण साकं हिन्दूनां

भावना सुदृढा वर्तते। अस्य मन्दिरस्य वर्णनं त्रिशदध्यायात्मके रुद्रयामलीये अयोध्यामाहात्म्ये, हरगौरीतन्त्रस्य त्रिशदध्यायात्मके अयोध्यामाहात्म्ये, स्कान्दे वैष्णवखण्डस्य अयोध्यामाहात्म्ये च समुपलभ्यते। परन्तु यवनाक्रान्ता बाबरो मन्दिरमिदं प्रणाश्य मस्जिदरूपेण परिणतवान्। यवनानामियं मन्दिराणां विषये दमननीतिः श्रूयते। परन्तु प्रबुद्धाः हिन्दवः १९४२ ईस्व्यां पुनः तस्मिन् रामजन्मभूमिमन्दिरे प्रविश्य भगवतो रामचन्द्रस्य मूर्ति स्थापितवन्तः। तस्मादेव कालात् तस्मिन् मन्दिरे हिन्दूनामधिकारो वर्तते। हिन्दवो मन्दिरमिदं हिन्दूभ्यः प्राप्तनाय न्यायालये वादमपि प्रस्तुतवन्तः, परन्तु यवनपरत्वात् सर्वकारीयायाः नीतेः चत्वारिंशत्वर्षानन्तरमपि निर्णयो नहि सञ्जातः। १९८९ ईस्व्यां विश्वहिन्दूपरिषदः सहयोगेन तत्र मन्दिरस्य नवनिर्माणार्थं शिलान्यासोऽप्यभवत्। पुनः १९८९ ईस्व्यामेव छन्दाकलनप्रणाल्या जनतादलस्य केन्द्रे राज्यमभूत्। प्रधानमन्त्री च विश्वनाथप्रतापसिंहः समभवत्। तदात्वे विश्वनाथप्रतापसिंहः श्रीराममन्दिरनिर्माणाय षण्मासानामवधिं याचितवान्, परन्तु अतीतेऽपि तस्मिन् काले प्रधानमन्त्री मन्दिरनिर्माणायानुज्ञां नहि प्रादात्। तदनन्तरं भारतीयजनतापार्टी सर्वकाराय प्रदत्तं समर्थनं परावर्तितवती। पुनः सर्वकारः अल्पमते समागात्। तादात्विकः उत्तरप्रदेशस्य मुख्यमन्त्री मुलायमसिंहयादवोऽपि मन्दिरनिर्माणस्य विरुद्धे बभूव।

विश्वहिन्दूपरिषदः १९९० ईस्व्याः ३० अक्तूबरदिनाङ्के श्रीरामजन्मभूमौ प्रस्ताविताया: कारसेवायाः घोषणां रोद्धुं सम्पूर्णम् उत्तरप्रदेशं प्रवेशं निषिद्धवान्; परन्तु जनभावना सर्वकारीयभावना विरुद्धा आसीत्। सर्वकारीयां सम्पूर्णां व्यवस्थां भङ्क्त्वा त्रिशदक्तूबरदिनाङ्के लक्षपरिमितायां सङ्ख्यायां जनाः अयोध्यां समागुः। अहिंसकरीत्यैव द्विलक्षपरिमितैः सुरक्षाकर्मिभिः परिवृतायामपि श्रीरामजन्मभूमौ जनाः प्राविशन्। तत्र शान्तेन विधिना रामजन्मभूमौ प्रविशति जनसमूहे निर्मम-सुरक्षाकर्मिभिः गोलिकाप्रचालनेन त्रिशत् अक्तूबरदिनाङ्के न्यूनातिन्यूनं चत्वारिंशत्सङ्ख्याका जना व्यापादिताः, एकादशनवम्बरतारिकायाः आजदैनिकेन समुद्घुष्टम्। पुनः नवम्बरमासस्य द्वितीयतारिकायां सर्वेषां कारसेवकानां निर्णयः सञ्जातो यत् तस्मिन् दिनाङ्के हस्ते किमपि अनादायैव श्रीरामनाभसङ्कीर्तनं कुर्वन्तः सर्वे कारसेवका अहिंसकरीत्यैव रामजन्मभूमिपरिसरं परित आवृत्य अहोरात्रं श्रीरामनामसङ्कीर्तनं करिष्यन्ति। प्रशासनिकाः कर्मचारिणः अपि हिन्दूकारसेवकानां कार्यक्रममिमं समभिनन्दित-

वन्तः । स्वनिश्चयानुसारेणैव श्रीरामकारसेवकाः मणिरामदासछावनीतः प्रस्थानमकार्षुः । किन्तु उत्तरप्रदेशस्य मुख्यमन्त्रिणो मुलायमसिंहस्य आदेशानुसारेण सुरक्षाकर्मिणः स्वतःचालित-आग्नेयास्त्रैः गोलिकां प्रचाल्य श्रीरामकारसेवकानां नृशंसहत्यां कृतवन्तः । एकादशनवम्बरदिनाङ्कस्य आजदैनिकपत्रानुसारेण द्विनवम्बरतारिकायां न्यूनातिन्यूनं व्यापादितानां श्रीरामकारसेवकानां सङ्ख्या सप्तशती सञ्जाता । एतादृशी नृशंसहत्या भारतीये इतिहासे प्रथमबारमभूदिति प्रत्यक्षदर्शिनां मनीषा । अस्याः हत्यायाः विषये विश्वस्मिन् विश्वे निन्दा सञ्जाता । तस्य फलरूपेणैव विश्वनाथप्रतापसिंहस्य सर्वकारस्य विनिपातोऽभवत् । मुलायमसिंहस्य सर्वकारः कांग्रेस-आई-दलेन सुरक्षितः । तेन कांग्रेस-आई-दलस्यापि सम्पूर्णे भारते निन्दा समभवत् । हिन्दूनां भावनायाः समर्थिकायाः भारतीयजनतापार्ट्याः अध्यक्षः श्रीलालकृष्णआडवाणीमहोदयाः यदा नवम्बरमासस्यैकोनविंशतितारिकायाम् अयोध्यामगुः तदा मन्ये दशलक्षसङ्ख्याका जनाः तेषां सभायां भागं गृहीतवन्तः । तेनेदमपि सुनिश्चितं जातं यत् तावत्कालपर्यन्तं भारतवर्षस्य कस्यचनापि प्रधानमन्त्रिणोऽपि सभायां तथाविधो जनसम्मर्दः नहि सञ्जातः ।

(९) संस्कृतभाषा

संस्कृतं विश्वभाषासु प्राचीनतमा भाषेति श्रूयते । सर्वेषां भाषाविदामिदं मतं वर्तते यत् संस्कृतं सर्वासां भाषाणां जननी वर्तते । भारतीयास्तु सर्वा भाषा संस्कृतेनानुगृहीता वर्तन्त इति निश्चप्रचम् ।

विश्वस्य प्राचीनतमं वैदिकं वाङ्मयं संस्कृतभाषायामेव निबद्धं वर्तते । विशालस्य वैदिकवाङ्मयस्य महत्तमो भागो प्रणष्टः अल्पतम एव भागोऽवशिष्यते, यस्योपलब्धिः साम्प्रतं वैदिकवाङ्मयरूपेण भवति । वैदिकवाङ्मयस्य विस्ताराकलनं कुर्वता महर्षिणा पतञ्जलिनाऽभिहितम्—'सहस्रवर्त्मा सामवेदः । एकविंशतिधा वह्वृचः । एकशतमध्वर्युशाखा । नवधाऽथर्वाणः ।' वैदिकस्यैव साहित्यस्य उपविभागाः सन्ति—उपनिषदः, आरण्यकग्रन्थाः ब्राह्मणग्रन्थाश्च ।

संस्कृतभाषायाः विभागद्वयं कर्तुं शक्यते, वैदिकसंस्कृतं लौकिकसंस्कृतञ्च । येन प्रकारेण वैदिकसंस्कृतस्य साहित्यमतिविशालं वर्तते तेनैव प्रकारेण लौकिकसंस्कृतस्यापि साहित्यमतिविशालं वर्तते ।

लौकिकसंस्कृतस्यादिमो ग्रन्थो वाल्मीकीयं रामायणं स्वीक्रियते । लौकिक-

संस्कृते एव पुराणानि, महाभारतम्, महाकविकालिदासप्रणीता ग्रन्था:, भास-भारवि-माघ-श्रीहर्षादिभिश्च प्रणीता: ग्रन्था: सन्ति । सम्पूर्णं व्याकरण-साहित्यम्, साहित्यशास्त्रम्, न्याय-वैशेषिक-मीमांसा-शारीरकमीमांसादिकानां भाष्याणि च संस्कृतभाषायामेव निबद्धानि सन्ति ।

भारतवर्षस्य सम्पूर्णमतीतकालिकं गौरवम्, सम्पूर्णधर्मसाहित्यम्, इतिहास:, राजनीति:, अर्थशास्त्रम्, तन्त्रशास्त्रम्, मन्त्रशास्त्रम्, तर्क:, ज्योतिर्विद्या, सामुद्रिकं शास्त्रम्, कला: वास्तुशास्त्रं च संस्कृतभाषायामेव निबद्धानि सन्ति । आयुर्वेदनाम्ना प्रसिद्धं चिकित्साशास्त्रम्, धनुर्वेद: गान्धर्ववेदश्च संस्कृतभाषाया-मेव सङ्गृहीतानि सन्ति । अत एव भारतवर्षीयेण मनुष्येण संस्कृतभाषाया अध्ययनमवश्यं करणीयम् । विना संस्कृतज्ञानं कश्चनापि भारतीय: स्वकीयं प्राचीनम् ऐतिह्यं, भूविज्ञानं वा वेत्तुं नहि समर्थो भविष्यति । यस्मिन् काले सम्पूर्णस्यास्य भारतस्य भाषा संस्कृतमासीत् तदा भारतवर्ष: स्वोन्नते: चरमां काष्ठामचुम्बत । संस्कृतभाषाया: परिज्ञाननैयून्यक्रमेणैव भारतस्यावनति: सञ्जाता ।

भारतवर्षे भाषाविवादविषयकं अपि एको विवादो वर्तते । भारतस्य तत् तत् प्रदेशीया: स्वस्वप्रदेशस्यैव भाषां राजभाषाया: पदे प्रतिष्ठापयितुं काम-यन्ते, किन्तु यदि संस्कृतं राजभाषा स्यात् तदा तस्या विषये तथाविधस्य विवादस्य प्रश्न एव नहि समुदेति । यत: संस्कृतं कस्यचन प्रदेशविशेषस्य भाषा नास्ति अपि तु तत् समग्रस्य भारतवर्षस्य भाषा वर्तते । संस्कृतविषये कस्यचनापि प्रदेशस्य विरोधो न भवेत् । अत एव संस्कृतभाषैव भाषाविवाद-प्रशमनाय प्रभवति ।

जनानां संस्कृतभाषाया विषये इयमप्यवधारणा क्वापि श्रूयते यत् संस्कृतं भाषासु कठिना विद्यते, परन्तु इयं जनानामवधारणा भ्रान्तिमूलैवास्ति । संस्कृतं तु विश्वस्य सरलतमा भाषा विद्यते । अस्या: भाषाया व्याकरणं महर्षिपाणिनिप्रणीतम् एतादृशं वर्तते यस्यैकस्यैव ग्रन्थस्याभ्यासकरणेन संस्कृतं सरलं भवेत् । क्वाऽपि संस्कृतस्य व्याहारे व्यवहारे च काठिन्यं नहि अनुभूयेत् । संस्कृतं सरलतया षट्ष्वेव मासेषु अधिगन्तुं शक्यते । संस्कृतभाषाया: साहित्यमतीव गाम्भीर्यं बिभर्तीत्यपरा वार्ता । अत एव संस्कृतस्याध्ययनं सर्वैर्भारतीयैर्नूनं कर्तव्यम् ।

(१०) मम प्रियतमो ग्रन्थः

सम्पूर्णस्य भारतस्य आत्मनो निरूपको भारतीये वाङ्मये एक एव ग्रन्थो वर्तते। स च ग्रन्थो महाभारतस्य नाम्ना प्रख्यातो वर्तते। वेदानां विभाजकेन अष्टादशपुराणानां निर्मात्रा, शारीरकमीमांसाशास्त्रस्य प्रणेत्रा, भगवत अपरावतारेण महर्षिणा कृष्णद्वैपायनेन प्रणीतोऽयं ग्रन्थः सपादलक्षश्लोकैर्निबद्धत्वात्, आकारमहत्त्वात् विषयस्य च महत्त्वात् महाभारतमिति समाख्यां सन्धत्ते। नूनमस्य महाभारतमिति अन्वर्थसंज्ञा।

प्राचीनस्य भारतवर्षस्य ऐतिह्यं ग्रन्थद्वये निबद्धमास्ते—श्रीमद्वाल्मीकीये रामायणे महाभारतग्रन्थे च। अत एवायं भारतवर्षस्य ऐतिह्यमपि कथ्यते। महर्षिर्बादरायणो महाभारतग्रन्थम् अष्टादशसु पर्वसु व्यभजत। यद्यपि अस्य महाभारतग्रन्थस्य प्रधानरूपेण पाण्डवकौरवाणामेवेतिवृत्तं वर्णनीयमास्ते अथाप्यानुषङ्गिकरूपेण विश्वस्मिन् विश्वे समुपलभ्यमानानां विषयाणां वर्णनं कृतमास्ते। अर्थशास्त्रम्, धर्मशास्त्रम्, राजनीतिः, ऐतिह्यम्, तन्त्रम्, प्रभृतीनां समेषां विषयाणामतिमनोरमो गुम्फोऽस्ति महाभारतम्। महाभारतस्यैव केवलस्याध्ययनेन सर्वेषां विषयाणां ज्ञानं सम्पद्यते। महाभारते सर्वेषां विषयाणां सन्निवेशमेव निपुणं निभाल्य केनचित् समीक्षकेणाभिहितम्—

'यन्न भारते तन्न महाभारते।' इति।

महाभारतस्यैवैको लघुतमोंऽशः श्रीमद्भगवद्गीतेति नाम्नाऽभिधीयते। यस्याः गीतायाः द्विसहस्रतोऽप्यधिकाः व्याख्याः साम्प्रतमपि समुपलभ्यते। प्रस्थानत्रय्यां गीताया अन्यतमं स्थानं वर्तते। गीतां विना व्याकृत्य कश्चनापि मनीषी आचार्यस्य पदविना नहि भवति समलङ्कृतः। भारते एव भगवतो विष्णोः सहस्रनामस्तोत्रं पठितम्। अस्य श्रीविष्णुसहस्रनामस्तोत्रस्यापि व्याख्याः तैः तैराचार्यैः कृताः।

आचार्यो नीलकण्ठः सम्पूर्णं महाभारतं व्याकृतवान्। यस्मात् कारणात् महाभारतं भारतवर्षस्य अस्मिताग्रन्थो वर्तते; अत एव सर्वैर्भारतीयैरस्य ग्रन्थस्य सम्यग्रूपेणाध्ययनमवश्यं कर्तव्यम्।

(११) गङ्गानदी

भारतवर्षस्य पवित्रतमासु नदीसु गङ्गानदी सर्वाः नदीरतिशेते। भारत-

स्यैवमेवैका नदी वर्तते या हिमालयान्निःसृत्य समुद्रमस्तमेति । शोणभद्रसरयू-यमुनेत्यादिकाः सर्वा नद्यः अस्यामेव सम्मिलन्ति । भारतीयाः मनीषिणो मन्यन्ते यत् अस्याः नद्याः जलस्य संस्पर्शमात्रेणैव जना अमृतत्वमाप्नुवन्ति ।

गङ्गानद्या विषये पुराणेष्वाख्यायिका वर्तते यत्—कदाचिदयोध्यायाः राजा सगरो बभूव । तस्य द्वे पत्न्यावभूताम् । तत्रैकस्यामेकः पुत्रोऽजायत स्वभावेनैव दुष्टः असमञ्जनामकः । तस्य पुत्रस्य क्रौर्यं वीक्ष्य राजा सगरः स्वराज्यान्निष्कासयामास । राज्ञो द्वितीयायां पत्न्यां षष्टिसहस्रसङ्ख्याकाः पुत्रा अभूवन् । सर्वविधं समृद्धं स्वराज्यं वीक्ष्य राजा सगरः ऐन्द्रपदमधिगन्तुं शतेनाश्वमेधेन यजति स्म । शततमेऽश्वमेधे यज्ञविघ्नं चिकीर्षुरिन्द्रो यज्ञस्याश्वं चोरयामास । अश्वमपहृत्य इन्द्रः पृथ्व्या अधस्तात् भगवतः कपिलस्याश्रमे बबन्धे । अपहृतमश्वं वीक्ष्य राजा अश्वमन्वेष्टुं निजपुत्रान् प्रेषयामास । अश्वस्यानुपलब्धिं प्रेक्ष्य राजा महीमिमां खनितुं पुत्रानादिदेश । पृथ्वीं खनन्तो सगरात्मजाः तपश्चर्यारतस्य कपिलमुनेराश्रमे चरन्तमश्वं वीक्ष्यायमेव चोर इति मत्वा तमेव महर्षिम् आवृतवन्तः । महर्षिश्च कोलाहलं कुर्वतस्तान् हुङ्कारमात्रेण भस्मसात् चकार ।

अपरावृतान् पुमान् विलोक्य राजा सगरः स्वात्मजमसमञ्जमाहूयाश्वमन्वेष्टुं प्रेषयामास । अश्वान्वेषणप्रसङ्गेन महर्षेः कपिलस्याश्रमे गत्वा चरन्तमश्वं स्वभ्रातॄंश्च मृतान् ददर्श । पुनः संस्तूय सः महर्षिं प्रसादयामास । प्रसन्नो महर्षिरवादीत् यत् गङ्गाजलसंस्पर्शेणैव सगरात्मजानां मुक्तिर्भवित्री । असमञ्जः अश्वमादाय राज्ञे समर्प्य पुनः गङ्गां नेतुं तपस्तप्तवान् । तस्मिन्नेव वंशे भगीरथो नाम राजर्षिरभूत् । तस्य तपसा सन्तुष्टा भगवती गङ्गा स्वर्गं विहायावातरत् पृथिव्याम् । तस्या एव गङ्गायाः जलस्य संस्पर्शेण मुक्ताः सगरात्मजा मुक्ता अभूवन् । अस्या भगवत्या एव तटे विद्यमानत्वात् वाराणस्याः महत्त्वं पुराणेषु कीर्त्यते ।

गङ्गां प्रति भक्त्यतिशयं प्रदर्शयन् कश्चित् कविः प्राह—

'मातः शैलसुता सपत्नि वसुधाशृङ्गारहारावली,
स्वर्गारोहणवैजयन्ति भवतीं भागीरथीं प्रार्थये ।
त्वत्तीरे वसतस्त्वदम्बु पिबतः त्वद्वीचिसु प्रेङ्खतः
त्वन्नाम स्मरतः त्वदर्पितदृशः स्यान्मे शरीरव्ययः ॥'

(१२) सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः

वाराणस्यां विद्यमानः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयो विश्वविद्यालयेष्वन्यतमः। संस्कृतभाषाया विश्वविद्यालयोऽयं प्रख्याततमो वर्तते। अस्मिन् विश्वविद्यालये संस्कृतभाषायाः सर्वेषां विभागानाम् अध्ययनं भवति। अस्मिन् विश्वविद्यालये अध्ययनाध्यापनस्य माध्यमं संस्कृतमेव विद्यते।

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये सर्वप्रथमः प्राचार्यः मङ्गलदेवशास्त्र्यभूत्। अत्रैव कुलपतिः सुरतनारायणमणित्रिपाठिनः अभूवन्। अस्मिन् विश्वविद्यालये अनेके प्रौढाः पण्डिता अभूवन् अध्यापकाः। अत्रैव गणितज्योतिश्शास्त्रस्य विभागे महान् गणितज्ञः श्रीपण्डितरामानुजन् दाक्षिणात्यो विद्वानासीत्; यं जर्मनीयाः राजकीयसम्मानपूर्वकं सपरिवारं जर्मनीदेशं नीतवन्तः। स एतादृशो गणितज्ञो विद्वान् बभूव यो ग्रहलाघवग्रन्थस्य गोलाध्यायं व्याकृतवान्।

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये सम्पूर्णानन्दसदृश्याः शिक्षाविदः कुलपतय अभूवन्।

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्यैव उपाध्यायाः श्रीराममिश्रशास्त्रिणः, परमेश्वरपाण्डेयाः, श्रीरघुनाथशर्माणः प्रभृतयो विद्वांस अभूवन्। सम्पूर्णानन्दसंस्कृतविश्वविद्यालये साम्प्रतं पञ्चशतसङ्ख्याकाः अध्यापकाः सन्ति। अत्र वैदेशिकविभागो वर्तते। अत्र वैदेशिका छात्राः बौद्धदर्शनादिकं पठन्ति। सम्पूर्णानन्दसंस्कृतविश्वविद्यालये प्रधानरूपेण—व्याकरण-साहित्य-वेदान्त-ज्योतिष-वेदाङ्ग-रामानन्दवेदान्त-वल्लभवेदान्त-रामानुजवेदान्त-शाङ्करवेदान्तादीनामध्ययनस्य व्यवस्था विद्यते।

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य मुख्यभवनम् आंग्लशासनकालिकं वर्तते। सम्पूर्णानन्दसंस्कृतविश्वविद्यालये सरस्वतीभवननामको पुस्तकालयो वर्तते, यत्र वह्वीनां बहुमूल्यानां पाण्डुलिपीनां विशालः सङ्ग्रहो वर्तते। सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कार्यालयोऽपि विश्वविद्यालयपरिसर एव विद्यते। अत्रैकोऽनुसन्धानविभागोऽपि वर्तते, यतः अनुसन्धित्सवो गवेषणाकार्यं कुर्वन्ति विद्यावारिधि-विद्यावाचस्पत्योश्च पदवीं लभन्ते।

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः केन्द्रियसर्वकारेण सहायताप्राप्तो विश्वविद्यालयो वर्तते। अत्रत्यः सर्वश्रेष्ठ उपाधिः आचार्यपरीक्षाया भवति। आचार्यपरीक्षायाः एम० ए० परीक्षासमकक्षां मान्यतां सर्वे भारतवर्षीया विश्वविद्यालयाः

प्रददति । अनेन विश्वविद्यालयेन संस्कृतभाषाया विशेषरूपेण प्रचारो प्रसारश्च भवति । अत एव भारतवर्षीय-संस्कृतभाषायाः प्रचार-प्रसारदृष्ट्या अस्य विश्वविद्यालयस्यात्यधिकं महत्त्वं वर्तते ।

(१३) मम विद्यालयः

मम विद्यालयः श्रीहनुमत्संस्कृतमहाविद्यालयो वर्तते । अयं संस्कृत-महाविद्यालयः कवर्गीयः प्रथम श्रेणीको वर्तते । अस्मिन् महाविद्यालये त्रयाणां विषयाणां स्वीकृतिर्विद्यते । ते च विषयाः व्याकरणसाहित्यवेदान्ताख्या वर्तन्ते । अत्राध्ययनाध्यापनस्य व्यवस्था समीचीना वर्तन्ते । अत्र चतुर्दशसङ्ख्याका अध्यापकाः सन्ति । तेषु चत्वारोऽध्यापकाः वेदान्तस्य, त्रयः साहित्यस्य चत्वारो व्याकरणस्य च वर्तन्ते । द्वावध्यापकौ आधुनिकविषयस्य स्तः । विद्यालयस्य प्राचार्याः व्याकरणशास्त्रस्य निष्णाता विद्वांसो वर्तन्ते ।

समे अध्यापकाः स्वविषयस्य अध्यापने निष्णाता वर्तन्ते । अत्र महाविद्यालये द्वादशसङ्ख्याकाः कक्षाः वर्तन्ते, यत्र छात्रा अध्ययनं कुर्वन्ति । अत्र प्रथमकक्षात आचार्यकक्षापर्यन्तमध्ययनाध्यापनस्य व्यवस्था वर्तते । अस्मिन् महाविद्यालये संस्कृताध्येतॄणां सङ्ख्या भूयसी वर्तते । सर्वे छात्राः अनुशिष्टाः सन्ति, वैरस्य तत्र नामापि न विद्यते । अस्मिन् महाविद्यालये क्रीडायाङ्गणमप्येकं वर्तते, यत्र नानाविधाः क्रीडाः क्रीडन्ति छात्राः । क्रीडायाः साधनानां व्यवस्था महाविद्यालयेनैव क्रियते ।

महाविद्यालयेऽस्मिन् एकः सभागारो वर्तते, यत्र समे छात्राः एकत्रीभूय वादविवादप्रतियोगितादिकम् अवकाशस्यावसरे आयोजयन्ति । तेन छात्रेषु वाक्शक्तिर्वर्द्धते । अत्र महाविद्यालये एकः छात्रावासोऽपि विद्यते, यत्र महाविद्यालयस्य छात्राः निवसन्ति । इत्थं मम महाविद्यालयः अतीव मनोहरः सुव्यवस्थितश्च विद्यते ।

शिवराज विजय: द्वासुपर्णा अनुवाद :

पूर्वमध्यमा द्वितीयखण्डः (प्रथम प्रश्नपत्रम्)

अति लघूत्तरीयाणि लघूत्तरीयाणि च प्रश्नोत्तराणि

प्रश्नः १— शिवराज विजयस्य रचयिता कः?

उत्तरम्— श्री अम्बिकादत्त व्यासः।

प्रश्नः २— श्री अम्बिकादत्त व्यासस्य पूर्वजाः कुत्रावसरान्?

उत्तरम्— राजस्थानप्रदेशस्य जयपुर मण्डलस्य धूला नामके ग्रामे।

प्रश्नः३— अम्बिकादत्त व्यासस्य पितुर्नाम किम्?

उत्तरम्— श्री पं० दुर्गादत्तः

प्रश्नः ४— अम्बिकादत्त व्यासस्य जन्मतिथिः का विद्यते?

उत्तरम्— १९१५ वैक्रमाब्दस्य चैत्र शुक्लाष्टमी।

प्रश्नः ५— कुत्र शिक्षाम ग्रहीत् अम्बिकादत्त व्यासः?

उत्तरम्— काश्याम्।

प्रश्नः ६— श्रीमदम्बिकादत्त व्यासः कदा आचार्य परीक्षामुदतरत्?

उत्तरम्—१८८० ख्रैष्टाब्दे अम्बिकादत्त व्यासः साहित्यार्यस्य परीक्षाम् उत्तीर्णवान्।

प्रश्नः ७— श्रीमद् अम्बिकादत्त व्यासस्य मत्युः कदाऽभवत्?

उत्तरम्— १९०९० ख्रैष्टाब्दे।

प्रश्नः ८— अम्बिकादत्त व्यासस्य काः रचनाः समुपलभ्यन्ते?

उत्तरम्— (१) अवतार मीमांसा कारिका, (२) कथाकुसुमम्, (३) गुप्ताशुद्धि प्रदर्शनम्, (३४) दुःखद्रुमकुठारः, (५) धर्माधर्मकलकलम्, (६) पातञ्जल प्रतिविम्वम्, (७) प्राकृत विचित्रशब्दार्थकोशः, (८) बालव्याकरणम्, (९) मित्रालापः, (१०) शिवराज विजयः, (११) संस्कृताभ्यास पुस्तकम्, (१२) सहस्र नामरामायणम्, (१३) सांख्य सागर सुधा,(१४) सामवतञ्च।

प्रश्नः ९— शिवराज विजयो गद्यकाव्यं पद्यकाव्यं वा?

उत्तरम्— गद्यकाव्यम्।

प्रश्न: १०– शिवराज विजय: काव्यस्य कतमां कोटी माटिकते?

उत्तरम्– उपन्यास कोटिम्।

प्रश्न: ११– शिवराज विजयस्य नायक: क:?

उत्तरम्– शिववीर:।

प्रश्न: १२– शिवराज विजयस्य प्रतिनायक: क:?

उत्तरम्– औरंगजेब:।

प्रश्न: १३– कस्य वर्णनात् उपक्रान्तो भवति शिवराज विजय:?

उत्तरम्– प्रात:कालस्य वर्णनात्।

प्रश्न: १४– विष्णोर्माया भगवतीत्यादि वाक्यम् कुत उद्धृतम्?

उत्तरम्– श्रीमद्भागवत महापुराणस्य दशमस्कन्धात्।

प्रश्न: १५– मरीचिमाली कस्य नाम विद्यते?

उत्तरम्– भगवत: सूर्यस्य।

प्रश्न: १६– गौरवटु: श्यामवटुश्च कौ स्त:?

उत्तरम्– गुरुसेवन पटू ब्रह्मचारिणौ।

प्रश्न: १७– सप्तवर्षदेशीया वालिका का अस्ते?

उत्तरम्– यवनयुवकेनापहृता कस्यचन ग्रामवासिनो ब्राह्मणस्य बालिका याम् आश्रम ब्रह्मचारिण: प्राप्तवन्त:।

प्रश्न: १८– पर्वतस्य कन्दरे क आसीत्?

उत्तरम्– कश्चन समाधिस्थो महामुनि:।

प्रश्न: १९– समाधिस्थस्य महामुने: विषये जनानां कीदृशो विश्वास आसीत्?

उत्तरम्– तं केचित् कपिल इति, अपरे लोमश इति, इतरे जैगिषव्य इति। अन्ये मार्कण्डेय इति विश्वसन्ति स्म।

प्रश्न: २०– महामुने: विषये वटू किम् अपश्यताम्?

उत्तरम्– महामुनि: वटुभ्यां शिखरादवतरन् अदर्शि।

प्रश्न: २१– शिखराद्वतीर्य योगिराज: कुत्रागमत्?

उत्तरम्– आश्रमे।

प्रश्न: २२– उत्थितस्य योगिराजस्य आकार: कीदृग् आसीत्?

उत्तरम्– सुघटितं शरीरम्, सान्द्रा झटा, विशालान्यंगानि, अङ्गारप्रतिमे नयने, गम्भिरामधुरा च वाण्यासीत् योगिराजस्य।

प्रश्नः २३— रुदतीं बालिकामाश्वासयितुं कं प्रेषयामास ब्रह्मचारि गुरुः?

उत्तरम्— श्यामबटुम्।

प्रश्नः २४— रुदन्त्याः बालिकायाः विषये योगराजेन पृष्टः किम्प्राह ब्रह्मचारि गुरुः?

उत्तरम्— ब्रह्मचारिगुरुः प्राह योगिराजम्— ह्यः सायंकाले सायन्तन कृत्ये समाप्ते चन्द्रोदये सञ्जाते अस्माभिः दूरादागत करुण क्रन्दन ध्वनिः श्रुतः। तदन्वेष्टुं मया छात्राः विसृष्टाः। सपद्येकः एकःछात्रः भयभीतां दीर्घं निःश्वसन्तीं सप्तवर्षदेशीयां बालिमेकामादाय समागात्। ब्रहुधा अस्माभिः समाश्वासिता सा बालिका प्राह यत् नेदीयस्ये व ग्रामे वसतः कस्यचन ब्राह्मणस्य सा बालिका विद्यते। कोऽपि यवन युवा सुन्दरी मेनामाकलय्य नदी तटे मातुः हस्तादाच्छिद्य रुदन्तीं तामादायापससार। असिधेनुकां प्रदर्श्य तस्याः क्रन्दनं शमयितुं यदा यवनः प्रायतत तदा कंञ्चित् कालकम्बलं समागतं ऋक्षं वीक्ष्य बालिकां विहाय कश्मिंश्चित् तरौ आरुरोह। बालिका च केनापि प्रकारेण आश्रमस्य सविधे समागात् तां चानयत् अस्मच्छात्रः।

प्रश्नः २५— वीरविक्रमस्य काले भारतवर्षे किमभवत्?

उत्तरम्— विक्रमस्य राज्ये मन्दिरे-मन्दिरे जयध्वनिः, तीर्थे-तीर्थ घण्टानादः, मठे-मठे वेदघोषश्च अभवत्।

प्रश्नः २६— यवनानां राज्ये भरते वर्षे किमभवत्?

उत्तरम्— यवनानां राज्येवेदानां विनाशनम्, धर्मशास्त्राणामग्नौ प्रज्ज्वालनं मन्दिराणां विनाशनं परदारापहरणम्, परधनानां लुण्ठनम्, च क्रियते स्म। सर्वत्र जनानां आर्तनादाः श्रूयन्ते स्म।

प्रश्नः २७— योगिराजः सर्वप्रथमं कस्य राज्ञः समये समाधिमाकलितवान्?

उत्तरम्— महाराजस्य युधिष्ठिरस्य राज्यकाले।

प्रश्नः २८— युधिष्ठिरस्य राज्यकाले समाधिमाकलय्यः योगिराज कदा समाधेः जागृतो बभूव?

उत्तरम्— विक्रमस्य समये।

प्रश्नः २९— विक्रमकाले समाधिमाकलय्य योगिराजः कदा जागृतो बभूव?

उत्तरम्— यवनानां राज्यकाले।

प्रश्नः ३०— महामदः कस्य देशस्य निवास्यासीत्?

उत्तरम्— गजनी देशस्य।

प्रश्नः ३१— महामदः कतिवारं बारं भारतवर्षमलुण्ठत?

उत्तरम्— द्वादशबारम्।

प्रश्नः ३२— सोमनाथतीर्थम् कस्मिन् प्रदेशे वर्तते?

उत्तरम्— गुर्जरप्रदेशे।

प्रश्नः ३३— सोमनाथमन्दिरस्य महाघण्टा कीदृश्यासीत्?

उत्तरम्— शतद्वय मणसुवर्ण शृंखलावलम्बिनी चकितीकृतावलोचकलोचन विषया आसीत् सोमनाथ मन्दिरस्य महाघण्टा।

प्रश्नः ३४— महामदगजनी सोमनाथमूर्तेः किमकरोत्?

उत्तरम्— सः गदाप्रहारेण सोमनाथस्य मूर्तिमपि अतुत्रुटत्।

प्रश्नः ३५— महामदो गजनी कस्मिन् काले प्राणानत्यजत्?

उत्तरम्— १०८७ वैक्रमाब्दे।

प्रश्नः ३६— शहाबुद्दीनः क आसीत्?

उत्तरम्— सः गोरदेश निवास्यासीत्।

प्रश्नः ३७— शहाबुद्दीनः कदा दिल्लीमश्वयाम्बभूव?

उत्तरम्— १२५० तमेऽब्दे।

प्रश्नः ३८— पृथिवीराजः कुत्रत्यो राजा आसीत्?

उत्तरम्— पृथिवीराजो दिल्लीश्वरः आसीत्।

प्रश्नः ३९— जयचन्द्रः कुत्रत्यो राजासीत्?

उत्तरम्— कान्युब्जेश्वर आसीत जयचन्द्रः।

प्रश्नः ४०— कुतुबुद्दीनः क आसीत्?

उत्तरम्— शहाबुद्दीनस्य क्रीतदास आसीत्।

प्रश्नः ४१— अकब्बरनामा यवन सम्राट् कीदृश आसीत्

उत्तरम्— अकबरशाहः भारतस्य गूढशत्रुः शान्तिप्रियः विद्वत्प्रियश्चासीत्।

प्रश्नः ४२— औरङ्गजेबस्य क उपाधिरासीत्?

उत्तरम्— आलमगीरः।

प्रश्नः ४३— कस्मात् कारणात् अवरङ्गजीवः दक्षिणदेशं हस्तयितुं नाशकनोत्?

उत्तरम्— दक्षिण देशस्य अरण्यानी संकुलत्वात् पर्वतबहुलत्वाच्च।

प्रश्नः ४४— शास्तिखानः क आसीत्?

उत्तरम्— अवरङ्गजीवस्यात्मीयो जनः।

प्रश्नः ४५— शिववीरस्य कीदृशं वैशिष्ट्यमासीत्?

उत्तरम्— महाराष्ट्र देशरत्नम्, यवन-शोणित—पिपासाकुल कृपाणः, वीरतासीमन्तिनी-सीमन्त-सुन्दर-सान्द्र-सिन्दूर-दान-देदीप्यमान दोर्दण्डः, मुकुटमणिः पारावारः परमोत्साहानाम् प्रातः स्मरणीयः स्वधर्माग्रहग्रहिलः, शिव इव धृतावतार शिववीर आसीत्।

प्रश्नः ४६— शिववीरः कुत्र निवसतिस्म ससेनः?

उत्तरम्— पुण्यनगरनेदीयसि सिंह दुर्गे।

प्रश्नः ४७— शिववीरस्य केन सह वैरमासीत्?

उत्तरम्— विजयपुराधीश्वरेण साकम्।

प्रश्नः ४८— शिववीरेण का प्रतिज्ञा कृता?

उत्तरम्— कार्यं वा साधयेयम्,देहं वा पातयेयम्।

प्रश्नः ४९— गौरसिंह कुत्रत्यः क्षत्रिय आसीत्?

उत्तरम्— राजपुत्रदेशीयः।

प्रश्नः ५०— गौरसिंह आत्मानं कस्य गणमभिधत्ते?

उत्तरम्— शिवस्य गणम्।

प्रश्नः ५१— पुण्यनगरस्य सविधे का नदी प्रवहति?

उत्तरम्— प्रबलप्रवाहा भीमानदी।

प्रश्नः ५२— विजयपुराधीशः क आसीत्?

उत्तरम्— शास्तिखानः।

प्रश्नः ५३— अफजलखानः क आसीत्?

उत्तरम्— विजयपुराधीश्वरस्य अन्यतमः सेनानी।

प्रश्नः ५३— अफजलखानः शिववीरेण सह योद्धुम् कुत्र निवसति स्म?

उत्तरम्— प्रतापदुर्गस्य सन्निकटे शिविरे।

प्रश्नः ५४— सायंकाले अन्धकारे संजाते प्रतापदुर्ग दौवारिकः किम श्रौषीत्?

उत्तरम्— कस्यापि पादक्षेपं ध्वनिम्।

प्रश्नः ५५— शिववीरस्य दौवारिकाय कीदृश आदेश आसीत्?

उत्तरम्— दौवारिकेण प्रहरिणा वा त्रिः पृष्टोऽपि प्रत्युत्तरमदद्द्हन्तव्य् इति।

प्रश्नः ५६— संन्यासिवेषधरः गौरसिंहःदौवारिकं किमाह?

उत्तरम्— कथमस्मान् संन्यासिनोऽपि कठोरभाषणै स्तिरस्करोषि।

प्रश्नः ५७— शिववीरेण अफजलखानस्य विषये पृष्टो गौरसिंहः किं दर्शयामास?

उत्तरम्— पारस्यभाषायां लिखितं कन्यापहारक यवनयुवक मृतशरीरवस्त्रान्तः प्राप्तं अफजलखानाय। शास्तिखानेन लिखितं पत्रम्।

प्रश्नः ५८— अफजलखानाय लिखितस्य पत्रस्य कोऽभिप्राय आसीत्?

उत्तरम्— शास्तिखानेन लिखितमासीत् अफजलखानाय—

'वीरवर महाराष्ट्रराजेन सह योद्धुं प्रस्थितोऽसि इति मास्मभूत् कश्चन अन्तरायः तव विजये। शिवं युद्धे जेष्यसि चेत् पद्भ्यां सिहं जितवानसीति मंस्ये। किंतु सिंह हननापेक्षया जीवतः सिंहस्य वशीकारं एवाधिकं प्रशस्यः। तद् यदि छलेन जीवितं सिंहमानयेः तद् वीरपुंगवोपाधिदानसत्कारेण तव महतीं पदवृद्धिं कुर्याम्। गोपीनाथ पण्डितोऽपि मया तव निकटे प्रस्थापितोऽस्ति। स मम तात्पर्यं विशदीकृत्य तव निकटे कथयिष्यति। प्रयोजनवशेन शिवमपि साक्षात् करिष्यति।

प्रश्नः ५९— गोपीनाथ पण्डितः क आसीत्?

उत्तरम्— शास्तिखानेन अफजलखानस्य सविधे प्रेषितो दूतः।

प्रश्नः ६०— माल्यश्रीकः क आंसीत्?

उत्तरम्— शिववीरस्य बालप्रियं मित्रम्।

प्रश्नः ६१— शिववीरः माल्यश्रीकं किमाह गोपीनाथ पण्डितस्या वा सादिविषये?

उत्तरम्— गम्यताम् दुर्गान्तर एव महावीरमन्दिरे तस्मै वासस्थानं दीयताम्, भोज्य पर्यङ्कादि सुखद सामग्रीजातेन सत्क्रियताम्, ततोऽहमपि साक्षात्करिष्यामि।

प्रश्नः ६२— माल्यश्रीके गते गौरसिंहः शिववीरं किमाह?

उत्तरम्— गौरसिंहः प्राह यत् संन्यासिवेषेणागच्छता मया अफजलखानस्य वीर भटयोः वार्तया ज्ञातं यत् श्व एवैते युयुत्सन्ते। अतएव केनापि प्रकारेण अफजलखानं साक्षात् कृत्य तस्य व्यवसितं ज्ञातुमीहे।

प्रश्नः ६३— गौरसिंह केन वेषेण अफजलखानस्य सविधे जगाम?

उत्तरम्— गायक वेषेण।

प्रश्नः ६४— अफजलखानेन सह वार्तापायार्थं किमाह शिववीरः गोपीनाथ पण्डितम्?

उत्तरम्— केवलं श्वोऽस्मिन्नुद्यान प्रान्तस्थ पट कुटीरे यवनसेनापतिः अफजलखानः आनेयः यथा तेनैकाकिनाऽहमेकाकी मिलित्वा किमप्यालपामि।

प्रश्नः ६५— शिववीरः केन प्रकारेण अफजलखानेन सह साक्षात्काराय सज्ज आसीत्?

उत्तरम्— शिववीरः कौशेयकञ्चुकस्यान्तः लौंह वर्मपरिधाय, सुवर्णसूत्रग्रथितोष्णीषस्याप्यद्यस्तादायसं शिरस्त्राणं संस्थाप्य सिंहनखनामकं शास्त्रविशेषां करयोरारोप्य दृढबद्धकटिरफंजलखान-साक्षात्काराय सज्जस्तिष्ठति स्म।

प्रश्नः ६६— केन प्रकारेण शिववीरः अफजलखानं हतवान्?

उत्तरम्— शिववीरः आलिङ्गनच्छलेनैव स्व हस्ताभ्यां अफजलखानस्य स्कन्धौ दृढं गृहित्वा सिंहनखैः जत्रुणी कन्धरा च व्यपाट्यते। रुधिरदिग्धं च तच्छरीरं कटि प्रदेशे समुतोल्य भूपृष्ठेऽपोथयत्।

प्रश्नः ६७— यवनेन अपहृतायाः बालिकायाः माता पित्रोः अन्वेषणं कर्तुं क अगमत्?

उत्तरम्— श्यामवटुः।

प्रश्नः ६८— अपहृतायाः बालिकायाः नाम किमासीत्?

उत्तरम्— कोसला।

प्रश्नः ६८— श्यामवटुःकेन साकं प्रत्यागात् आश्रमम्?

उत्तरम्— देवशर्मणा वर्षीयसा ब्राह्मणेन सह।

प्रश्नः ६९— कोसलायाः पिता कुत्र केन हतः आसीत्?

उत्तरम्— म्लेच्छ हतकैः संग्रामे।

प्रश्नः ७०— देवशर्मा ब्राह्मणः क आसीत् श्यामगौरसिंहयोः?

उत्तरम्— पुरोहितः।

प्रश्नः ७१— अपहृत बालिका का आसीत् श्यामगौरसिंहयोः?

उत्तरम्— भगिनी।

प्रश्नः ७२– श्यामगौरसिंहयोः पितुर्नाम किमासीत्?

उत्तरम्– वीरः खड्गसिंहः।

प्रश्नः ७३–कुत्र परस्सहस्राः नार्यः यवनानामत्याचारभिया समकाल मेवात्मदाह मकार्षुः?

उत्तरम्– चित्रपुरदुर्गे।

प्रश्नः ७४– गौरसिंहश्यामसिंहयोः माता कदा मृतिमगात्?

उत्तरम्– तयोः बाल्यकाल एव।

प्रश्नः ७५– बाल्यकाले के श्याम गौरसिंहयोरपहरणमकार्षुः?

उत्तरम्– कम्बोजदेशीयाः दस्यवः।

प्रश्नः ७६– पलायमानौ गौरसिंह श्यामसिंहौ ग्रामे कुत्र गतौ?

उत्तरम्– हनुमन् मन्दिरम्।

प्रश्नः ७७– सिंहदुर्गात् शिववीरस्य पत्रमादाय तोरणदुर्गं गच्छतो युवकस्य किं नामासीत्?

उत्तरम्– रघुवीर सिंहः।

प्रश्नः ७८– रघुवीरसिंहः कदा प्रस्थितवान् तोरण दुर्गाय?

उत्तरम्– निम्लोचति सूर्यमण्डले।

प्रश्नः ७९– तोरणदुर्गं गच्छतो रघुवीरसिंहस्य मध्ये मार्गं किमभवत्?

उत्तरम्– अकस्मात् झाञ्झावतः समुत्थितः।

प्रश्नः ८०– रघुवीरसिंहस्य गमनमार्गः कीदृश आसीत्?

उत्तरम्– पर्वतमयः उच्चावच्च शिला व्याप्तः।

प्रश्नः ८१– रघुवीरसिंह कदा तोरणदुर्गं अगात्?

उत्तरम्– सायाह्नि रात्रौ।

प्रश्नः ८२– रघुवीरसिंहं विलोक्य तोराणदुर्गाध्यक्षः किं मनसि विचारितवान्?

उत्तरम्– एतादृशेषु कार्येषु कथं शिववीरः एनं युवानं प्रेषितवान्।

प्रश्नः ८३–तोरणदुर्गाध्यक्षः कुत्रनिवासितवान् रात्रौ रघुवीरसिंहम्?

उत्तरम्– श्रीहनुमन्मन्दिररे।

प्रश्नः ८४– मन्दिरस्योद्याने रघुवीर सिंह किमद्राक्षीत्?

उत्तरम्– पाषाणशिलायामुपविश्याति मधुरंगम्यन्तीमेकां बालिकाम्।

प्रश्नः ८५— गायन्तीं बालिकां वीक्ष्य रघुवीर सिंहस्य मनसि किम भवत्?

उत्तरम्— सः तस्याः रूप सम्पदम् वीक्ष्य काममोहितो बभूव।

प्रश्नः ८६— रघुवीरसिंहेन दृष्टायाः बालिकायाः किं नामासीत्?

उत्तरम्— सौवर्णी।

द्वा सुपर्णा ग्रन्थस्य

अतिलघूत्तरीयाणि लघूत्तरीयाणि च प्रश्नोत्तराणि

प्रश्नः १— द्वा सुपर्णा ग्रन्थस्य लेखकः कः?

उत्तरम्— श्रीराम जी उपाध्यायः।

प्रश्नः २— द्वा सुपर्णा पदम् कमर्थमभिधत्ते?

उत्तरम्— मूलरूपेण जीवात्मपरमात्मानौ। प्रस्तुत ग्रन्थे च श्रीकृष्ण सुदामानौ।

प्रश्नः ३— श्रीकृष्ण सुदाम्नोः कीदृशः सम्बन्ध आसीत्?

उत्तरम्— स ब्रह्मचारित्व सम्बन्धः।

प्रश्नः ४— सुपर्ण शब्दः कस्य वाचकः?

उत्तरम्— पक्षिणः।

प्रश्नः ५—सुदामा कुत्र निवसति स्म?

उत्तरम्— ग्रामे।

प्रश्नः ६— सुदामा अध्येतुं कुत्र जगाम?

उत्तरम्— कुलपतेः सन्दीपनेराश्रमे उज्जयिन्याम्।

प्रश्नः ७— सन्दीपनी मूलतः कस्य नगरस्य निवास्यासीत्?

उत्तरम्— वाराणस्याः।

प्रश्नः ८— उज्जयिन्यां कौ सुदाम्नः सहाध्यायिनौ बभूवतुः?

उत्तरम्— कृष्ण बलरामौ।

प्रश्नः ९— कृष्ण सुदामानौ शिप्रायाः परं पारं किमर्थं जग्मतुः?

उत्तरम्— गुरुकुलार्थमिन्धनमाने तुम्।

प्रश्नः १०— इन्धनार्थं गतयोः कृष्ण सुदाम्नोः वने किमभवत्?

उत्तरम्— झाञ्झावातेन सह पर्जन्यो भृशमवर्षत्।

प्रश्नः ११— इन्धनार्थं गतौ कृष्णसुदामानौ कुत्रौ निवसताम् रात्रौ?

उत्तरम्— वने एव।

प्रश्नः १२— कृष्ण सुदामानौ कस्मात् कारणात् वने निवसतः स्म?

उत्तरम्— वृक्षाणां पतनेन वन्यमार्गाणां विलुप्तत्वात्।

प्रश्नः १३— वने कृष्ण सुदामानौ रात्रौ कुत्रातिष्ठताम्?

उत्तरम्— कस्यचन महावृक्षस्या धस्तात्।

प्रश्नः १४— रात्रौ भोजनकाले सुदामा कस्मात् कृष्णाय किमपि नह्यदात्?

उत्तरम्— सुदाम्ना विचारितम्—कृष्णाय यः किञ्चिदपि ददाति तस्मै कृष्णो विपुलं प्रतिददाति। नाहं धनिको भवितुमिच्छामि। अतः कृष्णायमपि नहि दास्यामि।

प्रश्नः १५— समावर्तनानंतरं कृष्णादिकाः कुत्र गतवन्तौ?

उत्तरम्— स्वगृहम्।

प्रश्नः १६— केन निमन्त्रितः सुदामा मथुरानगरं जगाम?

उत्तरम्— कृष्णेन राजमहोत्सवावसरे।

प्रश्नः १७— मथुरानगरे सुदाम्नः किमभवत्?

उत्तरम्— बहमोद्यभाग् बभूव सुदामा।

प्रश्नः १८— ब्रह्मविचारावसरे सुदामा किं कृतवान्?

उत्तरम्— बहून् स्नातकान् पराजित्य सः राज्ञोऽपि प्रशंसास्पदं बभूव।

प्रश्नः १९— मद्यथुरायाः राज पुरोहितः क आसीत्?

उत्तरम्— गर्गाचार्यः।

प्रश्नः २०— गर्गाचार्यस्य पुत्र्याः नाम किमासीत्?

उत्तरम्— कौमुदी।

प्रश्नः २१— कस्मात् कारणात् कौमुदी सुदामानं वररूपेण प्राप्तुमैच्छत्?

उत्तरम्— सुदाम्नः प्रज्ञानेन हृत् हृदया सा तं पतिरूपेण प्राप्तुमैच्छत्।

प्रश्नः २२— कस्य माध्यस्थेन कौमुदी सुदाम्नोः विवाहःसमभवत्?

उत्तरम्— कृष्णस्य माध्यस्थ्येन।

प्रश्नः २३— सुदामगृहं गता कौमुदी किं चकार?

उत्तरम्— ग्रामीणानां दुर्दशां दृष्ट्वा हृदयेन सा दुख्यतिस्म।

प्रश्नः २४– ग्राम सुखायतुं कौमुदी किं चकार?

उत्तरम्– ग्रामं गता कौमुदी कन्याया पाठशालां समचालयत्। युवकानां वृद्धानां च कृते प्रौढशालां प्रारब्धवती।

प्रश्नः २५– कौमुद्याः प्रोद्यत्साहनेन ग्रामे किमभवत्?

उत्तरम्– कौमुद्याः प्रोत्साहनेन ग्रामीणानां आवश्यकानि वस्तूनितत्रैव वस्त्रादीनि निर्मीर्यन्ते स्म।

प्रश्नः २६– कौमुद्याः आदर्शं स्वीकृत्य तत्रत्यो नार्यः किमकार्षुः?

उत्तरम्– कौमुद्याः आदर्शमुररीकृत्य तत्रत्याः नार्यः स्वर्णालंकारान् परित्यज्य पुष्पादीनामलंकारान् धारयामासुः।

प्रश्नः २७– कौमुद्याः योजनाभिः सुदामग्रामस्य किमभवत्?

उत्तरम्– कौमुद्याः योजनाभिः सुदामग्रागः तीर्थीकृतः।

प्रश्नः २८– स्वाचार्यस्यादेशेन सुदामा किं चकार?

उत्तरम्– स्वग्रामस्य सविधे वन प्रदेशे गुरुकुलं प्रारब्धवान् सुदामा।

प्रश्नः २९– सुदामा प्रचालितं गुरुकुलं कीदृशं बभूव?

उत्तरम्– शनैः शनैः तद्गुरुकुलं चतुर्दिक्षुविख्यातं बभूव। देशान्तरेभ्योऽपि विद्यार्थिनस्तत्र पठितुं आजग्मुः।

प्रश्नः ३०– सुदामा ग्रामस्य जनेषु सौहार्दं कीदृशमासीत्?

उत्तरम्– सुदामग्रामस्य जनानां सौहार्देन सम्पूर्णो ग्रामः विशालपरिवार इवाभवत्।

प्रश्नः ३१– कौमुदी किमर्थं कृष्णस्य साह्यमपेक्षते स्म?

उत्तरम्– ग्रामाभ्युदय योजनां देश व्यापिनीं कर्तुकामा सा कृष्णस्य साहाय्यमपेक्षते स्म।

प्रश्नः ३२– कौमुद्याः स्वपितृगृहात् प्रस्थानकाले कृष्णः तां किम्प्राह?

उत्तरम्– कृष्णः साश्रुकण्ठः कौमुदीमाह– यदि नाम स्वकार्येषु धनाभावबाधा आपतेत् तदा अहं निःसंकोचः त्वया निमन्त्रयितव्यः। निमन्त्रणाय त्वया सोपायनः सुदामा प्रेषणीयः। अन्यत् सर्वमहं साधमिष्ये।

प्रश्नः ३३– ग्रामस्याभ्युदये धनाभावं मन्यमाना कौमुदीसुदामानं किमाह?

उत्तरम्– कौमुदीसुदामान माह यत्– ग्रामस्याभ्युदयं द्रष्टुं भवता कृष्णो निभन्त्रयितव्यः। अत्रागत्य कृष्णः अस्माकं योजां प्रेक्ष्य अस्याः प्रसाराय किमपि करोतु।

प्रश्नः ३४— कौमुद्या प्रेरितः सुदामा केनोपायनेन साकं कृष्णनगरीं जगाम?

उत्तरम्— चिपिटमुपायनीकृत्य स जगाम कृष्ण नगरम्।

प्रश्नः ३५—सुदाम्न आगमनं श्रुत्वा कृष्णः किं चकार?

उत्तरम्— प्रतिहारमागत्य कृष्ण सुदाम्नः सुस्वागतं कृत्वा आत्मानं बहुमेने।

प्रश्नः ३६— कीदृशेन जलेन सुदाम्नः पादौ प्रक्षालितौ बभूवतुः?

उत्तरम्— प्रेमाश्रुजलेन।

प्रश्नः ३७— कया साकं श्रीकृष्णः सुदामग्रामं समागात्?

उत्तरम्— रुक्मिण्या साकम्।

प्रश्नः ३८— कौमुद्याः योजनां वीक्ष्य रुक्मिणी संगतः श्रीकृष्णः किमकरोत्?

उत्तरम्— कौमुद्याः योजनां देशव्यापिनीं कर्तुं राजकोशाद् विपुलां धनराशिं प्रादात्।

प्रश्नः ३९— द्वा सुपर्णा ग्रन्थस्योपजीव्यम् किमास्ते?

उत्तरम्— पुराणान्येव।

प्रश्नः ४०— श्रीमद्भागवते सुदामा केन नाम्नाऽभिहितः?

उत्तरम्— कुचेल नाम्ना।

प्रश्नः ४१— बाल्यकाले सुदामा किं भवितुमियेषः?

उत्तरम्— ब्रह्मर्षिः।

प्रश्नः ४२— विवाहानन्तरं सुदामा कस्मान्नहि श्वशुरधन मगृह्णात्?

उत्तरम्— सः ग्रामरीतिं त्यक्तुं नैच्छत्।

प्रश्नः ४३— सुदामाऽनुसारेण परिग्रहः किं करोति?

उत्तरम्— मनुष्यंसन्मार्गादपा करोति प्रतिग्रहः।

प्रश्नः ४४— सुदामा धनपरित्यागं कस्मै प्रयोजनाय करोति?

उत्तरम्— आत्मकल्याणाय।

प्रश्नः ४५— नमः पदस्य योगे का विभक्तिर्भवति?

उत्तरम्— चतुर्थी विभक्तिः।

प्रश्नः ४६— विशेषण विशेष्ययोः कीदृशः संबन्धो भवति?

उत्तरम्— समान लिङ्ग— विभक्ति वचनानां नियमः। तद्यथाह्युक्तम्—

यल्लिङ्गं यद्वचनं या च विभक्तिर्भवति विशेष्यस्य।
तल्लिङ्गं तद्वचनं सा च विभक्तिर्भवति विशेषणस्यापि।

प्रश्नः ४७– कर्तृवाच्ये कर्तरि का विभक्तिर्भवति?

उत्तरम्– प्रथमा विभक्तिः।

प्रश्नः ४८– कर्तुः किं लक्षणम्?

उत्तरम्– यः' कार्यं करोति सः कर्ता। तथा चोक्तमपि– 'स्वतन्त्रः कर्ता'।

प्रश्नः ४९– कर्तृवाच्ये कर्मणि का विभक्तिर्भवति?

उत्तरम्– द्वितीया विभक्तिः– यथा रामो ग्रामं याति। इत्यात्र– रामः कर्ता, ग्रामम् कर्म।

प्रश्नः ५०– कर्तृवाच्ये करणे का विभक्तिर्भवति?

उत्तरम्– तृतीया विभक्तिः।

प्रश्नः ५१– करणस्य लक्षणं किम्?

उत्तरम्– साधकतमं करणम्। यस्मिन् सत्यविलम्बेन कार्यमुत्पद्यते तत् करणम्। यथा दण्डेन जघान। इत्यत्र दण्डपदं करणम्।

प्रश्नः ५२– कर्तृवाच्ये क्रिया कम्पदमनुसरति?

उत्तरम्– कर्तृपदम्।

प्रश्नः ५३– कर्म वाच्ये कर्मणि का विभक्तिर्भवति भवति?

उत्तरम्– प्रथमा विभक्तिः।

प्रश्नः ५४– कर्मवाच्ये कर्तरि का विभक्तिर्भवति?

उत्तरम्– तृतीया विभक्ति।

प्रश्नः ५५– कर्मवाच्ये क्रिया कम् पदमनुसरति?

उत्तरम्– कर्मपदम्।

मनोरमा-रत्नविमर्शः । केशवदेव तिवारी । (१-२ भाग)
महाभाष्यनवाह्निकीयालोचनम् । (नवाह्निक-प्रश्नोत्तरी) विजयमित्र शास्त्री
मालविकाग्निमित्र-रहस्यम् । डॉ. बालगोविन्द झा
मीमांसापरिभाषा सोपानम् । डॉ. शिवप्रसाद द्विवेदी
मुक्तावली-प्रकाश । (न्यायसिद्धान्तमुक्तावली-प्रश्नो.) राजेन्द्रप्रसाद कोठ्यारी
मुद्राराक्षस-विवेकः । लोकमणि दाहाल
मृच्छकटिक-सोपानम् । डॉ. नरेश झा
मेघदूत-तत्वालोकः । अशोकचन्द्र गौड़ शास्त्री
रघुवंश-रहस्यम् । रामप्रसाद त्रिपाठी । १-३ सर्ग, ६-७ सर्ग, १३-१४ सर्ग
रत्नावलीनाटिका सोपानम् । डॉ. शिवप्रसाद द्विवेदी
रसगङ्गाधर-सारः । डॉ. नरेश झा
लघुशब्देन्दुशेखर-सोपानम् । डॉ. शिवप्रसाद द्विवेदी
लघुसिद्धान्तकौमुदी-चन्द्रिका । आचार्य विजयमित्र शास्त्री
वक्रोक्तिजीवित-दीपिका । डॉ. नरेश झा
वाक्यपदीय-प्रकाशिका । (ब्रह्मकाण्ड) । डॉ. सुरेशचन्द्र शर्मा
वासवदत्ता-रहस्यम् । डॉ. शिवप्रसाद द्विवेदी
वेणीसंहार-रहस्यम् । पं. परमेश्वरदीन पाण्डेय
वेदान्तपरिभाषा-सौरभम् । आचार्य शिवप्रसाद द्विवेदी
वेदान्तसार-प्रदीपः । श्री राजेन्द्रप्रसाद कोठ्यारी
वैदिकसाहित्येतिहास-सोपानम् । डॉ. शिवप्रसाद द्विवेदी
वैयाकरणभूषणसार-दीपिका । श्री रामकिशोर त्रिपाठी
वैयाकरणसिद्धान्तकौमुदी-चन्द्रिका । शास्त्री एवं त्रिपाठी । (१-४ खण्ड) सम्पूर्ण
वैयाकरणसिद्धान्तलघुमञ्जूषा-रहस्यम् । स्वामी रामेश्वर पुरी
वृत्तरत्नाकर-दीपिका । पं. वेदव्यास शुक्ल
व्यक्तिविवेकप्रश्नोत्तरीः । (१-२ विमर्श) कोठ्यारी एवं द्विवेदी
व्याकरणशास्त्रस्येतिहासः । डॉ. ब्रह्मानन्द त्रिपाठी
शाकुन्तल-रहस्यम् । त्रिलोकीनाथ द्विवेदी
शिवराजविजय-दीपिका । पं. वेदव्यास शुक्ल । प्रथम विराम
शिशुपालवध-रहस्यम् । श्री अशोकचन्द्र गौड़ शास्त्री । १-४ सर्ग
संस्कृतसाहित्येतिहास-कुञ्जिका । आचार्य परमानन्द शास्त्री
सांख्यकारिकादर्शः । राजेन्द्रप्रसाद कोठ्यारी
साहित्यदर्पणालोकः । रामजीलाल शर्मा । (१-६ परि.; ७-१० परि.) सम्पूर्ण
साहित्यशास्त्रीयोनिबन्धेतिहासः । वेदव्यास शुक्ल ।
सिन्धुवादवृत्त-रहस्यम् । डॉ कृष्णदेव प्रसाद
स्वरवैदिकी-प्रकाशः । डॉ. बालगोविन्द झा

संस्कृत-विषयक सभी प्रतियोगी परीक्षाओं हेतु उपयोगी पुस्तकें

संस्कृतशिक्षणम्

व्याकरण-साहित्य-ज्योतिष-दर्शनशास्त्र-शिक्षणसहितम्

डॉ. उदय शंकर झा

संस्कृत शास्त्र-मञ्जूषा

डॉ. उदयशंकर झा

विषयवस्तु—• वैदिकसाहित्यअध्ययनम् • व्याकरणशास्त्रअध्ययनम् • छन्द(साहित्य-शास्त्र)अध्ययनम् • ज्योतिषशास्त्रअध्ययनम् • शिक्षाशास्त्रअध्ययनम् • शिक्षा-निरुक्त-कल्प-अध्ययनम् • भाषाविज्ञानअध्ययनम् • पुराणेतिहास-अध्ययनम् • धर्मशास्त्र-कर्मकाण्डअध्ययनम् • विषयानुसारेण वस्तुनिष्ठप्रश्नोत्तराणि

चिरन्तनी

पूर्वशिक्षाशास्त्री मार्गोपदेशिका

डॉ. रमाकान्तमिश्रः

• राष्ट्रिय संस्कृत संस्थान, नई दिल्ली • राष्ट्रिय संस्कृत विद्यापीठ, तिरुपति • श्री लाल-बहादुरशास्त्री राष्ट्रिय संस्कृत विद्यापीठ, नई दिल्ली • जगद्गुरु रामानन्दाचार्य राजस्थान संस्कृत विश्वविद्यालय, जयपुर एवं अन्य सभी विश्वविद्यालयों द्वारा आयोजित पूर्वशिक्षाशास्त्रीपरीक्षा के पाठ्यक्रमानुसार।

चौखम्बा सुरभारती प्रकाशन
के. 37/117 गोपालमन्दिर लेन
पो. बा. नं. 1129
वाराणसी 221001
दूरभाष : (0542) 2335263

चौखम्बा पब्लिशिंग हाउस
4697/2 (ग्राउण्ड फ्लोर)
गली नं. 21-ए, अंसारी रोड
दरियागंज, नई दिल्ली 110002
दूरभाष : (011) 23286537

चौखम्बा विद्याभवन
चौक (बैंक ऑफ बड़ोदा भवन के पीछे)
पो. बा. नं. 1069
वाराणसी
दूरभाष : (0542) 2420404

चौखम्बा संस्कृत प्रतिष्ठान
38 यू. ए. बंगलो रोड, जवाहर नगर
पो. बा. नं. 2113
दिल्ली 110007
दूरभाष (011) 23856391